[illegible]

स व्याख्यान योगभाष्यारंभः

Savyakhayana yoga prarambhah

3

17

3 Pd

668 पातंजलं

[illegible]

॥श्रीगणेशाय नमः॥ नमामि जगदुत्पत्तिहेतवे वेदवेद्यकेतवे क्लेशकर्मविपाकादिरहिताय च ॥ नत्वा पतंजलिमृषिं वेदव्यासेन भाषिते संक्षिप्तस्पष्टबह्वर्थे भाष्ये व्याख्या
विधास्यते ॥ इह हि भगवान् पतंजलिरारिप्सितस्य शास्त्रस्य संक्षेपतस्तात्पर्यार्थं शास्त्राभिधेयप्रयोजनयोः प्रतिपाद्यप्रतिपादकलक्षणसंबंधो अभिधेयस्य योगस्य
कैवल्यस्य च साध्यसाधनभावः प्रेक्षावत्प्रवृत्त्यंगं श्रोतृप्रवृत्तिसुखावबोधार्थमाचिख्यासुरस्यादिसूत्रं रचयांचकार अथ योगानुशासनं ॥ तत्र प्रथमा
वयवमथशब्दं व्याचष्टे अथेत्ययमधिकारार्थः अथेत्यस्यो निरितिवत् न त्वानंतर्यार्थः ॥ अनुशासनमिति हि शास्त्रमाह अनुशिष्यते नेनेति व्युत्पत्त्या ॥ न चास्य
मङ्गलार्थत्वं प्रवृत्तिः अपि तु योगविषयतत्त्वज्ञानचिख्यासायाः पिपानंतरं जिज्ञासानयोस्तु स्यात् ॥ यथाम्नायते ॥ तस्माच्छान्तो दान्त उपरतस्तितिक्षुः

॥श्रीगणेशाय नमः॥ अथ योगानुशासनं ॥ ॥अथेत्ययमधिकारार्थः ॥ १ ॥

हितो मङ्गलात्मन्येवात्मानं पश्येदित्यादिशिष्यप्रश्नतपश्चरणरसायनाद्युपयोगानंतर्यस्य च संभवे पि नाभिधानं ॥ शिष्यप्रतीतिप्रवृत्त्योर
नुपयोगात् प्रामाणिकत्वे योगानुशासनस्य तदभावे व्युपेयत्वात् अप्रमाणिकत्वे च तज्ज्ञावे पि हेयत्वात् ॥ एतेन तत्त्वज्ञानचिख्यापयिषया
नंतर्याभिधानं परास्तं ॥ अधिकारार्थत्वे त्वनुशासनेनाधिक्रियमाणस्य प्रस्तूयमानस्य योगस्याभिधानात् ॥ सकलशास्त्रतात्पर्यार्थव्याख्या
नेन शिष्यः सुखेनैव बोधितः प्रवर्तितश्च भवतीति ॥ निःश्रेयसस्य हेतुः समाधिरिति हि श्रुतिस्मृतीतिहासपुराणेषु प्रसिद्धं ॥ ननु किं सर्वं
दर्भगतो थशब्दो धिकारार्थस्तथा सत्यथातो ब्रह्मजिज्ञासेत्यादावपि प्रसंगइत्यत आह अयमिति ॥ १ ॥ ॥श्रीगोविंदाय नमः॥ रा

ननु हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातन इति योगियाज्ञवल्क्यस्मृतेः कथं पतंजलेर्योगशास्त्रवक्तृत्वमित्याशंक्य सूत्रकारेणानुशासनमित्युक्तं ॥ शिष्ट
स्य शासनमनुशासनमित्यर्थः ॥ यद्ययमथशब्दोऽधिकारार्थस्तदैवं वाक्यार्थः संपद्यत इत्याह । योगानुशासनं शास्त्रमधिकृतमिति ॥ ननु व्युत्पाद्यमान
तया योगोऽत्राधिकृतो न तु शास्त्रमित्यत आह तदस्य वेदितव्यमिति । सत्यं । व्युत्पाद्यमानतया योगः प्रस्तुतः स तु न विषयेण शास्त्रेण करणेन व्युत्पाद्यः क
रणगोचरतया तु योग एवाधिकृत इति भावः । आधिकारार्थस्य चाथशब्दस्यान्यार्थं नीयमानोदकुंभदर्शनमिव श्रवणं मंगलायापि कल्पत इति मंतव्यं । शब्दसंदेह
निमित्तमर्थसंदेहमपनयति ॥ योगः समाधिः । युज समाधावित्यस्माद्व्युत्पन्नः समाधिः ॥ युज समाधावित्यस्माद्व्युत्पन्नः समाध्यर्थो न तु युजिर् योग इत्यस्मा
त्संयोगार्थः । ननु समाधिरपि वक्ष्यमाणस्यांगिनो योगस्यांगं न चांगमेवांगीत्यत आह स च सार्वभौमः । चस्त्वर्थेऽङ्गादङ्गिनं भिनत्ति ॥ भूमयोऽवस्था वक्ष्यमा

योगानुशासनं शास्त्रमधिकृतं वेदितव्यं । योगः समाधिः स च सार्वभौमः चित्तस्य धर्मः ॥ क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः ॥ १ ॥

णाः मधुमती मधुप्रतीका विशोका संस्कारशेषाश्च ताश्चित्तस्य ॥ तासु सर्वासु विदितः सार्वभौमः चित्तवृत्तिनिरोधलक्षणो योगस्तदंगं तु समाधिर्नैवं भूतः
व्युत्पत्तिनिमित्तमात्राभिधाने चैतद्योगः समाधिरित्यंगांगिनोरभेदविवक्षामात्रेण ॥ प्रवृत्तिनिमित्तं तु योगशब्दस्य चित्तवृत्तिनिरोध एवेति परमार्थः वृत्तयो ज्ञाना
त्माश्रयाः अतस्तन्निरोधोऽप्यात्माश्रित एवेति पक्षं निरसितुं तन्निरासायाह । चित्तस्य धर्म इति । चित्तशब्देनांतःकरणं बुद्धिमुपलक्षयति । न हि कूटस्थनित्या चितिशक्तिरपरिणा
मिनी ज्ञानधर्माश्रयितुमर्हति बुद्धिस्तु भवेदिति भावः स्यादेतत् । सार्वभौमश्चेद्योगः हंत भोः क्षिप्ता अपि चित्तभूमयोऽस्ति च परस्परापेक्षया वृत्तिनिरोधोऽप्यास्विति तत्रा
पि योगत्वप्रसंग इत्याशंक्य हेयोपादेयभूमीरुपन्यस्यति । क्षिप्तमित्यादि । क्षिप्तं सदैव रजसा तेषु तेषु विषयेषु क्षिप्यमाणमसंतमस्थिरं मूढं तु तमःसमुद्रेकान्निद्रावृत्तिमत् । क्षिप्ताद्विशिष्टं विक्षिप्तं
मबहुलस्य कादाचित्कः स्थेमा सा चासौ स्थेमबहुलता सा सिद्धिकी बाध्यमाणव्याधिस्त्यानाद्यंतरायजनिता वा एकाग्रमेकतानं ॥ निरुद्धसकलवृत्तिकं संस्कारमात्रशेषं चि

पा॰टी॰ क्षिप्तमूढयोः सत्यपि परस्परापेक्षय॥ वृत्तिनिरोधे पारंपर्येणापि निःश्रेयसहेतुभावात् तदुपघातकत्वाच्च योगपक्षाद्दूरोत्सारितत्वमिति तत्तयोर्योगत्वं निषिद्धं
२ विक्षिप्तस्य तु कादाचित्कसद्भूतविषयस्थेमशालिनः संभाव्येत योगत्वमिति निषेधति॥ तत्र विक्षिप्ते चेतसि समाधिः कादाचित्कसद्भूतविषयस्य चित्तस्य
स्थैमा न योगपक्षे वर्त्तते कस्माद्यतः तद्विपक्षविक्षेपोपसर्जनीभूतः विपक्षवर्गान्तर्गतस्य हि स्वरूपमेव दुर्लभं प्रागेव कारणं॥ तस्य तु दहनान्तर्गतं बीजं त्रिच
तुःक्षणावस्थितमुप्तमप्यंकुराय कल्प्यत इति भावः यदि विक्षेपोपसर्जनीभूतः समाधिर्न योगः कस्तर्हि इत्यत आह यस्त्वेकाग्रे चेतसीति भूतमिति समारो
पितमर्थं निवर्त्तयति। निद्रावृत्तिरपि स्यात् तेनैतमासिभूते भवस्थेकाग्रे स्यात् तदुक्तं सदिति शोभनं नितान्ताविर्भूतं सत्त्वं तमः समुद्रेकस्तु शोभनस्तस्य

तत्र विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समाधिर्न योगपक्षे वर्त्तते यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्मबंधनानि श्लथयति निरो
धमभिमुखं करोति स संप्रज्ञातो योग इत्याख्यायते स च वितर्कानुगतो विचारानुगत आनंदानुगतोऽस्मितानुगत इत्युपरिष्टान्निवेदयिष्यामः। सर्ववृत्तिनिरोधे त्व
संप्रज्ञातः समाधिः॥

क्लेशहेतुत्वादिति द्योतमानं इतरज्ञानमागमादागमाद्धानुमानाद्वा भवदपि परोक्षरूपतया न साक्षात्कारवतीमविद्यामुच्छिनत्ति द्विचंद्रदिङ्मोहा
दिष्वनुच्छेदकत्वादत आह प्रद्योतयत्यसाक्षात्कारं स्थापयति अविद्याविरुद्धत्वादस्मितादीनां क्लेशानामविद्यापाश्रयाविद्योच्छेद
रूपत्वात् विद्योदयेवाविद्यादिक्लेशसमुच्छेदो विरोधित्वात् कारणविनाशाच्चेत्याह क्षिणोति चेति अत एव कर्मरूपाणि बंधनानि श्लथयति॥ कर्म
चान्वा पूर्वमभिमतं कार्ये कारणोपचाराच्छ्लथयति स्वकार्यादिव सादयतीव स्थापयति हि सतिमूले तद्विपाक इति किं च निरोधमभिमुखं करोति स
भिमुखीकरोति स च संप्रज्ञातस्तु प्रकार इत्याह स चेति असंप्रज्ञातमाह सर्ववृत्तीति रजस्तमोमयीकिल्प्रमाणादिवृत्तिः सात्त्विकीवृत्तिमुपा
रायसंप्रज्ञातेन निरुद्धा असंप्रज्ञाते तु सर्वासामेव निरोध इत्यर्थः न हि भूमिद्वयसंमाप्तापामधुमत्यादयो भूमयस्ताः सर्वास्तासु विदितः सार्वभौमस्वतिसिद्ध॥ हेरंब
२

द्वितीयसूत्रमवतारयति तस्यलक्षणेति तस्येति पूर्वसूत्रोपात्तं द्विविधं योगं परामृशति योगश्चित्तवृत्तिनिरोधः निरुध्यंते यस्मिन् प्रमाणादिवृत्तयो
वस्थाविशेषश्चित्तस्यसोवस्थाविशेषो योगः ननु संप्रज्ञातस्य योगस्याव्यापकत्वाल्लक्षणमिदं अनिरुद्धा हि तत्र सात्विकी चित्तवृत्तिरित्यत आह स
र्वशब्दाग्रहणादिति यदि सर्वचित्तवृत्तिनिरोध इत्युच्येत भवेदव्यापकं संप्रज्ञातस्य क्लेशकर्मविपाकाशयपरिपंथी चित्तवृत्ति[redacted] सर्व[redacted]रोध
स्तुतमपि संगृह्णाति तत्रापि राजसतामसवृत्तिनिरोधात् तस्य च तद्भावादित्यर्थः कुतः पुनरेकस्य चित्तस्य क्षिप्तादिभूमिसंबंधः किम

॥ तस्य लक्षणाभिधित्सयेदं सूत्रं प्रववृते ॥ योगश्चित्तवृत्तिनिरोधः सर्वशब्दाग्रह ॥ ॥
॥ णात्संप्रज्ञातोपि योग इत्याख्यायते ॥ चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात्त्रिगुणं ॥५॥

र्थं चैवमवस्थस्य चित्तस्य वृत्तस्य वृत्तयो निरोद्धव्या इत्याशंक्य प्रथमं तावदवस्थासंबंधे हेतुमुपन्यस्यति चित्तं हीति प्रख्याशीलत्वात् सत्व
गुणं प्रवृत्तिशीलत्वाद्रजोगुणं स्थितिशीलत्वात्तमोगुणं प्रख्याग्रहणमुपलक्षणार्थं तेनान्योपि सात्विकाः प्रसादलाघवप्रीत्यादयः सूच्यंते॥
प्रवृत्त्या च परितापशोकादयो राजसाः प्रवृत्तिविरोधी तमोवृत्तिधर्माः स्थिति । स्थितिग्रहणाद्गौरवावरणदैन्यादय उपलक्ष्यंते ॥ एतदु
क्तं भवति एकमपि चित्तं त्रिगुणनिर्मिततया गुणानां च वैषम्ये परस्परविमर्दवैचित्र्याद्विचित्रपरिणामं दनेकावस्थमुपपद्यत इति ॥५॥

पा॰टी॰ क्षिप्ताद्या एव चित्तस्य भूमीर्यथासंभवमवांतरवस्थाभेदवतीरादर्शयति॥ प्रख्यारूपं हीति चित्तरूपेण परिणतं सत्त्वं चित्तसत्त्वं॥ तदेवं प्रख्यारूपतया
सत्त्वप्राधान्यं चित्तस्य दर्शितं। तच्चित्तसत्त्वं तु किंचिदूने रजस्तमसी यदा मिथः समे च भवतस्तदैश्वर्यं च विषयाश्च शब्दादयस्तान्येव प्रियाणि यस्य त
३ थोक्तं सत्त्वप्रधान्यं तु खलु चित्तं तत्त्वे प्रणिधित्सदपि तत्त्वस्य तमसा पिहितत्वादणिमादिकमैश्वर्यमेव तत्त्वमभिमन्यमानं तत्प्रणिधित्सतीति प्र
णिधत्ते चक्षणं। अथ रजसा क्षिप्यमाणं तत्राप्यलब्धास्थितिरप्रियमात्रं भवति शब्दादिषु पुनरस्य स्वरसवाही प्रेमा निरूढ एव॥ तदनेन विक्षि
प्तं चित्तं दर्शयन्मूढमपि सूचयति तदेव तमसेति यदा हि तमो रजो विजित्य प्रसरति तदा चित्तसत्त्वावरकं तमः समुत्सारणेऽशक्तं त्वाद्रजसस्त

प्रख्यारूपं हि चित्तसत्त्वं रजस्तमोभ्यां संसृष्टमैश्वर्यविषयप्रियं भवति। तदेव तमसानुविद्धं अधर्माज्ञानवैराग्यानैश्व
र्योपगं भवति तदेव प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्यैश्वर्योपगं भवति॥

मः स्थगितं चित्तमधर्माद्युपगच्छति अज्ञानं च विपर्ययज्ञानमभावप्रत्ययालंबनं च निद्राज्ञानमुक्तं ततश्च मूढावस्थापि सूचितेति अनै
श्वर्यं सर्वत्रेच्छाप्रतीघातः अधर्मादिव्याप्तं चित्तं भवतीत्यर्थः यदा तु तदेव चित्तसत्त्वमाविर्भूतसत्त्वमपगततमःपटलं सरजस्कं भवति तदा
धर्मज्ञानवैराग्यैश्वर्याण्युपगच्छतीत्याह प्रक्षीणेत्यादि मोहस्तमस्तदेव चावरणं प्रकर्षेण क्षीणं यस्य तत्तथोक्तं अत एव सर्वतो विशेषावि
शेषलिंगरूपेषु प्रद्योतमानं तथापि न धर्मादयैश्वर्यपर्यवकल्पते प्रवृत्त्यभावादित्यत आह॥ अनुविद्धं रजोमात्रया रजसः प्रवर्तकत्वादित्ति
धर्मादि प्रवृत्तिरित्यर्थः तदनेन संप्रज्ञातसमाधिसंपन्नयोर्मधुभूमिकप्रज्ञाज्योतिषोर्मध्यमयोर्योगिनोश्चित्तसत्त्वं संगृहीतं॥

पा॰टी॰ विवेकख्यातेर्हानहेतुं चितिशक्तेश्चोपादानहेतुं निरोधसमाधिमवतारयितुं चितिशक्तेः साधुतामसाधुतां च विवेकख्यातेर्दर्शयति चितिशक्तिरित्यादि॥ सुखदुःखमो-
हात्मकत्वमशुद्धिः सुखमोहावपि हि विवेकिनं दुःखाकुरुतः अतो दुःखवद्धेयौ तथा चातिसुंदरमप्यंतवद्दुनोति तेन तदपि हेयमेव विवेकिनः। सेयमविशु-
६ द्धिरंतवत्त्वं च चितिशक्तौ तद्रूपेण स्तद्रूपत्वं शुद्धा चानंता चेति ननु सुखदुःखमोहात्मकशब्दादीन्विषयांश्चेतयमाना तदाकारापन्ना कथं विशुद्धा तदाकारपरित्या-
गपरिवर्जने च कुर्वती कथमनंतेत्यत उक्तं दर्शितविषयेति। दर्शितो विषयः शब्दादिर्यस्यै सा तथोक्ता। भवेदेतदेवं यदि बुद्धिवच्चितिशक्तिर्विषयाका-
रतामापद्यते। किं तु बुद्धिरेव विषयाकारेण परिणता सती अतदाकारायै चितिशक्त्यै विषयमादर्शयति। तत्र पुरुषश्चेतयत इत्युच्यते॥ ननु विषया-
कारां बुद्धिमनारूढायाश्चितिशक्तेः कथं विषयवेदनं विषयारोहे वा कथं न तदाकारापत्तिरित्यत उक्तं अप्रतिसंक्रमेति॥ प्रतिसंक्रमः संसारः स चितेर्ना-

चितिशक्तिरपरिणामिन्यप्रतिसंक्रमा दर्शितविषया शुद्धा चानंता च सत्त्वगुणात्मिका चेयमतो विपरीता विवेकख्यातिरित्यतस्तस्यां विरक्तं चित्तं ताम-
पि ख्यातिं निरुणद्धि तदवस्थं संस्कारोपगं भवति स निर्बीजः समाधिः न तत्र किंचित्संप्रज्ञायत इत्यसंप्रज्ञातः द्विविधः स योगश्चित्तवृत्तिनिरोध इति॥२॥

स्तीत्यर्थः स एव कुतोऽस्या नास्तीत्यत उक्तं अपरिणामिनीति न विद्यते त्रिविधोऽपि धर्मलक्षणावस्थालक्षणः परिणामोऽस्या येन क्रियारूपेण परिणता सती बु-
द्धिसंयोगे न परिणामेन चितिशक्तिः असंक्रांतिर्या अपि विषयसंवेदनमुपपादादपिष्येते न तत्सिद्धं चितिशक्तिः शोभनेति। विवेकख्यातिस्तु बुद्धिसत्त्वात्मिका
अशोभनेत्युक्तं अतश्चितिशक्तेर्विपरीतेति यदा च विवेकख्यातिरपि हेया तदा कैव कथा वृत्त्यंतराणां दोषबहुलानामिति भावः ततस्तद्धेतो निरोधसमा-
धेरवतारो युज्यत इत्याह अतस्तस्यामिति ज्ञानप्रसादमात्रेण हि परेण वैराग्येण विवेकख्यातिमपि निरुणद्धीत्यर्थः। अथ निरुद्धाशेषवृत्ति चित्तं कीदृशमित्य-
त आह तदवस्थमिति। तादृशनिरोधावस्थमस्य तत्तयोक्तं निरोधस्वरूपमाह निर्बीज इति क्लेशसहितः कर्माशयो जात्यायुर्भोगबीजं तस्मान्निर्ग- हेरंब
त इति निर्बीजः स्येअस्येव योगिजनप्रसिद्धामन्वर्थसंज्ञामादर्शयति॥ न तत्रेत्युपसंहरति। द्विविधः स योगः चित्तवृत्तिनिरोध इति॥२॥ ॥ ६

संप्रज्ञातिक्रांतभावनीयस्य ध्यायिनश्चतुर्थस्य चित्तावस्थामाह तदेव चित्तं रजोलेशान्मलादपेतमत एव स्वरूपप्रतिष्ठमभ्यासवैराग्यपुटपाकप्रबंध
विधूतरजस्तमोमलस्य हि बुद्धिसत्वतपनीयस्य स्वरूपे प्रतिष्ठायां विषयेंद्रियप्रसाहृतस्यानवसिताधिकारतया च कार्यकारिणो विवेकख्याति॰

तदेव रजोलेशमलापेतं स्वरूपप्रतिष्ठं सत्वपुरुषान्यताख्यातिमात्रं ध
र्ममेघध्यानोपगं भवति तत्परं प्रसंख्यानमित्याचक्षते ध्यायिनः॥ १॥

परं कार्यमवशिष्यत इत्याह सत्वपुरुषान्यताख्यातिमात्रं चित्तं धर्ममेघध्यानोपगं भवति धर्ममेघश्च वक्ष्यते॥ अत्रैव योगिजनप्रसिद्धिमाह त
दिति सत्वपुरुषान्यताख्यातिमात्रं चित्तं धर्ममेघपर्यंतं परं प्रसंख्यानमित्याचक्षते ध्यायिनः चित्तसामानाधिकरण्यं च धर्मधर्मिणोरभेदविवक्षया द्रष्टव्यं॥ १॥

संप्रत्युत्तरसूत्रमवतारयं श्चोदयति तदवस्थे चेतसीति किमाक्षेपे ॥ ननु तदाकारपरिणतबुद्धिबोधात्मा खल्वयं पुरुषः सदानुभूयते ननु बुद्धिबोधरहितोऽतोस्य
पुरुषस्य बुद्धिबोधः स्वभावः सवितुरिव प्रकाशः न च संस्कारशेषेतादृशोस्ति ॥ न च स्वभावमपहाय भावो वर्त्तितुमर्हतीति भावः स्यादेतत् । संस्कारशेषामपि बुद्धिं
कस्मात्पुरुषो न बुध्यत इत्यत आह विषयाभावादिति न बुद्धिमात्रं पुरुषस्य विषयोपि तु पुरुषार्थवती बुद्धिः विवेकख्यातिविषयभोगौ च पुरुषार्थौ तौ च निरुद्धा
वस्थायां न स्त इति सिद्धो विषयाभाव इत्यर्थः सूत्रेण परिहरति तदा द्रष्टुः स्वरूपेवस्थानं स्वरूपे इत्यारोपितं शांतघोरमूढस्वरूपत्वं निर्वर्त्तयति ॥ पु
रुषस्य हि चैतन्यं स्वरूपमनौपाधिकं न तु बुद्धिबोधः शांतादिरूपः औपाधिको हि सः स्फटिकस्येव स्वभावस्थधवलस्य जपाकुसुमसन्निधानोपाधिरक्त

तदेवस्थे चेतसि विषयाभावाद् बुद्धिबोधात्मा पुरुषः किंस्वभाव इति ॥२॥ तदा द्रष्टुः स्वरूपेवस्थानं ॥ स्वरूप
प्रतिष्ठा तदानीं चितिर्यथा कैवल्ये व्युत्थानचित्ते तु सति तथापि भवंती न तथा ॥३॥ ॥ ॥ ॥ ॥

ता न चोपाधिनिवर्त्तावुपहितनिवृत्तिरतिप्रसंगादिति भावः स्वरूपस्य चाभेदेपि भेदं विकल्प्याधिकरणभाव उक्त इति अयमेवार्थो भाष्यकृताप्युक्तं
ते स्वरूपप्रतिष्ठेति तदानीं निरोधावस्थायां न व्युत्थानावस्थायामिति भावः स्यादेतत् व्युत्थानावस्थायामप्रतिष्ठिता स्वरूपे चितिशक्तिर्निरोधावस्थायां प्रतिष्ठितं
ता परिणामिनी स्यात् व्युत्थाने वा स्वरूपप्रतिष्ठा ने व्युत्थाननिरोधयोरविशेष इत्यत आह व्युत्थानचित्ते तु सति न जात्वरूपस्थितिः सा चितिशक्तिः स्व
रूपात् प्रच्यवते तेन यथा निरोधे तथैव व्युत्थानेपि न खलु शुक्तिकायाः प्रमाणविपर्ययज्ञानगोचरत्वेपि स्वरूपोदयव्ययौ भवतः प्रतिपत्ता तु तथा भूतमप्य

प्यालेनाभिमन्यते निरोधसमाधिमपेक्ष्य संप्रज्ञातोपि व्युत्थानमप्येवेति ॥३॥

पा॰टी॰ सूत्रांतरमवतारयितुं पृच्छति कथं तर्हीति यदि तथापि भवंतीन तथा केन तर्हि प्रकारेण प्रकाशत इत्यर्थः हेतुपदं ध्याहृत्य सूत्रं पठति दर्शितविषयत्वात्॥व
त्तिसारूप्यमितरत्र व्युत्थाने याश्चित्तवृत्तयः शांतघोरमूढास्ता एवाविशिष्टा अभिन्ना वृत्तयो यस्य पुरुषस्य स तथोक्तः सारूप्यमित्यत्र सश
५ ब्द एकपर्यायः एतदुक्तं भवति जपाकुसुमस्फटिकयोरिव बुद्धिपुरुषयोः सन्निधानाद् भेदाग्रहे बुद्धिवृत्तीः पुरुषे समारोप्य शांतोऽस्मि दुःखितो
ऽस्मि मूढोऽस्मीत्यध्यवस्यति यथा मलिने दर्पणतले प्रतिबिंबितं मुखं मलिनमारोप्य शोचत्यात्मानं मलिनोऽस्मीति यद्यपि पुरुषसमारोपोपि शब्दादि
विज्ञानवद्बुद्धिवृत्तिः यद्यपि च प्राकृतत्वेनाऽविशुद्धतयाऽनभाव्यस्तथापि विशुद्धेः पुरुषत्वमापादयन्पुरुषत्वमापादयन्पुरुषवृत्तिरिवानुभवस्वानुभवेद

कथं तर्हि दर्शितविषयत्वात्॥३॥ वृत्तिसारूप्यमितरत्र॥ व्युत्थाने याश्चित्तवृत्तयस्तदविशिष्टवृत्तिः पुरुषः
तथा च सूत्रं एकमेव दर्शनं ख्यातिरेव दर्शनमिति॥१०॥ ॥ ॥ ॥ ॥ ॥ ॥

वावभासते तथाचाचार्याः विपर्ययोप्यात्माविपर्ययवान् निवाभोक्तापि भोक्तेव विवेकख्यातिरहितोपि जन्तु सहित इव विवेकख्यात्या प्रकाशते एतच्च वितेरप
तिसंक्रमायास्तदाकारापत्तौ बुद्धिसंवेदनमित्यत्र सत्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो भोग इत्यत्र चोपपादयिष्यते एतच्च मतांतरेपि सि
द्धमित्याह तथा चेति पंचशिखाचार्यस्य सूत्रं एकमेव दर्शनं ख्यातिरेव दर्शनमिति नन्वेकमेवैकं दर्शनं यावता बुद्धेः शब्दादिविषया विवेकविषया च वृत्तिः
प्राकृततया जडत्वेनानुभाव्याद्दर्शनं ततो न्यमन्तु भवो दर्शनमित्यत आह ख्यातिरेव दर्शनमिति उदयव्ययधर्मिणी वृत्तिः ख्यातिर्लौकिकीमाभित्सै हेरंब
तदुक्तं एकमेवेति चैतन्यं तु पुरुषस्य भावो न ख्यातेः चैतन्यं तु न लोकप्रत्यक्षगोचरोऽपि तु आगमानुमानगोचर इत्यर्थः॥१०॥ ॥ ॥ ५

तदनेन मुक्तावस्थायां फलकारणमविद्यां दर्शयता तद्धेतुकः संयोगो भोगहेतुः स्वस्वामिभावोपि सूचितद्दितमुपपादयन्नाह चित्तं स्वं भवति पुरुषस्य स्वामि त्वसंबंधः ननु चित्तजनितमुपकारं भजमानो हि चेतनश्चित्तस्येशिता न चास्य तज्जनितोपकारसंभवस्तत्संबंधाद्वनुपकार्यत्वात् तत्संयोगात्तदुपकार भागित्वे परिणामप्रसंगादित्यत आह अयस्कांतमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेनेति न पुरुषसंयुक्तं चित्तमपि तत् सन्निहितं सान्निधि श्च पुरुषस्य न देशतः कालतो वा तत्संयोगात् किंतु योग्यतालक्षणोस्ति च पुरुषस्य भोक्तृत्वशक्तिश्चित्तस्य भोग्यशक्तिः तदुक्तं दृश्यत्वेनेति॥

कथं तर्हि दृशित्वविषयत्वात्॥ ३॥ वृत्तिसारूप्यमितरत्र चित्तमयस्कांतमणिकल्पं सन्निधिमा॥ ॥ ॥
त्रोपकारि दृश्यत्वेन स्वं भवति पुरुषस्य स्वामिनः तस्माच्चित्तवृत्तिबोधे पुरुषस्यानादिः संबंधो हेतुः॥११॥

शब्दाद्याकारपरिणतस्य भोग्यत्वेनेत्यर्थः भोगश्च यद्यपि शब्दाद्याकारावृत्तिश्चित्तस्य धर्मस्तथापि चित्तचैतन्ययोरभेदसमारोपाद्वृत्तिसारूप्यात्पुरु षस्येत्युक्तं॥ तस्माच्चित्तेनासंयोगेपि तज्जनितोपकारभागिता च पुरुषस्यापरिणामिता चैति सिद्धं ननु स्वस्वामिसंबंधो भोगहेतुरविद्यानिमित्तोऽवि द्या तु किंनिमित्ता न खलु निर्निमित्तं कार्यमुत्पद्यते यथाहुः स्वप्नाद्विवदविद्यायाः प्रवृत्तिस्तस्य किंकृतेति शंकामुपसंहारव्याजेनोद्धरति तस्माच्चित्तवृ त्तिबोधे शांतघोरमूढाकारचित्तवृत्त्युपभोगेऽनाद्यविद्यानिमित्तत्वादनादिः संयोगो हेतुः अविद्यावासनयोश्च संतानो बीजांकुरसंतानवदनादिरिति

पा॰ टी॰ स्यादेतत् पुरुषो हि शक्येउपदिश्यते न च वृत्तिनिरोधो वृत्तीरविज्ञायशक्यो न च सहस्रेणापि पुरुषायुषैरलमिमाः कश्चिन्परिगणयितुमसंख्याता श्चकथंनि
रोद्धुमाद्दत्याशंक्याता सामिपत्ता स्वरूपप्रतिपादनपरं सूत्रमवतारयति ताः पुनर्निरोद्धव्या बहुत्वे सति चित्तस्य॥ वृत्तयः पंचतय्यः क्लिष्टा।क्लिष्टाः वृत्तिरूपोवय
६ वैकस्तस्यप्रमाणादयो वयवाः पंचतत्तस्तद्वयवा पंचतयी पंचावयवा वृत्तिर्भवति।ताश्च वृत्तयश्चैत्रमैत्रादि।चित्तभेदाद्बहुत्वादिति बहुवचनमुपपन्नं
एतदुक्तं भवति चैत्रोवामैत्रोवान्योवा कश्चित्सर्वेषामेवतेषां वृत्तयः पंचतय्य एव नाधिका इति॥ चित्तस्येति चैकवचनंजात्यभिप्रायं।चित्तानामि

ताः पुनर्निरोद्धव्याः बहुत्वेसति चित्तस्य॥५॥ वृत्तयः पंचतय्यः। क्लिष्टाक्लिष्टाः
क्लेशहेतुकाः कर्माशयप्रचयक्षेत्रीभूता। क्लिष्टाः॥१२॥ ॥ ॥ ॥

तिरिष्ट्यंतासामवांतरविशेषमनुष्ठानोपयोगिनं दर्शयति क्लिष्टाक्लिष्टा इति अ।क्लिष्टानुपादेया।क्लिष्टानिरोद्धव्यास्ता अपिपरेणवैराग्ये
णेतिअस्यव्याख्यानं क्लेशहेतुका इति क्लेशा अस्मितादयो हेतवः प्रवृत्तिकारणं यासांवृत्तीनांतास्तथोक्ताः यद्वा पुरुषार्थप्रधानस्य रजस्तमोमयीनां ॥१२॥
हिवृत्तीनां क्लेशकारणत्वेन क्लेशायैवप्रवृत्तिः क्लेशः क्लिष्टंतदासामस्तीति क्लिष्टा इति यत एव क्लेशोपार्जनार्थमभ्यासांप्रवृत्तिरत एव कर्माशयप्र
चयक्षेत्रीभूताः प्रमाणादिनाखल्वर्थंप्रतिपत्तार्थमवसायतत्रसक्तो द्विष्टोवाकर्माशयमाचिनोतीति भवति धर्माधर्मप्रचयप्रसवभूमयो व्यापः क्लिष्टाः हं॰द्र
६

अक्लिष्टा व्याचष्टे ख्यातिविषया इति ॥ विध्वस्तरजस्तमसो बुद्धिसत्त्वस्य प्रशान्तवाहिनः प्रज्ञाप्रसादः ख्यातिस्तया विषयिण्या तद्विषयं सत्त्वपुरुषविवेकमुपलक्ष
पति तेन सत्त्वपुरुषविवेकविषया पतो अत एव गुणाधिकारविरोधिन्यः कार्यारम्भणं हि गुणानामधिकारो विवेकख्यातिपर्यवसानं च तद्वृत्तिश्च रिता
धिकाराणां गुणानामधिकारं विरुन्धन्तीति अत्रास्ता अक्लिष्टाः प्रमाणप्रमुखयो वृत्तयः स्यादेतन्न वीतरागजन्मादर्शनात् । क्लिष्टवृत्तय एव सर्वप्राणभृ
तो न च क्लिष्टवृत्तिप्रवाहे मध्ये विलुठन्ति सक्लिष्टा वृत्तयो न चा मूर्खभावे पि कार्यकारिता विरोधिमध्यपातित्वात् तस्मात् क्लिष्टानामक्लिष्टाभिर्नि
रोधस्तासां च वैराग्ये ऐति मनोरथमात्रमित्यत आह क्लिष्टप्रवाहे ति आगमानुमानाचार्योपदेशपरिशीलनलब्धजन्मनी अभ्यासवैरा

ख्यातिविषया गुणाधिकारविरोधिन्यो ऽक्लिष्टाः । क्लिष्टप्रवाहपतिता अप्यक्लिष्टाः । क्लिष्टछिद्रेष्वप्यक्लिष्टा भ
वन्ति अक्लिष्टछिद्रेषु क्लिष्टा इति तथाजातीयकाः संस्काराः वृत्तिभिरेव क्रियन्ते संस्कारैश्च वृत्तय इति एवं वृत्ति
संस्कारचक्रमनिशमावर्त्तते तदेवंभूतं चित्तमवसिताधिकारमात्मकल्पेन व्यवतिष्ठते प्रलयं वा गच्छतीति ॥५॥

ये क्लिष्टछिद्रमन्तरा तत्र पतिताः स्वयमक्लिष्टा एव यद्यपि क्लिष्टप्रवाहपतिताः न खलु शालग्रामे किरातशतसंकीर्णे प्रतिवसन् विप्रास
ताः किरातो भवति अक्लिष्टछिद्रेष्विति निदर्शनं क्लिष्टान्तरवर्तितया च क्लिष्टाभिरनभिभूता अक्लिष्टाः स्वसंस्कारपरिपाकक्रमेण क्लिष्टाए
वतावदभिभवन्तीत्याह तथाजातीयका इति अक्लिष्टाभिर्वृत्तिभिः क्लिष्टाः संस्कारा इत्यर्थः तदिदं वृत्तिसंस्कारचक्रमनिशमावर्त्तते ॥
आनिरोधसमाधेः तदेवंभूतं चित्तं निरोधावस्थं संस्कारशेषं भस्मात्मकल्पेनावतिष्ठत इदसापातत । प्रलयं वा गच्छतीति पर्यन्तः ॥५॥

पा॰टी॰

पिंडीकृत्य सूत्रार्थमाह ताइति पंचधेत्यर्थकथनमात्रं न तु शब्द इति व्याख्यानं तयपः प्रकारे ऽस्मरणात् ताः संज्ञा निरुद्दिशति । प्रमाणविपर्ययविकल्पनि
द्रास्मृतयः निर्देशे यथावचनं विग्रहश्चार्थे द्वंद्वः समास इतरेतरयोगे यथाऽनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येत्युक्तेपि न दृष्टोहा
७ ला न च क्रादिविभ्रमा गुरुस्यंते एव मिहापि प्रमाणाद्यभिधानेपि वस्त्वंतरसद्भावशंकानवकाशस्येति तन्निरासाय चक्तव्यं पंचतय्य इति एतावंत
एव वृत्तयो नापराः संतीति दर्शितं भवति तत्र प्रमाणवृत्तिं विभजन् सामान्यलक्षणमाह प्रत्यक्षानुमानागमाः प्रमाणानि अनधिगततत्त्व
बोधः पौरुषेयो व्यवहारहेतुः प्रमा तत्करणं प्रमाणं विभागवचनं न्यूनाधिकसंख्याव्यवच्छेदार्थं तत्र सकलप्रमाणमूलत्वात्प्रथमतः प्रत्यक्षं
लक्षयति इंद्रियेति अर्थस्येति समारोपितत्वं निषेधति तद्विषयेति बाह्यगोचरतया ज्ञानाकारगोचरत्वं निवारयति चित्तवृत्ति नोक्तानाकारस्य

ताः क्लिष्टाक्लिष्टाश्च पंचधा वृत्तयः ५ प्रमाणविपर्ययविकल्पनिद्रास्मृतयः तत्र प्रत्यक्षानुमानागमाः प्रमाणानि
इंद्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात्तद्विषया सामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृ
त्तिः प्रत्यक्षं प्रमाणं फलमविशिष्टः पौरुषेयः चित्तवृत्तिबोधः प्रतिसंवेदी पुरुष इत्युपरिष्टादुपपादयिष्यामः ॥७॥

बाह्यज्ञेयसंबंधं दर्शयति बाह्यवस्तूपरागादिति व्यवहितस्य तदुपरागे हेतुमाह इंद्रियप्रणाल्येति सामान्यविशेषतद्वत्त्व इत्यपरे वादिनः प्रतिपन्नास्त
न्निरासायाह सामान्यविशेषात्मन इति न तद्वत्ता किंतु तादात्म्यमर्थस्य एतच्चैकांता+लिकयेति सामान्यमात्रमर्थ इत्येके विशेषा एवेत्य× नम्यु
पगम इत्यात्र प्रतिपादयिष्यते अनुमानागमविषयात्प्रत्यक्षविषयं व्यवच्छिनत्ति ॥ विशेषावधारणप्रधानेति यद्यपि सामान्यमपि प्रत्यक्षे प्रति
भाति तेन तथापि विशेषं प्रत्युपसर्जनीभूतमित्यर्थः एतच्च साक्षात्कारोपलक्षणपरं तथा च विवेकख्यातिरपि लक्षिता भवति फलविप्रति
पत्तिं निराकरोति फलं पौरुषेयश्चित्तवृत्तिबोध इति ननु पुरुषवर्ती बोधः कथं चित्तगतायाः वृत्तेः फलं न हि खदिरगोचरव्यापारेण परशुना पलाशे
छिदा क्रियते इत्यत आह अविशिष्ट इति न हि पुरुषगतो बोधो जन्यते अपि तु चैतन्यमेव बुद्धिदर्पणप्रतिबिंबितं बुद्धिवृत्त्या अर्थाकारया तदाकार
तामापद्यमानं फलं तच्चैतन्याभूतं बुद्धेरविशिष्टं बुध्यात्मकं वृत्त्या बुध्यालिकेति सामानाधिकरण्याद्युक्तः प्रमाणफलभाव इत्यर्थः एतच्चोपपादयिष्याम इति हेरंब

७

प्रसक्तानंतरं प्रयत्सादि लिंगकथ्योतबुध्यानुमानप्रभवसंसंवंधदर्शनसमुत्पन्नतयागमस्यानुमानजत्वादनुमितस्य चागमेनाप्याख्यानाद्‌
गमात्प्रागनुमानं लक्षयति अनुमेयस्येति जिज्ञासित धर्म्मविशिष्टो धर्म्म्यनुमेयस्तस्य तत्तुल्यत्वं तीपाः साध्यधर्मसामान्येन समानार्थः सपक्षास्ते
षु नुवृत्तइत्यनेन विरुद्धत्वमसाधारणत्वं च साधनधर्मस्य निराकरोति भिन्नजातियाऽसपक्षास्तेभ्यश्च सपक्षादन्येन द्विरुद्धास्तदभाववंतस्त्र॥
तेभ्यो व्यावृत्तस्तदनेनसाधारणानैकांतिकत्वमपाकरोति संबध्यतइति संबद्धो लिंगं अनेन पक्षधर्मतां दर्शयन्नसिद्धतां निवारयति तद्विष
यातात्। निबंधनाधिगमः बंधनइत्यस्मात् द्विवचनपदस्यत्तेः सामान्यवधारणेतिप्रत्यक्षविषयाद्वावच्छिन्नविषसंवंधसंवेदनाधानजमानुमानं विशे
षसंवंधग्रहणाभावेन सामान्यमेव सकरसंवंधग्रहणं गोचरयती तिउदाहरणमाह यथेति चोहेत्वर्थे विंध्योगतिर्यतस्तस्मात्तस्याप्राप्तिरतोऽग

अनुमेयस्यतत्तुल्यजातीये प्रवृत्तो भिन्नजातीयेभ्यो व्यावृत्तः संवंधोयः तद्विषयासामान्यावधारणप्रधानावृत्तिरनुशयथा दृष्टां
तरप्राप्तेगतिमचंद्रतारकंचैत्रवत् विंध्यस्त्राप्राप्तिरगतिः आप्तेनदृष्टोनुमितोवार्थः परत्रस्वबोधसंक्रांतये शब्देनोपदिश्यते यावृत्तदर्थ
विषयावृत्तिरागमः यस्याश्रद्धेयार्थो वक्ता नदृष्टानुमितार्थः स नागमः ज्ञवतेमूलवक्त्रादिनदृष्टानुमितार्थोतिर्विप्लवस्याद् द्वि॥२५॥

त्तिनिवृत्तौप्राप्ते निवृत्तिर्दर्शनात्तत्प्राप्तेर्गतिमच्चंद्रतारकं चैत्रवदिति सिद्धं आगमस्यलक्षणमाह आप्तेनेति तत्त्वदर्शनकारुण्यकरणपाटवाभिसं
वंधआप्तिस्तयावर्त्ततइत्याप्तस्तेन दृष्टोनुमितोवार्थः श्रुतस्य दृष्टयागतनुयादानंतस्यदृष्टानुमितमूलत्वेन तौप्यामेवव्यतिरेकार्थत्वात्॥ आप्तचित्रवर्तिना
त्मसहृत्यज्ञानस्यश्रोतचित्तेसमुत्पादः स्वबोधसंक्रांतिस्तस्यैअर्थयउपदिश्यते श्रोतहितप्राप्तिपरिहारोपायमप्रज्ञाप्यते शेषंसुगमं यस्यागमस्यो
श्रद्धेयार्थोवक्ता यथायात्मैवदशदाडिमानि तानि षडपूपाः भविष्यंतीतिनदृष्टानुमितार्था यथा चैत्र्यं वदेत स्वर्गकामइतिसआगमः मूलवतेमन्वे
वंमन्वादीनामप्यागमः नन्वंतनहितेपिदृष्टानुमितार्थाः यथाहुः यःकश्चित्कस्यचिद्धर्मोमनुनापरिकीर्त्तितः ससर्वोभिहितोवेदेसर्वज्ञानमयोहिसः

सतआकलवकलिलिमिकलवकलाहितेलेष ॥
रदृष्टानुमितार्थः ॥२५॥

पा॰टी॰ विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठं विपर्ययपद इति लक्ष्यनिर्देशो मिथ्याज्ञानमित्यादि लक्षणं । यत् ज्ञानप्रतिभासिरूपं तद्रूपाप्रतिष्ठमतद्रूपप्रतिष्ठं ॥ यथा
असत्याभोजीति अतः संशयोऽपि संगृहीतः एतावांस्तु विशेषः तत्र ज्ञानारूढैनाप्रतिष्ठता क्वचिंद्द्वारेक्ता बाधज्ञानेन नन्वेवं विकल्पोऽपि तद्रूपाप्रति-
८ ष्ठानाद्विचारतो विपर्ययः प्रसज्येतेत्यत आह मिथ्यानमिति अनेन हि सर्वजनानामनुभवसिद्धो बाध उक्तः स चास्ति विपर्ययेन तु विकल्पे तेन व्यवहा-
रानुपातिरूपाणामेव तु विचारयतां तत्र बाधबुद्धिरिति चोदयति स कस्मान्न प्रमाणं नोत्तरेणोपजातविरोधिना ज्ञानेन पूर्वं बाध्यतेऽपितु पूर्वेणै-

विपर्ययो मिथ्यानमतद्रूपप्रतिष्ठं स कस्मान्न प्रमाणं यतः प्रमाणेन बाध्यते भूतार्थविषयत्वात्प्रमाणस्य ॥८॥

वप्रथममुपजातेनानुपजातविरोधिना परमिति भावः परिहरति यतः प्रमाणेनेति । यत्र हि पूर्वापेक्षापरोत्पत्तिस्तत्रैवं इह तु स्वकारणाद्युत्पन्नयो-
न्यानपेक्षे ज्ञाने जायमाने नोत्तरस्य पूर्वमनुपमृद्योदयमनासादयत स्तदुदयबाधामेवोदयो न तु पूर्वस्योत्तरबाधात्मा तस्य तदानीमप्रसक्तेस्त- हेरंब
स्मादनुपजातविरोधिना बाध्यत्वे हि उपजातविरोधिनाच बाधकत्वे तस्माद्भूतार्थविषयत्वात्प्रमाणेनाप्रमाणस्य बाधनं सिद्धं ॥८॥ ८

उदाहरणमाह तत्रप्रमाणेनेति अस्यकुत्सितत्वं स्तनाय दर्शयति सेयंपंचपर्वेति अविद्यासामान्यमविद्यास्मितादिषु पंचसु पर्वस्वित्यर्थः अव्यक्त
महदहंकारपंचतन्मात्रेष्वष्टस्वनात्मस्वात्मबुद्धिरविद्यातमः एवं योगिनामष्टस्वणिमादिके चैश्वर्येष्वश्रेयः सुश्रेयोबुद्धिरष्टविधो मोहः सर्वस्माज्ज
घन्यः सत्वास्मितोच्यते। तथा योगिनाष्टविधमैश्वर्यमुपादाय सिद्धो भूत्वा दृष्टानुश्रविकान् शब्दादीन् दशविषयान् भोक्ष्ये इत्येवमात्मिका प्रतिप

॥ तत्रप्रमाणेनबाधनमप्रमाणस्य दृष्टं तद्यथा द्विचंद्रदर्शनं सद्विषयेणैकचंद्रदर्शनेन बाध्यते॥ ॥
॥ ति सेयं पंचपर्वा भवत्यविद्या अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशा इति एत एव स्व॥ ॥
॥ संज्ञाभिस्तमो मोहो महामोहस्तामिस्रो ह्यंधतामिस्र इति एते चित्तमलप्रसंगेनाभिधास्यंते॥ ८॥

त्तैर्महामोहो रागः एवमेतेनैवाभिसंधिना प्रवर्तमानस्य केनचित्प्रतिबद्धस्याणिमाद्यनुत्पत्तौ नान्निबंधनस्य दृष्टानुश्रविकविषयोपभोगस्या
सिद्धे। तत्प्रतिबंधकविषयः क्रोधः स तामिस्राख्यो द्वेष एवमणिमादिगुणसंपत्तौ दृष्टानुश्रविकविषयप्रत्यक्षयस्थानेच्छकल्पांतेसर्वमेतन्नं
क्ष्यतीति यस्त्रासः सोभिनिवेशोंधतामिस्रः तदुक्तं भेदस्तमसोष्टविधो मोहस्य च दशविधो महामोहः तामिस्रोष्टादशधा तथा भवत्यंधतामिस्र इति ॥ ८॥

पा॰टी॰ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ननु शब्दज्ञानानुपाती चेदागमप्रमाणांतर्गतो विकल्पः प्रसज्येत निर्वस्तुकत्वेन विपर्ययः स्यादि-
त्यत आह सन्निति एतदुक्तं भवति केचिदभेदे भेदमारोपयति केचित्तु भिन्नानामभेदं ततो भेदस्यानप्रमाणाविपर्ययांतर्गतः कस्मात्तद्यतो व-
२ स्तुशून्यत्वेपि प्रमाणांतर्गतिं निषेधति शब्दज्ञानमाहात्म्यनिबंधनइति विपर्ययांतर्गतिं एतदुक्तं भवति कचिदभेदे भेदमारोपयति

शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः स न प्रमाणोपारोही न विपर्ययोपारोही वस्तुशून्यत्वेपि श-
ब्दज्ञानमाहात्म्यनिबंधनो व्यवहारो दृश्यते तद्यथा चैतन्यं पुरुषस्य स्वरूपमिति यदा चितिरेव
पुरुषस्तदा किमत्र केन व्यपदिश्यते भवति च व्यपदेशे वृत्तिः यथा चैत्रस्य गौरिति ॥ ९ ॥

केचित्तु नाभिन्नानामभेदं ततो भेदस्याभेदस्य च वस्तुनो भावात्तदाभासो विकल्पो न प्रमाणं नापि विपर्ययो व्यवहाराविसंवादादिति शास्त्रप्रसि-
द्धमुदाहरणमाह तद्यथेति किं विशेष्यं केन व्यपदिश्यते विशेष्यतेनाभेदेपि विशेषणविशेष्यभावो न हि गवाश्वौ विशेष्यते किंतु भिन्नेन चैत्रेण तद्दिदमाह
भवति च व्यपदेशो वृत्तिः व्यपदेश्यव्यपदेशयोर्भावो व्यपदेशः विशेषणविशेष्यभावइति यावत् तस्मिन्वृत्तिर्वाचकस्य यथा चैत्रस्य चैत्रस्य गौ

शास्त्रीयमेवोदाहरणं नरं समुच्छिनोति तथेति। प्रतिषिद्धो वस्तुनः पृथिव्यादेर्धर्मस्ततः परिस्पंदो यस्य स तथोक्तः को सौ निःक्रियः पुरुषः स्वेनैव तु सांख्यी
येराख्याते अभावो नाम कश्चिदस्ति धर्मो येन पुरुषो विशेष्येतेत्यर्थः क्वचित्स्यात् प्रतिषिद्धवस्तुधर्मो इति तस्यार्थः प्रतिषेधव्याख्यानाः प्रतिषि
द्धानवस्तुधर्मो णांतध्याप्यता भावाभावयोरसंबंधात् अथ च तथा प्रतीतिरिति लौकिकमुदाहरणमाह तिष्ठतीत्याणादिति यथा हि पचतीति
ह्यत्र पूर्वापरीभूतः कर्मक्षणप्रचयैकफलावच्छिन्नः प्रतीयते एवं तिष्ठतीत्यत्रापि पूर्वापरीभावमेवाह स्थास्यति स्थितइति ननु भवतु

तथा प्रतिषिद्धवस्तुधर्मा निःक्रियः पुरुषः तिष्ठति बाणः स्थास्यति स्थित इति गतिनिवृत्तौ धात्व
र्थमात्रं गम्यते तथानुत्पत्तिधर्मा पुरुष इति उत्प[redacted]त्ति धर्मस्याभावमात्रमवगम्यते॥
न पुरुषान्वयी धर्मः तस्माद्विकल्पितः स धर्मस्तेन चास्तीति व्यवहार इति॥११॥ ॥ ॥

पाकवत् पाकवत् पूर्वापरीभूतपाकस्थानक्रियया वा लभिन्नया वा एतस्य व्यपदेशः स तत आह गतिनिवृत्तौ धात्वर्थमात्रं गम्यते गति
निवृत्तिरेव तावत्कल्पिता तस्या अपि भावरूपत्वं तत्रापि पूर्वापरीभाव इत्यहो कल्पनायाः परंपरेत्यर्थः अभावः कल्पितो भावनवद्वा
नुगत इव सर्वपुरुषेषु गम्यते न पुनः पुरुषव्यतिरिक्तो धर्मः कश्चित् कश्चिदित्युदाहरणांतरमाह तथानुत्पत्तिधर्मेति यथाणवि
पीपास्यामममन्यानविकल्पवृत्तिरिति वादितो बहवः प्रविचिपेदिरे तथा तिनो धनयोदाहरण अयं चन्द्र इति मंतव्यं॥१२॥ ।

पा॰टी॰ अभावप्रत्ययालंबना वृत्तिर्निद्रा। अधिकृते हि वृत्तिपदमनुवादकं प्रमाणविपर्ययविकल्पस्मृतीनां वृत्तित्वे सर्वप्रतिपरीक्षकाणामविप्रतिपत्तेरनूद्यते
विशेषविधानाय निद्रायां तु वृत्तित्वे परीक्षकाणामस्ति विप्रतिपत्तिरिति वृत्तित्वं विधेयं न च प्रकृतमनुवादकं विधानाय कल्पत इति पुनर्वृत्तिग्रहणं जा
१० ग्रत्स्वप्नवृत्ती नाम भावस्तस्य प्रत्ययः कारणं बुद्धिसत्त्वाच्छादकं तमस्तदेवालंबनं विषयो यस्याः सा तथोक्ता वृत्तिर्निद्रा बुद्धिसत्त्वे हि त्रिगुणे यदा
सत्त्वरजसी अभिभूय समस्तकरणावरकमाविरस्ति तमस्तदा बुद्धेर्विषयाकारपरिणामाभावादुद्भूततमोमयीं बुद्धिमनुबुध्यमानः पुरुषः
सुषुप्तोंतःसंज्ञ इत्युच्यते कस्मात्पुनर्निरुद्धैवत्वं योगिवदस्याभाव एव न निद्रेत्यत आह सा च संबोधे प्रत्यवमर्शात् सोपपत्तिकात्

अभावप्रत्ययालंबना वृत्तिर्निद्रा। सा च संप्रबोधे प्रत्यवमर्शात् प्रत्ययविशेषः कथं सुखमहमस्वाप्सं प्रसन्नं मे मनः प्रज्ञां मे वि
शारदीकरोति दुःखमहमस्वाप्सं स्त्यानं मे मनो भ्रमत्यनवस्थितं गाढं मूढोहमस्वाप्सं गुरूणि मे गात्राणि क्लांतं मे चित्तं
अलसं मुषितमिव तिष्ठतीति स खल्वयं प्रबुद्धस्य प्रत्यवमर्शो न स्यादसति प्रत्ययानुभवे तदाश्रिताः स्मृतयश्च तद्विषया न स्युः
तस्मात्प्रत्ययविशेषो निद्रा सा च समाधावितरप्रत्ययवन्निरोद्धव्येति ॥१॥ १०॥ ॥ ॥ ॥ ॥ ॥

स्मरणात् प्रत्ययविशेषः कथं यदा हि सत्त्वाविद्धं तम आविरस्ति तदेदृशः प्रत्यवमर्शः सुप्तोत्थितस्य भवति सुखमहमस्वाप्सं प्रसन्नं मे मनः प्रज्ञां
मे विशारदीकरोति स्वच्छीकरोतीति यदा तु रजःसचिवं तम आविरस्ति तदेदृशः प्रत्यवमर्शो दुःखमहमस्वाप्सं स्त्यानमकर्मण्यं मे मनः
कस्माद्यतो भ्रमत्यनवस्थितं निलीनमिति रजःसत्त्वे तमसा समुल्लासे स्वापे प्रबुद्धस्य प्रत्यवमर्शमाह गाढं मूढोहमस्वाप्सं गुरूणि मे गात्राणि
क्लांतं मे चित्तं अलसं मुषितं तिष्ठतीति सान्वयव्यतिरेके हेतुव्यतिरेकमाह स खल्वयमिति प्रबुद्धस्य प्रबुद्धमात्रस्य तदाश्रिताश्चेति बोधकाले
प्रत्ययानुभवे तत्स्वभावकारणानुभवरूपस्यार्थः नन्वप्रमाणादयो युक्ताश्चित्ताधिकरणाः निरोद्धुं तासां समाधिप्रतिपक्षत्वात् निद्रायाः कायवृत्तिम्
अनुत्पादयन्त्याः कथं समाधिप्रतिपक्षत्वमित्यत आह सा च समाधाविति एकाग्रानुत्पादितामसत्वेन सबीजनिर्बीजसमाधिप्रतिपक्षत्वमिति हेरंबू
१०

अनुभूतविषयाऽसंप्रमोषः स्मृतिः प्रमाणादिभिरनुभूते विषये योऽसंप्रमोषोऽस्तेयः सा स्मृतिः संस्कारमात्रजन्यस्य हि ज्ञानस्य संस्कारकारणानुभवाव
भासितो विषयः आत्मीयस्तदधिकविषयपरिग्रहस्तु संप्रमोषः स्तेयः कस्मात् सादृश्यात् मुष स्तेय इत्यस्मात् प्रमोषपदव्युत्पत्तेः एतदुक्तं भवति स
र्वे प्रमाणादयो नाधिगतमर्थं सामान्यतः प्रकारतो वाऽधिगमयन्ति स्मृतिः पुनर्न पूर्वानुभवमर्यादामतिक्रामति तद्विषया तदूनविषया वा न

अनुभूतविषयासंप्रमोषः स्मृतिः। किं प्रत्ययस्य चित्तं स्मरति आहोस्वित् विषयस्येति
ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासः तथाजातीयकं संस्कारमारभते
स संस्कारः स्वव्यंजकांजनः तदाकारामेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति॥११॥

नु तदधिकविषयासौ यं च त्वेतराद्विशेषः स्मृतेरिति विमृशति किं प्रत्ययस्येति ग्राह्यप्रवणत्वादनुभवस्यानभ्यासाभावात्तज्जः संस्कारो ग्राह्य
मेव स्मारयतीति भाति अनुभवमात्रजनितत्वाच्चानुभवमेवेति विमृशन्नपि पक्षं गृह्णाति उभयस्मरणमवधारयति ग्राह्योपरक्त। परमार्थतस्तु ग्रा
ह्योपरक्तः परमार्थतस्तु ग्राह्यग्रहणे एवोभयं तयोराकारं स्वरूपं निर्भासयति प्रकाशयति स्वव्यंजकं कारणमञ्जनमाकारो यस्य तथोक्तः स्वकारण

पा॰टी॰ ननु यदि कारणविचारेणा बुद्धिस्मरणयोः सारूप्यं कस्तर्हि भेद इत्यत आह तत्र ग्राह्येति ग्रहणमुपादानं न च गृहीतस्योपादानं संभवति
तदनेनानधिगतबोधनं बुद्धिरित्युक्तं ग्रहणाकारेति ग्रहणरूपं पूर्वं प्रधानं यस्याः सा तथोक्ता विकल्पितश्चायं भेदः विरुद्ध ग्रहणे गुणप्रधान
११ भाव इति ग्राह्याकारः पूर्वः प्रथमो यस्याः सा तथोक्ता इदमेव च ग्राह्याकारस्य ग्राह्यस्य पूर्वत्वं यद्धस्तेतरविषयीकृतत्वमर्थस्य तद्धेनेन बसेभ्
विषयीकृतगोचरा स्मृतिरित्युक्तं भवति सोयमसंप्रमोष इति नन्वस्ति स्मृतेरपि प्रमोषः दर्शयति पित्रादेरतीतस्य देशकालांतरानुभूतचरदे

तत्र ग्रहणाकारपूर्वा बुद्धिः ग्राह्याकारपूर्वा स्मृतिः सा च द्वयी भावितस्मर्त्तव्याऽभावितस्मर्तव्या च स्वप्ने भावितस्मर्त्तव्या
जाग्रत्समये त्वभावितस्मर्त्तव्येति सर्वाश्चैताः स्मृतयः प्रमाणविपर्ययविकल्पनिद्रास्मृतीनामनुभवात्प्रभवं
ति सर्वाश्चैता वृत्तयः सुखदुःखमोहात्मिकाः सुखदुःखमोहाश्च क्लेशेषु व्याख्येयाः सुखानुशयी रागः दुःखा
नुशयी द्वेषः मोहः पुनरविद्येति एताः सर्वा वृत्तयो निरोद्धव्याः आसां निरोधे संप्रज्ञातो वा समाधिर्भवति असंप्रज्ञातो वा इति ।११॥

शकालांतरसंबंधस्य भ्रंश इत्यत आह सा च द्वयीति भावितः कल्पितः स्मर्तव्यो यया सा तथोक्ता अभावितोऽकल्पितः पारमार्थिक इति यावत्
ननु यं स्मृतिर्न विपर्ययस्तत्कथं स्वप्नोपपन्नता तु स्मृत्याभासतया तु स्मृतिरुक्ता प्रमाणाभासमिव प्रमाणमिति भावः कस्मात्पुनरंते स्मृतेः क
थ्या सा इत्यत आह सर्वाः स्मृतय इति अनुभवः प्राप्तिः प्राप्तिपूर्वा वृत्तिः स्मृतिः ततः स्मृतीनामुपजननादेष सर्गः ननु ये एकरूप क्लिष्टेति तेनि
रोद्धव्याः प्रेक्षावतां क्लेशप्राधान्यं च वृत्तयस्तत्किमर्थमासां निरोध इत्यत आह सर्वाश्चैता इति सुगमं ।११॥ ॥श्रीरामायानमः॥ हरेद्र
११

निरोधोपायं पृच्छति अथैनेन सूत्रेणोत्तरमाह अभ्यासवैराग्याभ्यां तन्निरोधः अभ्यासवैराग्ययोर्निरोधेन न चित्तस्य अवांतरव्यापारभेदेन सम्यक् च्युपोत्तनु कल्प
इत्याह चित्तनदीति प्राग्भार४ प्रबंधः निम्नता गंभीरता अगाधतेति यावत् तत्राभ्यासस्य स्वरूपप्रयोजने अभ्यासलक्षणमाह तत्र स्थितौ यत्नोऽभ्यासः तत्र द्वयोश्च चरे चित्तस्य च निरूप्य
राजसतामसवृत्तिरहितस्य प्रशांतवाहिता विमलता सात्त्विकवृत्तिवाहितैकाग्रता स्थितिः तदर्थ इति स्थिताविति निमित्तसप्तमी व्याख्याता यथा चर्मणि द्वीपिनं हंतीति प्रय
त्नमेव पर्यायाभ्यां विशदयति वीर्यमुत्साह इति तस्येच्छायोनितामाह तत्संपिपादयिषयेति तदिति स्थितिपरामर्शः प्रयत्नस्य विषयमाह तत्साधनेति स्थितिसाधनान्यंतरं

अथासां निरोधे क उपाय इति ॥११॥ अभ्यासवैराग्याभ्यां तन्निरोधः चित्तनदी नामोभयतोवाहिनी वहति कल्याणाय वहति पापाय च या तु कैवल्यप्राग्भारा [illegible]
विवेकविषयनिम्ना सा कल्याणवहा संसारप्राग्भारा अविवेकविषयनिम्ना पापवहा तत्र वैराग्येण विषयस्रोतः खिलीक्रियते विवेकदर्शनाभ्यासेन विवेकस्रोत उद्
घाट्यते इत्युभयाधीनश्चित्तवृत्तिनिरोधः ॥१२॥ तत्र स्थितौ यत्नोऽभ्यासः चित्तस्यावृत्तिकस्य प्रशांतवाहिता स्थितिः तदर्थः प्रयत्नो वीर्यमुत्साह४ तत्संपि
पादयिषया तत्साधनानुष्ठानमभ्यासः ॥१३॥ स तु दीर्घकालनैरंतर्यसत्कारासेवितो दृढभूमिः दीर्घकालासेवितः निरंतरासेवितः तपसा ब्रह्मच
र्येण विद्यया श्रद्धया च संपादितः सत्कारवान् दृढभूमिर्भवति व्युत्थानसंस्कारेण द्रागित्येवानभिभूतविषय इत्यर्थः ॥१४॥२३॥ ॥ ॥ ॥

गवर्हिरंगानियमनियमादीनि साधनगोचरः कर्तृव्यापारो न फलगोचर इति ननु व्युत्थानसंस्कारेणानादिना परिपंथिना प्रतिबद्धोऽभ्यासः कथं स्थित्यै कल्पत इ
त्यत आह स तु दीर्घकालनैरंतर्यसत्कारासेवितो दृढभूमिः सोऽयमभ्यासो विशेषणत्रयसंपन्नः सन् दृढभूमिः स्थिरो न सहसा व्युत्थानसंस्कारैरभिभूतस्थितिरूपविष
यो भवति यदि पुनरेवंभूतमप्यभ्यासं कृत्वोपरमेत्ततः कालपरिवसिनाभिभूयेतेतस्यान्नोपरंतव्यमिति भावः ॥२३॥ ॥ रामायनमः श्रीराम॥ राम॥ ॥

वैराग्यमाह दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यं चेतनाचेतनेषु दृष्टविषयेषु वितृष्णस्य स्त्रियः अन्नपानमैश्वर्यमाधिपत्यं अनुश्रवो वेदस्ततो धिग
पा.टी. तोमानुश्रविकाः स्वर्गादिषु तत्रापि वैतृष्ण्यमाह स्वर्गेति देहरहिता विदेहाः करलेवुली नास्ते षांभावो वैदेह्यं अन्ये तु प्रकृतिमेवात्मनमभिमन्यमानाः प्रकृत्युपास
१२ काः प्रकृतौ साधिकारायामेव लीनास्ते षांभावः प्रकृतिलयत्वं तत्प्राप्ति विषये आनुश्रविके विषये वितृष्णस्य आनुश्रविक विषये वितृष्णस्य आनुश्रविकविषये वितृष्णो हि स्वर्गा
दिप्राप्तिविषये वितृष्ण उच्यते ननु यदि वैतृष्ण्यमात्रं वैराग्यं हेतुविषयाप्राप्तावपि तद्दृष्टौ वैराग्यं स्यादित्यत आह दिव्यादिव्ये ति नवैतृष्ण्यमात्रं वैराग्यं अपितु दिव्या
दिव्यविषयसंप्रयोगेपि चित्तस्याभोगात्मिका तामेव स्पष्टयति हेयोपादेयशून्या आसंग द्वेषरहिता उपेक्षा बुद्धिर्वशीकारसंज्ञा कुतः पुनरियमित्यत्राह प्रसं

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यं स्त्रियोन्नपानमैश्वर्यमिति दृष्टविषये वितृष्णस्य स्वर्गवैदेह्यप्रकृतिलयत्वप्रा
प्त्यावानुश्रविकविषये वितृष्णस्य दिव्यादिव्यविषयसंप्रयोगेपि चित्तस्य विषयदोषदर्शिनः प्रसंख्यानबलादनाभोगात्मिका हेयोपा
देयशून्या वशीकारसंज्ञा वैराग्यं ॥१५॥ ॥

ख्यानबलादिति तापत्रयपरीतता विषयाणां दोषस्तत्परिभावनया तत्साक्षात्कारः प्रसंख्यानं तद्बलादित्यर्थः यतमानसंज्ञा एकेंद्रियसंज्ञा वशीका
रसंज्ञा चेति चेतसः संताइस्मागादिभिनः रागादयः खलु कषायाश्चित्तवर्त्तिनस्तैरिंद्रियाणि यथास्वं विषयेषु प्रवर्त्तंते तन्मा प्रवर्त्तिषतेंद्रियाणि तत्तद्विष
येष्विति तत्परिपाचनायारंभः प्रयत्नः सा यतमानसंज्ञा तदारंभे सति केचित्कषायाः पक्वाः पच्यंते पक्ष्यंते च केचन वितृ तत्र पक्ष्यमाणेभ्यः पक्वा
नां व्यतिरेकावधारणं व्यतिरेकसंज्ञा इंद्रियप्रवर्त्तनासमर्थतया पक्वानामौत्सुक्यमात्रेण मनसि व्यवस्थानमेकेंद्रियसंज्ञा औत्सुक्यमात्रस्यापि निवृत्तिरुप हेरंबू
स्थितेष्वपि दिव्यादिव्यविषयेषूपेक्षाबुद्धिः संज्ञात्रयात्परा वशीकारसंज्ञा एतयैव च पूर्वासां चरितार्थत्वान्न ताः पृथगुक्ता इति सर्वमवदातं ॥१५॥ ॥ ॥ १२

अपरं वैराग्यमुक्त्वा परमाह ॥ तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं अपरवैराग्यस्य परं वैराग्यं प्रति कारणत्वं तत्र च द्वारमादर्शयति दृष्टानुश्रविकविषयदोषदर्शी वि
रक्त इति अनेनापरं वैराग्यं प्रदर्शितं ॥ पुरुषदर्शनाभ्यासादागमानुमानाचार्योपदेशसमधिगतस्य पुरुषस्य दर्शनं तस्याभ्यासः पौनःपुन्येन निषेवणं तस्मात्सद्दर्शन
स्यरक्ष शुद्धिरजस्तमःपरिहा एषा सत्वैकतानता तयायो गुणपुरुषयोः प्रकर्षेण विवेकः पुरुषः शुद्धोऽनंतस्तद्विपरीता गुणा इति तेनाप्यायिता बुद्धिर्यस्य योगि
नः स तथोक्तः तदनेन धर्ममेघाख्यः समाधिरुक्तः स तथाभूतो योगी गुणेभ्यो व्यक्ताव्यक्तधर्मकेभ्यः सर्वथा विरक्तः सत्वपुरुषान्यताख्यातावपि गुणात्मिका

तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं दृष्टानुश्रविकविषयदोषदर्शी विरक्तः पुरुषदर्शनाभ्यासात्तच्छुद्धिप्रविवेका
प्यायितबुद्धिः गुणेभ्यो व्यक्ताव्यक्तधर्मकेभ्यो विरक्त इति तद्द्वयं वैराग्यं तत्र यदुत्तरं तत्ज्ञानप्रसादमात्रं ॥२५॥

यां तावद्विरक्त इति तत्तस्मात् द्वयं वैराग्यं सत्वसमुद्रेकविधूततमसि रजःकणकलंकसंपृक्ते चित्तसत्वे तत्र तौरिको नाम विषयानां तेन हि नैव प्र
कृतिलया बभूवुः यथोक्तं वैराग्यात्प्रकृतिलय इति तत्र तयोर्द्वयोर्मध्ये यदुत्तरं तत्ज्ञानप्रसादमात्रं मात्रग्रहणेन निर्विषयतां सूचयति तदेव हि तादृशं चित्त
सत्वं रजोलेशमलेनाप्यपरामृष्टमस्याप: अत एव ज्ञानप्रसाद इत्युच्यते चित्तसत्वं हि प्रसादस्वभावमपि रजस्तमःसंपर्कान्मलिनतामनुभवति ॥
वैराग्याभ्यासविमलवारिधाराधौतसमस्तरजस्तमोमलमतिप्रसन्नं तानप्रसादमात्रपरिशेषं भवति ॥२५॥ ॥ ॥श्रीरामायनमः॥

पा॰टी॰ तस्य गुणानुपादेयत्वाय दर्शयति यस्योदयेसति योगीप्रत्युदितख्यातिः ख्यातिविशेषे सति वर्त्तमानख्यातिमानि सर्पे प्रापणीयं कैवल्यं प्राप्तं यथावस्थिति॥
जीवन्नेव विद्वान्मुक्तो भवतीति संस्कारमात्रस्य छिन्नमूलस्य सिद्धादिति भावः कुतः प्राप्तं यतः क्षीणाः क्षेतव्याः क्लेशा अविद्यादयः सवासनाः न चास्ति धर्मो
१३ समूहोपत्वस्य जन्ममरणप्रबंधस्य संक्रमः प्राणिनां तत्र॥ कुतः कैवल्यमित्यत आह छिन्नइति क्लिष्टानि निःसंधानि पर्वाणि यस्य स तथोक्तः धर्माधर्मसमूह

यस्योदयप्रत्युदितख्यातिरेवं मन्यते प्राप्तं प्रापणीयं क्षीणाः क्षेतव्याः क्लेशाः छिन्नः श्लिष्टप
र्वा भवसंक्रमो यस्याविच्छेदाज्जनित्वा म्रियते मृत्वा च जायत इति ज्ञानस्यैव परा काष्ठा वै
राग्यं एतस्यैव हि नांतरीयकं कैवल्यमिति॥२६॥ ॥ ॥ ॥ ॥ ॥

स्यसमूहि नः पर्वाणि तानि श्लिष्टानि न हि जातु जंतुर्मरणजन्मप्रबंधेन त्यज्यते सोयं भवसंक्रमः क्लेशक्षये विच्छिन्नः यथा चवक्ष्यति क्लेशसमू
लः कर्माशयः स तन्निर्मूले तद्विपाक इति ननु प्रसंख्यानपरिपाके धर्ममेघे च निरोधमंतराकिंतदस्ति यत् ज्ञानप्रसादमात्रमित्यत आह ज्ञानस्यैवे
ति धर्ममेघभेद एव परं वैराग्यं नान्यत् यथा वक्ष्यति प्रसंख्यानेप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिस्तदा सर्वावरणमलापेत हेरंब
स्य ज्ञानस्यानंत्याज्ज्ञेयमल्पमिति च तस्मादेतस्य हि नांतरीयकमविनाभावि कैवल्यमिति॥२६॥ ॥ ॥ ॥ ॥ ॥ १३

उपायमभिधाय सप्रकारोपेयकथनायप्रवृत्ति ॥ अथोपायद्वयेनेति वितर्कविचारानंदास्मितारूपानुगमात्संप्रज्ञातः संप्रज्ञातपूर्वकत्वादसंप्रज्ञातस्य प्रथमं संप्रज्ञातोपवर्णनं संप्रज्ञातं सामान्यं वितर्कविचारानंदास्मितानां रूपैः स्वरूपैरनुगमात्प्रतिपत्तव्यं वितर्कं विवृणोति चित्तस्येति स्वरूपसाक्षात्कारवती प्रज्ञा आभोगः स च स्थूलविषयत्वात्स्थूलः यथा हि प्राथमिको धानुष्कः स्थूलमेव लक्ष्यं विध्यत्यथ सूक्ष्मं एवं प्राथमिको योगी स्थूलमेव पाञ्चभौतिकं चतुर्भुजादि ध्येयं साक्षात्करोत्यथ सूक्ष्ममिति एवं चित्तस्यालंबने सूक्ष्म आभोगः स्थूलकारणभूतसूक्ष्मपंचतन्मात्रलिंगालिंगविषयो विचारः तदेव ग्राह्यविषयं दर्शयित्वा ग्रहणविषयं दर्शयति आनंद इति इंद्रिये स्थूल आलंबने चित्तस्याभोगो ह्लादोपः स आनंदः प्रकाशशीलतया सत्त्व

अथोपायद्वयेन निरुद्धवृत्तेः कथमुच्यते संप्रज्ञातः समाधिरिति ॥१७॥ वितर्कविचारानंदास्मितारूपानुगमात्संप्रज्ञातः वितर्कः चित्तस्यालंबने स्थूल आभोगः सूक्ष्मो विचारः आनंदो ह्लादः एकात्मिका संविदस्मिता तत्र प्रथमश्चतुष्टयानुगतः समाधिः सवितर्कः द्वितीयो वितर्कविकलः सविचारः तृतीयो विचारविकलः सानंदः चतुर्थस्तद्विकलः अस्मितामात्र इति सर्व एते सालंबनाः समाधयः ॥१७॥

त्त्वप्रधानादहंकारादिंद्रियाणुत्पत्तेः सत्त्वं सुखमिति तान्यपि सुखानीति तस्मिन्नाभोगे ह्लाद इति ॥ ग्रहीतृविषयं संप्रज्ञातमाह एकात्मिका संविदस्मिता प्रभवाणींद्रियाणि तेनैषामस्मितासूक्ष्मं रूपं साचात्मना ग्रहीत्रा सह बुद्धिरेकात्मिका संविदिति तस्यां चाग्रहोतुरंतर्भावाद्भवति ग्रहीतृविषयः संप्रज्ञात इति चतुर्णामपरस्परमप्यवांतरविशेषमाह तत्र प्रथम इति कार्यं कारणानुप्रविष्टं न कारणं कार्येण तदयं स्थूल आभोगः स्थूलसूक्ष्मेंद्रियास्मिता कारणचतुष्टयानुगतो भवति उत्तरे तु त्रिद्व्येककारणका द्विद्व्येकरूपा भवंति असंप्रज्ञातान्निर्गतिः सर्व एत इति ॥१७॥ ॥ राम ॥ ॥

पा॰टी॰ कमप्राप्तमसंप्रज्ञातमवतारयितुं पृच्छति अथेति विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः पूर्वपदेनोपायकथनमुत्तराभ्यां च स्वरूपकथनम् आद्यमेव पदं विवृणोति स
१८ र्ववृत्तीति आद्यमपदं व्याचष्टे तस्य परमिति विरामो वृत्तीनामभावस्तस्य प्रत्ययः कारणं तस्याभ्यासस्तदनुष्ठानं पौनःपुन्यं तदेव पूर्वं यस्य स तथा अथ परं वैरा
ग्यं निरोधकारणं कस्मान्न भवतीत्यत आह सालंबनो हीति कार्यसरूपं कारणं युज्यते न विरूपं विरूपं चापरं वैराग्यं सालंबनं निरालंबनं समाधिनाका
र्येण तस्मान्निरालंबनाद्वैराग्यात् प्रसादमात्रात्तस्योत्पत्तिर्युक्ता धर्ममेघसमाधेरेव हि नितांतविगलितरजस्तमोमलत्वबुद्धिसत्वाउपजायमानस्तद्विषयानिरू

अथासंप्रज्ञातः समाधिः किमुपायः किंस्वभाव इति १८ विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः सर्ववृत्तिप्रत्यस्तमये संस्कारशेषो निरोधश्चि
त्तस्य समाधिरसंप्रज्ञातः तस्य परं वैराग्यमुपायः सालंबनो ह्यभ्यासस्तत्साधनाय न कल्पत इति विरामप्रत्ययो निर्वस्तुक आलंबनी क्रियते स चार्थ
शून्यः तदभ्यासपूर्वकं चित्तं निरालंबनमभावप्राप्तमिव भवतीत्येष निर्बीजः समाधिरसंप्रज्ञातः स खल्वयं द्विविध उपायप्रत्ययो भवप्रत्ययश्च तत्रोपायप्रत्ययो

येणावर्ज्यमानो नंतो विषयावद्यदर्शी समस्तविषयपरित्यागात्स्वरूपप्रतिष्ठः सन्निरालंबनः संस्कारमात्रशेषस्य निरालंबनस्य समाधेः कारणमुपपद्यते साक्ष
ब्यादिति आलंबनीकरणमाश्रयणमभावप्राप्तमिव वृत्तिरूपकार्याकरणात् निर्बीजो निरालंबनः अथवाबीजं क्लेशाः कर्माशयाश्च ते निःक्रांताः यस्मात्स तथा निरोधसमा
धेरवांतरभेदं द्वैविध्यमादर्शयति स खल्वयं निरोधसमाधिर्द्विविधः उपायप्रत्ययो भवप्रत्ययश्च उपायो वक्ष्यमाणः श्रद्धादिः प्रत्ययः कारणं यस्य निरोधसमा
धेः स तथा योगिनः भवंति जायंते अस्यामिति भवो विद्या भूतेंद्रियेषु वा विकारेषु प्रकृति पुरुषाव्यक्तमहदहंकारपंचतन्मात्रेषु वा आत्मख्यात्या निरुक्तानां वैराग्य
संपन्नानां स खल्वयं भवः प्रत्ययः कारणं यस्य निरोधसमाधेः स भवप्रत्ययः तत्र तयोर्मध्ये उपायप्रत्ययो योगिनां मोक्षमाणानां भवति विशेषविधानेन शेषस्य

कथं तर्हि भवप्रत्यय इत्यत्र सूत्रेणोत्तरमाह भवप्रत्ययो विदेहप्रकृतिलयानां विदेहाश्चप्रकृतिलयाश्चतेषामिति समासार्थः तथाचवृद्धे विदेहानां देवानां भवप्रत्ययो भूतेंद्रि
याणामन्यतमदात्मत्वेनप्रतिपन्नास्तदुपासनयातदुपासनावासितांतःकरणाःपिंडपातानंतरमिंद्रियेषुभूतेषुवालीनाःसंस्कारमात्रावशेषमनसःषाट्कौशिकशरीरर
हिताविदेहास्तेस्वसंस्कारमात्रोपयोगेनचित्तेनकैवल्यपदमिवानुभवंतःप्राप्नुवंतःविदेहाअवृत्तिकत्वेनलयेनसारूप्यंसाधिकारसंस्कारशेषतयाचवैरूप्यंसं
स्कारमात्रोपभोगेनेतिकश्चित्साम्यःतस्यार्थःसंस्कारमात्रमेवोपभोगोयस्यनतुचित्तवृत्तिरित्यर्थःप्राप्तावधयःसंस्कारविपाकंतथाजातीयकमतिवाहयंत्य
तिक्रामंतिपुनरपिसंसारे विशंतितथाचवायुप्रोक्तं दशमन्वंतराणीहतिष्ठंतींद्रियचिंतकाःभौतिकास्वरालंपूर्णमितितथाप्रकृतिलयाश्चाव्यक्तमहदहंकार

भवप्रत्ययो विदेहप्रकृतिलयानां विदेहानां देवानां भवप्रत्ययः ते हि स्वसंस्कारमात्रोपयोगेनचि
त्तेनकैवल्यपदमिवानुभवंतःस्वसंस्कारविपाकंतथाजातियकमतितथाप्रकृतिलयाःसाधिका
रेचेतसिप्रकृतिलीनेकैवल्यपदमिवानुभवंतियावन्नपुनरावर्त्तते अधिकारवशाच्चितमिति॥१।१९॥

तन्मात्रेष्वन्यतममहदात्मत्वेनप्रतिपन्नास्तदुपासनयातद्वासनावासितांतःकरणाःपिंडपातानंतरमव्यक्तादीनामन्यतमस्मिन् लीनाःसाधिकारे
चरितार्थे एवं हि चरितार्थं चेतः स्याद्यदि विवेकख्यातिमपिजनयेदजनितस्तत्त्वपुरुषान्यताख्यातेश्चचेतसोचरितार्थस्यास्तिसाधिकारत्वेनिसा
धिकारेचेतसिप्रकृतिलीनेकैवल्यपदमिवानुभवंतियावन्नपुनरावर्त्ततेअधिकारवशाच्चित्तमितिप्रकृतिसाम्यमुपगतमप्यवधिंप्राप्यपु
नरपिप्रादुर्भवति ततोविपिच्यते यथावर्षातिपाते मृद्भावमुपगतोमंडूकोपिगतोमंडूकदेहःपुनरंभोदवारिधारावसेकान्मंडूकदेहमनुभवतीतितथा
चवायुप्रोक्तं सहस्रंत्वाभिमानिकाःबौद्धादशसहस्राणितिष्ठंतिविगतज्वराः पूर्णंशतसहस्रंतुतिष्ठंत्यव्यक्तचिंतकाःपुरुषंनिर्गुणंप्राप्यकालसंख्यानविद्य

तद्रूपापन्नत्वप्राप्तिहेतुतया हेयत्वं। सिद्धयोगिनां तु समाधेरुपायक्रममाह श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषां न त्विंद्रियादिचिंतका आधिपद्यादवेत
पा॰टी॰ एदे सत आह श्रद्धा चेतसः संप्रसादः स चागमानुमानाचार्योपदेशसमधिगततत्त्वविषयो भवति हि चेतसः संप्रसादो। अभिरुचिवती इच्छा श्रद्धा नेंद्रियादि
१५ षात्माभिमानिनामभिरुचिरसं प्रसादो हि सः आमोहमललतादिस्पर्शः कुतोसावेव श्रद्धेत्युत आह॥ सा हि जननीव कल्याणी योगिनं पाति विमार्गपातजन्य
नोनर्थान्न सोयमिच्छाविशेषद्रष्टव्यमाणविषयं प्रयत्नं प्रसूत इत्याह तस्या हि श्रद्दधानस्येप्सस्य विवरणं विवेकार्थिनो वीर्यमुपजायते स्व निर्व्यानमनाकुलमवि

श्रद्धावीर्यसमाधिप्रज्ञापूर्वक इतरेषां उपायप्रत्ययो योगिनां भवति श्रद्धा चेतसः संप्रसादः सा हि
जननीव कल्याणी योगिनं पाति तस्य हि श्रद्दधानस्य विवेकार्थिनो वीर्यमुपजायते समुपजातवीर्यस्य स्मृ
तिरुपतिष्ठते स्मृत्युपस्थाने च चित्तमनाकुलं समाधीयते समाहितचित्तस्य प्रज्ञाविवेक उपाव
र्तते येन यथार्थं वस्तु जानाति तदभ्यासात्तत्तद्विषयाच्च वैराग्यादसंप्रज्ञातः समाधिर्भवति॥ २०॥

हितं समाधीयते योगांगसमाधिरुक्तं भवति यमनियमादिनां तदुपकसमुद्धृत्य भ्यासेन च यमनियमनियमाद्योपि स्मृतिताः तदेवमविक्षिप्तो [illegible] ॥ ३ ॥
गां गतं पन्नस्य संप्रज्ञातो जायते इत्याह समाहितचित्तस्येति प्रज्ञा याविवेकः प्रकर्षउपजायते संप्रज्ञातो सादमाह तदभ्यासात्तत्रैव तत्त्वद्भिप्रायप्रीत
त द्विषयाच्च वैराग्यादसंप्रज्ञातः समाधिर्भवति स हि कैवल्यहेतुः सत्त्वपुरुषान्यताख्यातिपूर्वो हि निरोधः भवितव्यं खिलकार्यकरणेन चरितार्थत्व हेरंब
१५

मेनु श्रद्धादय श्चे योगोपायास्तर्हि सर्वेषामविशेषेण समाधितत्फले स्यातां दृश्यते तु कस्य चित्सिद्धिः कस्य चिदसिद्धिः कस्य चिच्चिरेण सिद्धिः कस्य चिच्चिरतरेण क
स्य चित्क्षिप्रमित्यत आह ते खलु नव योगिन इति उपायाः श्रद्धादयो मृदुमध्याधिमात्राः प्राग्भवीयसंस्कारादृष्टवशाद्येषां ते तथोक्ताः संवेगो वैराग्यं तस्य
पि मृदुमध्यतीव्रता प्राग्भवीयवासनादृष्टवशादेवेति ते षु यादृशां क्षेपीयसी सिद्धिस्तान्दर्शयति सूत्रेण तीव्रसंवेगानामासन्न इति सूत्रं शेषं भाष्यं समा

ते खलु नव योगिनो मृदुमध्याधिमात्रोपाया भवंति तद्यथा मृदूपायो मध्योपायोऽधिमात्रोपाय इति तत्र मृदूपायस्त्रिविधः मृदुसंवे
गः मध्यसंवेगः तीव्रसंवेग इति तथा मध्योपायः तथाधिमात्रोपाय इति ॥१९॥ तत्राधिमात्रोपायानां तीव्रसंवेगानामासन्नः समाधिलाभः
समाधिफलं च भवतीति २० मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः मृदुतीव्रो मध्यतीव्रो अधिमात्रतीव्र इति ततोऽपि विशेषः तद्वि
षादप्यासन्नतमोऽधिमात्रतीव्रसंवेगस्याधिमात्रोपायस्य समाधिलाभः समाधिफलं चेति मृदुतीव्रसंवेगस्यासन्नस्ततो
ऽपि मध्यतीव्रसंवेगस्यासन्नतरस्ततोऽप्यधिमात्रकश्चिदुपायो न वेति ॥२१॥ ईश्वरप्रणिधानाद्वा ईश्वरप्रणिधानात्किं विशे
षास्तदावर्जित ईश्वरस्तमनुगृह्णात्यभिध्यानेन तीव्रसंवेगस्यासन्नतमः किमेतस्मादेवासन्नतरः समाधिर्भवति अथास्य ला
भे भवति अन्योऽपि तदभिध्यानादपि योगिन आसन्नतरः समाधिलाभः समाधिफलं च भवतीति ॥२३॥ ॥ ॥ ॥

धेः संप्रज्ञातस्य फलमसंप्रज्ञातस्तस्यापि कैवल्यं मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः निगदव्याख्यातेन भाष्येण व्याख्यातमिति सूत्रान्तरं पातयि
तुं विमृशति किमस्मादेवेति न वा शब्दः संशयनिवर्तकः ईश्वरप्रणिधानाद्वा व्याचष्टे प्रणिधानाद्भक्तिविशेषान्मानसाद्वाचिकात्कायिकाद्वा आ
वर्जितोऽभिमुखीकृतस्तमनुगृह्णाति अभिध्यानमनागतेऽर्थे इच्छा इदमस्याभिमतमस्त्विति तन्मात्रेण न व्यापारान्तरेण शेषं सुगमं ॥२३॥ राम ॥ ॥

पा॰टी॰

२६

ननु चेतनाचेतनाभ्यामेव कृत्स्नं नान्येन विश्वम् ईश्वरश्चेदचेतनस्तर्हि प्रधानविकाराणामपि प्रधानमध्यपातात्तथा च नास्यावर्जनमचेतनत्वात्। अथ चेतन
स्तथापि विविधक्लेशैरुदासीनस्यात् संसारितया। किं नादिरिह कृत आवर्जनं कृतश्चाभिध्यानमित्याशयवानाह अथ प्रधाने ति अत्र सूत्रे योजनमाह क्लेशक
र्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः अविद्यादयः क्लेशाः क्लिश्यन्ति खल्वमी पुरुषं सांसारिकं विविधदुःखप्रहारेणेति कुशलाकुशलानि
तिधर्मास्तेषां च कर्मजत्वादुपचारात्कर्मत्वं विपाको जात्यायुर्भोगाः विपाकानुगुणा वासनास्ता चित्तभूमौ आशेरत इत्याशयाः न हि करभजा
ति निर्वर्तकं कर्म प्राग्भवीयकरभभोगभाविता भावनामनपेक्ष्य नतिलावलेहकरभोचिताय भोगायकल्पते तस्माद्भवति करभजात्यनु
नुभवजन्मा भावना करभविपाकानुगुणेति नन्वमी क्लेशादयो बुद्धिधर्मा न कथंचिदपि पुरुषं परामृशन्ति तस्मात्पुरुषग्रहणादेव तदपरामर्शसिद्धेः कृ

अथ प्रधानपुरुषव्यतिरिक्तः कोऽयमीश्वरो नामेति क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः॥ अविद्यादयः क्लेशाः कुशलाकुशलानि कर्माणि
तत्फलं विपाकः तदनुगुणा वासना आशयास्ते च मनसि वर्तमानाः पुरुषे व्यपदिश्यन्ते स हि तत्फलस्य भोक्तेति यथा जयः पराजयो वा योद्धृषु वर्त-
मानः स्वामिनि व्यपदिश्यते यो ह्यनेन भोगेनापरामृष्टः स पुरुषविशेष ईश्वरः कैवल्यं प्राप्तास्तर्हि सन्ति च बहवः केवलिनः ते हि त्रीणि बन्धनानि छि
कैवल्यं प्राप्ताः ईश्वरस्य च तत्सम्बन्धो न भूतो न भावी यथा मुक्तस्य पूर्वा बन्धकोटिः प्रज्ञायते नैवमीश्वरस्य यथा वा प्रकृतिलीनस्योत्तरा बं
धकोटिः संभाव्यते नैवमीश्वरस्य स तु सदैव मुक्तः सदैवेश्वर इति॥२४॥ ॥

नं क्लेशकर्मेत्यादिनेत्यत आह ते च मनसि वर्तमानाः सांसारिके पुरुषे व्यपदिश्यन्ते कस्मात् स हि तत्फलभोक्ता चेतयितेति तस्मात्पुरुषत्वादीश्वरस्या
पि तत्संबन्धः प्राप्त इति निषेधत्यपि विशेष उपपद्यत इत्याशयोऽयं नेन बुद्धिस्थेनापि चिद्रूपमात्रसाधारणेन भोगेनापरामृष्टः स पुरुषविशेष ईश्वरः विशिष्य
त इति विशेषः पुरुषान्तराद्व्यवच्छिद्यते विशेषशेषपरत्याचर्च्यं दर्शयितुकामः परिचोदनापूर्वं परिहरति कैवल्यं प्राप्तास्तर्हीति प्रकृतिलयानां प्राकृतो बन्धः वैकारिको बं
धो विदेहानां दाक्षिणाबन्धो दिव्यादिव्यविषयभोगभाजां तान्यमूनि त्रीणि बन्धनानि भक्त्वेति भावनासंस्कृतमनसो हि देहपातानन्तरमेव प्रकृतिलयतामापन्नाः कै
इति तेषां पूर्वा बन्धकोटिः प्रज्ञायते तेनोत्तरकोटिविधानमात्रमिहान्तर्पूर्वापरकोटिनिषेध इति संक्षिप्य विभज्य दर्शयति स तु सदैव मुक्तः सदैवेश्वर इति ज्ञान

ईश्व

२६

अत्र पृच्छति योसौ विशिष्ट ज्ञानक्रियेच्छा नि चिच्छक्तेरपरिणामिन्याः संभवत इति रजस्तमोरहितविशुद्धचित्तसत्त्वाश्रयेण रूपेण नचेश्वरस्य सदामुक्तस्याविद्याप्रभवत्वं चि
त्तसत्त्वसमुत्कर्षेण सह स्वस्वामिभावसंबंधः संतत इत्येतदुक्तं प्रकृष्टसत्त्वोपादानादिति नेश्वरस्याप्यप्रज्ञस्येवाविद्या निबंधन। चित्तसत्त्वेन स्वस्वामिभावः
किंतु तापत्रयपरितान्प्रेत्यभावमहार्णवाज्जंतूनुद्दिधीर्षा मि ज्ञानधर्मोपदेशेन न च ज्ञानक्रियासामर्थ्यातिशयसंपत्तिमंतरेण तदुपदेशो न चेयमपहतर
जस्तमोमलविशुद्धसत्त्वोपादानं विनेति सा नोच्यसत्त्वप्रकर्षमुपादत्ते भगवान् परानुग्रहेच्छयाऽविद्याभिमानीव विद्यायास्तस्य विद्वान्भवति न पुनरविद्या
मविद्याबलेन सेवमानः न खलु शैलूषो रामत्वमारोप्य तत्त्वाभेदं दर्शयन् भ्रांतो भवति न दिदमाहार्यमस्य रूपं न तात्त्विकमिति स्यादेतत् उद्दिधीर्षया भगवता।
सत्त्वमुपादेयं तदुपादाने न च तदुद्दिधीर्षा अस्याश्च विपाकत्वात् तथा चान्योन्याश्रयः प्रसक्तः। तदुक्तं शाश्वतिक इति भवेदेतद्यद्येवं यदीदं प्रथमता सर्गस्य भवे

योसौ प्रकृष्टसत्त्वोपादानादीश्वरस्य शाश्वतिक उत्कर्षः स किं सनिमित्त आहोस्वित् निर्निमित्त इति ॥ ३३ ॥

त् अनादौ तु सर्गसंहारप्रवाहे चेसर्गांतरीत्तसमुत्पन्नसंजिहीर्षविधित्समये पूर्णे मया सत्त्वप्रकर्ष उपादेय इति प्रणिधानं कृत्वा भगवान् जगत्संजहार तद
चेश्वरसत्त्वं प्रणिधानवासितं प्रधानसाम्यमुपगतमपि परिपूर्णे महाप्रलयावधौ प्रणिधानवासनावशात् तथैवेश्वरचित्तसत्त्वभावेन परिणमते य
था चैत्रः प्रातरेवोत्थातव्यं मयेति प्रणिधाय सुप्तः पुनस्तदैवोत्तिष्ठति प्रणिधानसंस्कारात् तस्मादनादीश्वरप्रणिधानसत्त्वोपादानयोः शाश्वति
कत्वेनानान्योन्याश्रयः न चेश्वरस्य चित्तसत्त्वं महाप्रलयेपि न प्रकृतिसाम्यमुपैतीति वाच्यं यस्य हि न कदाचिदपि प्रधानसाम्यं तत्प्राधानिकं ना
पि चितिशक्तिरज्ञत्वादित्यर्थांतरमणिकमापद्येत तत्त्वांतरं प्रकृतिपुरुषव्यतिरेकेणार्थांतराभावात् सोयमीदृशः ईश्वरस्य शाश्वतिक उ
त्कर्षः स किं सनिमित्तः सप्रमाणकः आहोस्वित् निर्निमित्तो निःप्रमाणक इति ॥ ३३ ॥ ॥ ॥ ॥ ॥

पा.टी. उत्तरं तस्य शास्त्रं निमित्तं श्रुतिस्मृतीतिहासपुराणानि शास्त्रं चोदयति शास्त्रं पुनः किं निमित्तं प्रत्यक्षानुमानपूर्वं हि शास्त्रं न चेश्वरस्य सत्त्वप्रकर्षे कस्यचि
त्प्रत्यक्षमनुमानं वास्ति न चेश्वरप्रत्यक्षभवं शास्त्रमिति युक्तं कल्पयितुमपिह पंकृयादात्मे स्वयंप्रकाशनायेति भावः परिहरति प्रकृष्टसत्त्वनिम
१७ त्तं अयमभिसंधिः मंत्रायुर्वेदे च तावदीश्वरप्रणीते प्रवृत्तिसामर्थ्याद् दृष्टार्था व्यभिचारविनिर्मुक्ता प्रामाण्यं सिद्धं न चैष विधिभेदानां तत्संयोगविशे
षाणां च तत्तद्वर्णावापोद्धारेण सहस्रेणापि पुरुषायुषैर्लौकिकप्रमाणव्यवहारी शक्तः कर्तुमन्वयव्यतिरेकौ न चागमादन्वयव्यतिरेकाभ्यां
चागमस्तत्संतानानयोरनादित्वादिति प्रत्यवादपि तं उक्तं महाप्रलये तत्संतानयोर्विच्छेदात् न च तद्भावे प्रमाणाभावः अभिव्यंप्रधानविकारेषु

तस्य शास्त्रं निमित्तं शास्त्रं पुनः किंनिमित्तं प्रकृष्टसत्त्वनिमित्तं ॥२४॥

गदिति हि प्रतिपादयिष्यते सदृशपरिणामस्य विसदृशपरिणामताद्दृष्टा यथा क्षीरेक्षुरसादेर्दधिगुडादिरूपं विसदृशपरिणामतान्च दृष्टं तदिह प्रधा
नेनापि महदहंकारादिरूपविसदृशपरिणामेन सता भाव्यं कदाचित् सदृशपरिणामेनापि सदृशपरिणामस्तस्य साम्यावस्था स च महाप्रलयः तस्मान्म
न्त्रायुर्वेदप्रणयनात्तावद्भगवतोऽपि गलितरजस्तमोमलावरणतया परितः प्रद्योतमाने बुद्धिसत्त्वमात्मीयं तथा चोत्कृष्य निःश्रेयसोपदेशपरोप
वेदिनापि ईश्वरप्रणीतस्तत्र बुद्धिसत्त्वप्रकर्षादेव भवितुमर्हतीति न च सत्त्वोत्कर्षे रजस्तमःप्रभवौ विभ्रमविप्रलंभौ संभवतः तत्सिद्धं प्रकृष्टसत्त्वी हेस्व
१७

ति विवेकिनां प्रसिद्धि ॥२४॥

स्यादेतत् प्रकर्षकार्यतया प्रकर्षं बोधयेच्छास्त्रं शेषवदनुमानं भवेत्तदागमः स्यात आह एतयोरिति न कार्यत्वेन बोधयति अपि त्वनादिवाच्यवाचकभा
वसंबंधेन बोधयतीत्यर्थः ईश्वरस्य हि बुद्धिसत्वे प्रकर्षे विवर्त्तते शास्त्रमपि तद्वाचकत्वेन तत्र वर्त्तते इति उपसंहरत्येतस्मादीश्वरबुद्धिसत्वप्रकर्षवाचका
च्छास्त्रादितद्भवतीत्यापने विषयेणापि वधिणोलक्षणात् सदैवेश्वरः सदैवमुक्त इति तदेवं पूर्वान्तरादृष्टव्यच्छिद्येश्वरांतरादपि व्यवच्छिन्नतितच्चतस्ये
ति अतिशयविनिर्मुक्तिमाह न तावदिति कुतः यदेवेति कस्मात्सर्वातिशयविनिर्मुक्तं तदैश्वर्यमित्यत आह तस्माद्यत्रेति अतिशयनिष्ठामप्राप्तान्नामोपच

एतयोः शास्त्रोत्कर्षयोरीश्वरसत्वे वर्त्तमानयोरनादिः संबंधः एतस्मादेतद्भवति सदैवेश्वरः सदैव मुक्त इति तच्च तस्यैश्वर्यं सा
म्यातिशयाभ्यां विनिर्मुक्तं न तावदैश्वर्यान्तरेण तदतिशय्यते यदेवातिशयि स्यात् तदेव तत्स्यात् तस्माद्यत्र काष्ठाप्राप्तिरैश्वर्यस्य
स ईश्वर इति न च तत्समानमैश्वर्यमस्ति कस्मात् द्वयोस्तुल्ययोरेकस्मिन् युगपत्कामितेऽर्थे नवमिदमस्तु पुराणमस्त्विति एकस्य
सिद्धावितरस्य प्राकाम्यविघातादूनत्वं प्रसक्तं द्वयोश्च तुल्ययोर्युगपत्कामितार्थप्राप्तिर्नास्ति अर्थस्य विरुद्धत्वात् तस्माद्यस्य
साम्यातिशयविनिर्मुक्तमैश्वर्यं स ईश्वरः स च पुरुषविशेष इति ॥ २५ ॥

रिकमैश्वर्यमित्यर्थः साम्यविनिर्मुक्तिमाह न च तत्समानमिति प्राकाम्यमविहतेच्छत्वात् तद्विघातादूनत्वं अनूनत्वे वा द्वयोरपि प्राकाम्यविघातः कार्या
नुत्पत्तेरुत्पत्तौ वा विरुद्धधर्मसमागमितमेकदा कार्यमुपलभ्येत सापायवानाह द्वयोश्चेति अविरुद्धाभिप्रायत्वे वा प्रत्येकमीश्वरत्वे कृतमन्यैरेकेनैवे
श्वरेणाया कृतत्वात् सैश्वर्यकाधिक्ये वा न कश्चिदीश्वरः परिषद्वत् निलेशनायोगिनां च पर्यायापायोर्यात् कल्पनागौरवप्रसंगाच्चेति दृश्यं तस्मात्सर्वमवदातं ॥ २५ ॥

पा॰१. एवमस्य क्रियाज्ञानशक्तौ शास्त्रं प्रमाणमभिधाय ज्ञानशक्तावनुमानं प्रमाणयति किंच तत्र निरतिशयं सर्वज्ञबीजं व्याचष्टे । यदिदमिति बुद्धिसत्वावकलमोपग
मतारतम्येन यदिदमतीतानागतप्रत्युत्पन्नानां प्रत्येकं च समुच्चयेन च वर्त्तमानानामतींद्रियाणां ग्रहणं तस्य विशेषणमल्पं बह्विति सर्वज्ञबीजं कारणं कश्चित्किंचि
१८ देवातानादि गच्छति कश्चिद्बहु कश्चिद्बहुतरं कश्चिद्बहुतममिति यास्यापेक्षया ग्रहणस्याल्पत्वं बहुत्वं चोक्तं एतद्विवर्द्धमानं यत्र निःक्रांतमतिप्राया तस्य सर्वज्ञ

किंच २५ तत्र निरतिशयं सर्वज्ञबीजं यदिदमतीतानागतप्रत्युत्पन्नप्रत्येकसमुच्चयातींद्रियग्रह
णमल्पं बह्विति सर्वज्ञबीजमेतद्विवर्द्धमानं यत्र निरतिशयं स सर्वज्ञः अस्ति काष्ठाप्राप्तिः सर्वज्ञबी
जस्य सातिशयत्वात्परिमाणवदिति यत्र काष्ठाप्राप्तिर्ज्ञानस्य स सर्वज्ञः स च पुरुषविशेष इति ॥ २६ ॥

इति तत्तेन प्रमेयमात्रं कथितं अत्र प्रमाणयति अस्ति काष्ठाप्राप्तिः सर्वज्ञबीजस्येति साध्यनिर्देशः निरतिशयत्वं काष्ठा यतः परमतिशयवत्ता नास्तीति तेनानवधिमत्त्वे
न सिद्धसाधनं सातिशयत्वादिति हेतुर्यद्यत्सातिशयं तत्तत्सर्वं निरतिशयं यथा कुवलयामलकबिल्वेषु सातिशयं महत्वं आत्मनि निरतिशयमिति व्याप्तिं दर्शयति
परिमाणवत् न च गरिमादिभिर्गुणैर्व्यभिचार इति सांप्रतं न खल्वयं वयवगरिमातिशयी गरीमावयविनः किं त्वापरमाणुभ्यः आं ऽसाध्य विभ्योपायतः केवलं तेषां सर्वेषां
मस्य केंचर्त्तिनो गरिम्णः समाहसगरिमवर्द्धमानाभिमानः ज्ञानं मुन्यविज्ञेयं ममापेतद्रसेकद्विबहुविषयतयाप्युक्तं सातिशयमिति न व्यभिचारः उपसंहरति यत्र काष्ठेति ॥ २६ ॥ हेरंब
१८

ननु संति बहवस्तीर्थकरा बुद्धार्हत्कपिलर्षिप्रभृतयस्तत्कस्मात्त एव सर्वज्ञा न भवंतस्तस्मादनुमानादिसंत आह सामान्येति कुतस्तर्हि तद्विशेषप्रतिप
त्तिरित्यत आह तस्येति बुद्धादिप्रणीत आगमाभासो न त्वागमः सर्वप्रमाणबाधितत्वात् क्षणिकनैरात्म्यादिमार्गोपदेशकत्वेन विप्रलंभकत्वादिति भावः तेन श्रु
तिहासपुराणलक्षणागम न आगच्छंति बुद्धिमारोहंति अस्मादभ्युदयनिःश्रेयसोपाया इत्यागमः तस्मात् संज्ञाविशेषप्रतिपत्तिः संज्ञाविशेषः शिवेश्वरादिः श्रु

सामान्यमात्रोपसंहारे कृतोपक्षयमनुमानं न विशेषप्रतिसमर्थ
मिति तस्य संज्ञादिविशेषप्रतिपत्तिरागमतःपर्यन्वेष्या ॥ ३१ ॥

सादिश्च प्रसिद्धः आदिपदेन षडंगता दृशाव्ययते संगृहीते यथोक्तं वायुपुराणे सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्तशक्तिः अनंतशक्तिश्च इति ॥ ३२ ॥
भोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्य तथा ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च अव्ययानि दशैतानि संतिष्ठंति शिवे

पा·टी·

१९

स्यादेतत् नित्यमुक्तस्य भगवतो वैराग्यातिशयसंपन्नस्य स्वार्थे तस्मिन्नसंभवात् कारुणिकस्य च सुखैकतानजनसर्जनेन परस्परदुःखबहुलजीवलोकजननानुपपत्ते
रप्रयोजनस्य चाप्रेक्षावतः प्रवृत्त्यनुपपत्तेः क्रियाशक्तिशालिनोपि न जगत्सृष्टिरित्यत आह तस्यात्मानुग्रहाभावेपीति भूतानां प्राणिनामनुग्रहः प्रयोजनं शद्वाद्युपभो
गविवेकख्यातिरूपकार्यकरणात् किल चरितार्थं चित्तं निवर्त्तते ततः पुरुषः केवली भवति अतस्तत्प्रयोजनाय कारुणिको विवेकख्यात्युपायं कथयति तेनाचरितार्थत्वाच्चि
त्तस्य जंतूनामीश्वरः पुण्यापुण्यसहायः सुखदुःखे भावयन्नपि न काकारुणिकः विवेकख्यात्युपायकथनाद्भूतानुभूतानुग्रहद्वारमाह ज्ञानधर्मोपदेशेनेति ज्ञानं च ध
र्मश्च ज्ञानधर्मौ तयोरुपदेशेन ज्ञानधर्मसमुच्चयात् लब्धविवेकख्यातिपरिपाकात् कल्पप्रलये ब्रह्मणो दिनावसाने यत्र समस्तलोकवर्ज्जं जगद्दग्धमेति महा

तस्यात्मानुग्रहाभावेपि भूतानुग्रहः प्रयोजनं ज्ञानधर्मोपदेशेन कल्पप्रलयमहाप्रलयेषु संसारिणः पुरुषानुद्धरिष्यामीति त
थाचोक्तं आदिविद्वान् निर्माणचित्तमधिष्ठाय कारुण्याद्भगवान् परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाचेति ॥ २५ ॥

प्रलये समस्तलोकस्य ब्रह्मणोपि निधने संसारिणः पुरुषानुद्धरिष्यामीति कैवल्यं प्राप्य पुरुषा उद्धृता भवंतीत्यर्थः । एतच्च करुणाप्रयुक्तस्य ज्ञानधर्मो
पदेशनं कापिलानामपि सिद्धमित्याह तथाचोक्तं पंचशिखाचार्येण आदिविद्वान्कपिल इति आदिविद्वानिति पंचशिखाचार्यवचनं आदिमुक्त
स्य संज्ञानादिगुरुविषयं न त्वनादिमुक्तपरमगुरुविषयं आदिमुक्तेषु कदाचिन्मुक्तेषु विद्वत्सु कपिलोस्माकमादिविद्वान्मुक्तः स एव गुरु
रिति कपिलस्यापि जायमानस्य महेश्वरानुग्रहादेव ज्ञानप्राप्तिः श्रूयत इति कपिलो नाम विष्णोरवतारविशेषः प्रसिद्धः स्वयंभूर्हिरण्यगर्भस्त
स्यापि सांख्ययोगप्राप्तिर्वेदे श्रूयत इति स एवेश्वर आदिविद्वान् कपिलो विष्णुर्न स्वयंभूरिति भावः स्वायंभुवानां वीश्वर इति भावः ॥ २५ ॥ हेरंब

१९

संप्रति भगवतो ब्रह्मादिभ्यो विशेषमाह स एष इति पातनिका स एष इति सूत्रं पूर्वेषामपि गुरुः कालेनानवच्छेदात् व्याचष्टे पूर्वे हीति कालस्तु शतवर्षादि ४ अवच्छेदार्थेन अवच्छेदेन प्रयोजनेनः नोपावर्त्तते नेन वर्त्तते प्रकर्षस्य गतिः प्राप्तिः प्रत्येतव्य आगमात् तदनेन प्रबंधेन भगवानीश्वरो दर्शितः संप्रति तत्प्रणिधाने दर्शयितुं तस्य वाचकमाह तस्य वाचकः प्रणवः व्याचष्टे वाच्य इति तत्र एरेषां मंतं विमर्शद्वारेणोपन्यस्यति किमस्येति वाचकत्वं प्रतिपादकत्वं मित्यर्थपरे हि पश्यंति पदि स्वाभाविकः शब्दार्थयोः संबंधः संकेतेनास्माच्छब्दादयमर्थः प्रत्येतव्य इत्येवमात्मकेनाभिव्यज्यते ततनोपत्त्रनाक्ति संबंधः तत्र संकेतशतेनापि न व्यज्येत॥

स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात् पूर्वे हि गुरवः कालेनावच्छिद्यंते यत्रावच्छेदार्थेन कालेनोपावर्त्तते स एष पूर्वेषामपि गुरुः यथास्य सर्गस्यादौ प्रकर्षगत्या सिद्धस्तथातिक्रांतसर्गादिष्वपि प्रत्येतव्यः २७ तस्य वाचकः प्रणवः वाच्य ईश्वरः ४ प्रणवस्य किमस्य संकेतकृतं वाच्यवाचकत्वं अथ प्रदीपप्रकाशवदवस्थितमिति स्थितोऽस्य वाच्यस्य वाचकेन सह संबंधः संकेतस्तु ईश्वरस्य स्थितमेवार्थमभिनयति यथावस्थितः पितापुत्रयोः संबंधः संकेतेनावद्योत्यते अयमस्य पिता अयमस्य पुत्र इति ॥ ३०॥ ॥ ॥

न हि प्रदीपव्यंग्यो घटो यत्र नास्ति तत्र प्रदीपसहस्रेणापि शक्योऽव्यक्तुं कृतं संकेतसहस्रेण भ शब्दो वारणो वारणप्रतिपादको दृष्टः ततः संकेतकृतमेव वाचकत्वमिति विमृश्याभिमतमवधारयति स्थितोऽस्येति अयमभिप्रायः सर्व एव शब्दाः सर्वकारार्थाभिधानसमर्था इति स्थित एवैषां सर्वाकारैरर्थैः स्वाभाविकः संबंधः ईश्वरसंकेतस्तु प्रकाशकश्च नियामकश्च तस्य ईश्वरसंकेतकृतश्चास्य वाचकापभ्रंशविभागः तदिदमाह संकेतस्त्वीश्वरस्येति निदर्शनमाह यथेति ॥२९॥

पा.टी. ननु शब्दस्य प्राधानिकस्य महाप्रलयसमये प्रधानभावमुपगतस्य शक्तिरपि प्रलीना ततो महदादिक्रमेणोत्पन्नस्य वाचकस्यैव माहेश्वरेण संकेतेन न न शाश्वा वाचकशक्ति

२० रभिव्यलयितुं विनष्टशक्तित्वादित्यत आह सर्गान्तरेष्वपीति यद्यपि सहशक्त्या प्रधानसाम्यमुपगतः शब्दस्तथापि पुनराविर्भवंस्तच्छक्तियुक्त एवाविर्भवतीत्यर्थः इति

सर्गान्तरेष्वपि वाच्यवाचकशक्त्यपेक्षस्तथैव संकेतः। क्रियते संप्रतिपत्तिनिःस्ततया नित्यः श
ब्दार्थसंबंध इत्यागमिनः प्रतिजानते विज्ञानवाच्यवाचकत्वस्य योगिनः॥ २६॥ ॥ ॥॥

पानसमधिगतमहदाद्यवद्वाङ्गिज्ञो मेघविस्पष्टवादिधारासारावसेकात् तेन पूर्वसंबंधसंकेतः क्रियते भगवताऽऽदाविति तस्मात्संप्रतिपत्तेः सदृशव्यवहारपर ...गाहति भावः

परापानित्यतया नित्यः शब्दार्थयोः संबंधोऽनकूटस्थनित्य इत्यागमिकोः प्रतिजानते न पुनरागमनिरपेक्षाः सर्गान्तरेष्वपि तदृश एव संकेत इति प्रतीप हेम्व

२०

वाचकमाख्याय प्रणिधानमाह तज्जपस्तदर्थभावनं व्याचष्टे प्रणवस्येति भावनं पुनः पुनश्चेतसि निवेशनं ततः किं सिध्यतीत्यत आह प्रणवमिति एकस्मिन् भगवति आर
मति चित्तं अत्रैव व्यासकीं गाथामुदाहरति तथा चेति ततईश्वरः समाधितत्फललाभेन तमनुगृह्णाति किंचान्यदस्मात् ततः प्रत्यक्चेतनाधिगमोऽप्यंतरायाभाव
श्च प्रतीपं विपरीतमंचति विजानातीति प्रत्यक् स चासौ चेतनश्चेति प्रत्यक्चेतनो ऽविद्यावान् पुरुषः तद्दर्शनेनेश्वरात् शाश्वतिकसत्वोत्कर्षसंपन्नात् वृद्धिभावनो
निवर्त्तयति प्रतीचश्चेतनस्याधिगमो ज्ञानं स्वरूपतो स भवति अंतरायावक्ष्यमाणस्तदभावश्च अस्य विवरणं येतावदिति स्वमात्मानस्य रूपं रूपयहते

तज्जपस्तदर्थभावनं प्रणवस्य जपः प्रणवाभिधेयस्य चेश्वरस्य भावनं तदस्य योगिनः प्रणवं जपतः प्रणवार्थं च भावयतश्चि
त्तमेकाग्र्यं संपद्यते तथा चोक्तं स्वाध्यायाद्योगमासीत योगात् स्वाध्यायमामनेत् स्वाध्याययोगसंपत्त्या परमात्मा प्रकाशत इति
किं चास्य भवति ॥२८॥ ततः प्रत्यक्चेतनाधिगमोऽप्यंतरायाभावश्च ये तावदंतराया व्याधिप्रभृतयः ते तावदीश्वरप्रणिधानान्न भवं
ति स्वरूपदर्शनमप्यस्य भवति यथैवेश्वरः पुरुषः शुद्धः प्रसन्नः केवलोऽनुपसर्गः तथायमपि बुद्धेः प्रतिसंवेदी पुरुष इत्येवमधिगच्छति ॥
२९

नाविद्यासमारोपितान् धर्मान् निषेधति नन्वीश्वरप्रणिधानमीश्वरविषयं कथमिव प्रत्यक्चेतनसाक्षात्कारोत्पत्तिप्रसंगादित्यत आह यथैवेश्वर इति शु
द्धः कूटस्थनित्यतयोदयव्ययरहितः प्रसन्नः क्लेशवर्जितः केवलो धर्माधर्मापेतः अत एवानुपसर्गः उपसर्गो जात्यायुर्भोगाः सारूप्यविविक्तं चिद्रूपाधिष्ठानत्वादीश्वर
द्विनतिः बुद्धेः प्रतिसंवेदीति तदनेन प्रसक्तं यदहल्यां व्याख्यातं असंतविधर्मिलोऽन्यतरार्थानुचिंतनं न तदितरस्य साक्षात्कारायकल्पते सदृशार्थानुचिंतनं तु
सदृशांतरसाक्षात्कारोपयोगिता मतु भवति एकशास्त्राभ्यास इव तत्सदृशार्थशास्त्रांतरज्ञानोपयोगितां प्रत्यासत्तिस्तु स्वात्मनि साक्षात्कारहेतुर्न परात्म

नीति सर्वमवदातं ॥२९॥

पा॰टी॰ पठतीति अथकइति सामान्येनोत्तरं यइति विशेषसंख्ये पठतीति कइतिउत्तरं व्याधीत्यादिसूत्रं अंतरायानवयताश्च चित्तवृत्तयो योगांतराया योगविरोधिनश्चित्तस्य विक्षेपकाः चित्तं
खल्वमीभ्याधारयोगाद्विक्षिपंति अपनयंती अपनयंतीति विक्षेपाः योगप्रतिपक्षत्वे हेतुमाह सहैतइति संशयः भ्रांतिदर्शनेतावद्वृत्तिरूपावृत्तिः निरोधपक्षोमेपि
२१ नवृत्तयो व्याधिप्रभृतयस्तेपि वृत्तिसाहचर्यात्तत्प्रतिपक्षाद्वसर्थः पदार्थान्व्याचष्टे व्याधिरिति धातवो वातपित्तश्लेष्माणः शरीरधारणात् अशितपीताहा
रपरिणामविशेषो रसः करणानींद्रियाणि तेषां वैषम्यं न्यूनाधिकभाव इति अकर्मण्यता कर्मानर्हता संशयउभयकोटिस्पृगविज्ञानंसम्पन्नद्रूप प्रतिष्ठते

अथकेंतरायाये चित्तस्य विक्षेपाः केपुनस्ते कियंतोवेति ॥२९॥ व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तें
तरायाः नचांतरायश्चित्तस्य विक्षेपाः सहैते चित्तवृत्तिभिर्भवंत्येतेषामभावेन भवंतिपूर्वोक्ताश्चित्तवृत्तयः तत्र व्याधिर्धातुरसकरणवैषम्यं स्त्यानमकर्मण्य
ता चित्तस्य संशयउभयकोटिस्पृग्विज्ञानंस्यादिदमेवंनैवंस्यादिति प्रमादः शमादिसाधनानामभावनं आलस्यं कायचित्तस्य गुरुत्वादप्रवृत्तिः अविरति
श्चित्तस्य विषयसंप्रयोगात्मागर्द्धः भ्रांतिदर्शनेविपर्ययज्ञानं अलब्धभूमिकत्वंसमाधिभूमेरलाभः अनवस्थितत्वंपल्लब्धायांभूमौ चित्तस्यात्र
तिष्ठासमाधिप्रतिष्ठासमाधिप्रतिलंभेहिसतितदवस्थितंस्यादिति एतेचित्तविक्षेपानवयोगमलाः योगप्रतिपक्षायोगांतरायाः इत्यभिधीयते ॥२९॥

नसंशयविपर्यासयोरभेदे उभयकोटिस्पर्शास्पर्शरूपावांतरविशेषविवक्षयात्रभेदेनोपन्यासः अभावनमकरणं तत्राप्ययत्नइतियावत् कायस्य गुरुत्वंकफा
दिना चित्तस्य गुरुत्वं तमसा गर्द्धस्तृष्णा मधुमत्यादयः समाधिभूमयः लब्धभूमये यद्दितावत्तैव सुस्थितं मन्यस्य समाधिर्न्नेषः स्यात् ततस्तस्या अपिभू हेरंब
मरपायः स्यात् यस्मात्समाधिप्रतिलंभेतदवस्थितंस्यात्तस्मात्तत्रप्रयतितव्यमिति ॥७२॥ ॥ ॥ ॥ ॥ ॥ २१

नके वले नवोत्तरा याद्दुःखादयोप्यस्यत स्त सहभुवो भवन्तीत्याह दुःखेत्यादिप्रतिकूलवेदनीयं दुःखं आध्यात्मिकं शारीरं व्याधिवशात् ० मानसं च कामादिवशात् आधि
भौतिकं व्याघ्रादिजनितं आधिदैविकं ग्रहपीडादिजनितं तच्चेदं दुःखं प्राणिमात्रस्य प्रतिकूलवेदनीयतया हेयमित्याह येनाभिहताद्इति समाध्यंगपूरकविरोधी प्रनिकृतः

दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः दुःखमाध्यात्मिकमाधिभौतिकमाधिदैविकं च येना
भिहताः प्राणिनस्तदुपघाताय प्रयतंते तत्तदुःखं दौर्मनस्यमिछाविविघाताच्चेतसः क्षोभः यदंगान्येजयति
कंपयतीतिदंगमेजयत्वं प्राणोपद्बाह्यं वायुमाचामतिस श्वासः यत्कौष्ठ्यं वायुं नि८ सारयति स प्रश्वास८
एते विक्षेपसहभुव८ विक्षिप्त चित्तस्यैते भवंति समाहितचित्तस्यैतेन भवंति ॥३१॥ ॥ ॥ ॥

प्राणोयद्बाह्यं वायुमाचामति पिबति प्रवेशयति यावत् स श्वासः समाध्यंगरेचकविरोधी अनिच्छितेपि प्राणोपत् कौष्ठ्यं वायुं निश्वारयति निःसारयति स
प्रश्वासः समाध्यंगपूरकविरोधी ॥३१॥

पा०टी० उक्तार्थोपसंहारसूत्रमवतारयति अथैतदिति अथोक्तार्थानंतरमुपसंहरन्निदं सूत्रमाहेति संबंधः निरोद्धव्यत्वे हेतुरुक्तः समाधिप्रतिपक्षा इति यद्यपीश्वरप्रणिधाना
दिरभ्यासमात्रमुक्तं तथापि वैराग्यमिह तत्सहकारितया ग्राह्यमित्याह तत्राभ्यासमुक्तलक्षणाभ्यामिनाभ्यासवैराग्याभ्यां निरोद्धव्याः तत्र तयोरभ्यासवैराग्ययोर्मध्ये अ
२२ वासस्यानंतरोक्तस्येति तत्प्रतिषेधार्थमित्यादि एकं तत्त्वमीश्वरः प्रकृतत्वाद्वृत्ति वैनाशिकानां ततः सर्वमेकाग्र्यमेव चित्तं नास्ति किंचिद्विक्षिप्तमिति तदुपदेशा
नंतरार्थानां च प्रवृत्तीनां वैयर्थ्यमित्याह यस्य त्विति यस्य मते प्रत्यर्थे अर्थमात्रे एकस्मिन्ननेकस्मिन्वा नियतं यावदर्थावभासमुत्पन्नं तत्रैव समाप्तम

अथैते विक्षेपाः समाधिप्रतिपक्षाः ताभ्यामेवाभ्यासवैराग्याभ्यां निरोद्धव्याः तत्राभ्यासस्य विषयमुपसंह
रन्निदमाह तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः विक्षेपप्रतिषेधार्थमेकतत्त्वावलंबनं चित्तमभ्यसेत् ॥ य
स्य तु प्रत्यर्थनियतं प्रत्ययमात्रं क्षणिकं च चित्तं तस्य सर्वमेव चित्तमेकाग्रं नास्त्येव विक्षिप्तं यदि पुन
रिदं सर्वतः प्रत्याहृत्य एकस्मिन्नर्थे समाधीयते तदा भवत्येकाग्रमित्यतो न प्रत्यर्थनियतं ॥ ३२ ॥ ॥

नमन्यगामि अर्थांतरं तावदप्रयमं गृहीत्वार्थांतरमपि यस्माद्विकस्यान्न गच्छतीत्यत आह क्षणिकं च क्षणस्याभेद्यत्वेन सर्वपश्चाद्भावस्याप्यभाव ४ अ
स्मन्मते तु क्षणिकं विषये एकस्मिन्ननेकस्मिन्वानवस्थितं प्रतिक्षणं तत्तद्विषयोपादानपरित्यागाभ्यां विषयानियतं विक्षिप्तमनो विक्षेपपरिणामः
यत्नीयं तु ऐकाग्र्यता आधानमिति तदुपदेशप्रयत्नोर्नानर्थक्यमित्याह यदि पुनरिदमिति उपसंहरति अतो नेति ॥ ३२ ॥ ॥ ॥ ॥ ॥

हेरंब
२२

वैनाशिकमुत्थापयति योपीति मा भूदेकस्मिन्क्षणिके चित्ते एकाग्रताधानप्रयत्नः चित्तसंताने त्वनादावक्षणिके विक्षेपमपनीय एकाग्रताधास्य तदर्थः तदेद्विक
स्यदूषयति तस्येति तस्यदर्शने एकाग्रता यदि प्रवाहचित्तस्य चित्तसंतानस्य वा धर्मः तन्नैकं क्रमवद्धु सादृशप्रत्ययेष्वनुगतं नास्ति प्रवाहचित्तं कुतो यथाव
दृस्तितस्य सर्वस्य क्षणिकत्वात् दृष्टिणीस्य वास्तवत्वादवतां दर्शन इति भावः द्वितीयं कल्पं गृह्णाति अथेति सोवत्तस्य प्रवाहस्यांशः प्रत्ययः परमार्थः सन्नेतस्य
प्रत्यस्यैकाग्रता प्रयत्नसाध्यो धर्मः दूषयति स सर्वः सांवृतप्रवाहापेक्षया सदृशप्रवाही वा विसदृशप्रवाही वा अतः परमार्थसत्तारूपेण प्रत्यर्थनियतत्वादेद

यो पि सदृशप्रत्ययप्रवाहेण चित्तमेकाग्रं मन्यते तस्यैकाग्रता यदि प्रवाहचित्तस्य धर्मस्तदैकं नास्ति प्रवाहचित्तं क्षणिकत्वात् अथ प्रवा
हांशस्यैव प्रत्ययस्य धर्मः सर्वः सदृशप्रत्ययप्रवाही वा विसदृशप्रत्ययप्रवाही वा प्रत्यर्थनियतत्वादेकाग्र ए
वेति विक्षिप्तचित्तानुपपत्तिः तस्मादेकमनेकार्थमवस्थितं चित्तमिति यदि च चित्तेनैकेनानन्विताः स्वभावभिन्नाः प्रत्यया जा
येरन् अथ कथमन्यप्रत्ययदृष्टस्यान्यः स्मर्त्ता भवेत् अन्यप्रत्ययोपचितस्य च कर्माशयस्यान्यः प्रत्युपभोक्ता भवेत् ॥३२॥ ॥ ॥

र्थनियतत्वाद् इत्यर्थभासत्वं प्रत्ययत्वं समाप्यतत्वादेकाग्र एवेति विक्षिप्तचित्तानुपपत्तिः यद्यपने यनैकाग्रता अधीयत इति उपसंहरति तस्मादिति इतोपि चि
त्तमेवामनेकार्थमवस्थितं चेत्याह यदि चेति यथा हि मैत्रेणाधीतस्य शास्त्रस्य न चैत्रः स्मरति यथा मैत्रेणोपचितस्य पुण्यस्य पापस्य वा कर्माशयस्य
फलं तत्संबंधी चैत्रो न भुंक्ते एवं प्रत्ययांतरदृष्टस्य प्रत्ययांतरं न स्मरेत् प्रत्ययांतरोपचितस्य वा कर्माशयस्य फलं च न प्रत्ययांतरमुपभुंजीतेत्यर्थः ॥३२॥

प्र॰टी॰ ननु नाति प्रसङ्गो ऽनेन कार्यकारणभावे सति निर्विशेषत्वात् । श्राद्धे वैश्वानरीये ष्ट्यादौ च कर्तृमात् पितृपुत्रादिगामिफलदर्शनात् मधुररसभावितानां आम्रबीजादीनां परम्प
रया फलमाधुर्यनियमादिसत आह समाधीयमानं व्येतद् इति अयमभिसंधिः कः खल्वेकसंतानवर्तिनो प्रत्ययानां संतानान्तरवर्तिभ्यः प्रत्ययेभ्यो विशेषो येनैकसंता
२२ नवर्त्तिना प्रत्ययेनानुभूतस्योपचितस्य च कर्मणः शयसात् तत्संतानवर्त्येव प्रत्ययः स्मर्त्ता भोक्ता च स्यान् नान्यसंतानवर्ती नहि संतानो नाम कश्चिद् । स्तित् स्तिव स्तु सत्य
एते संतानिनः संतानान्तरवर्तिभ्यो भिद्यन्ते न च कश्चिद् अन्यो भेदः । किं यथा मुपयुज्यते तेन खलु कल्पिता भावो माणवकः पच ति न च कार्यकारणभावसंबन्धो पि वास्तवः
सहभुवोः सव्येतरविषाणयोरिवाभावात् असहभुवोर् अपि प्रत्यासत्त्याश्रयत्वायोगात् न घटनीनानागतौ व्यासज्य प्रत्युत्पन्नत्वं । तेन तु मर्हतः तस्मात् संतानेन वा कार्यकारणभावे
न वाभाविके नानुपहिताः परमार्थसंतः प्रत्ययाः परस्परासंस्पृष्टास्तेन स्वसंतानवर्तिभ्यः परसंतानवर्तिभ्यो वा प्रत्ययान्तरेभ्यो न भिद्यन्ते सो ऽयं गोमयं चाधिकृत्य प्रवृत्तो न्यायो गोमयपा

कथंचित् समाधीयमानम् अप्येतत् गोमयपायसीयन्यायम् आक्षिपति । किं च स्वात्मानुभवापह्नव एतस्यायत्नेन प्राप्नोति कथं पद्मं अहमद्राक्षं न तत् स्पृशामि यच्चास्प्राक्षं
तत् पश्यामि इति अहम् इति प्रत्ययः सर्वस्य प्रत्ययस्य भेदे सति प्रत्ययचित्तभेदेनोपस्थितः एकप्रत्ययविषयो ऽयम् अभेदात्मा अहम् इति प्रत्ययः कथम् अन्यं त
थापि लेपु वि तेषु वर्त्तमानः सामान्यमेकं प्रत्ययविनमाश्रयेत् स्वानुभवयाथात्म्यम् अभेदात्मा अहम् इति प्रत्ययं न च प्रत्यक्षस्य स्वमाहात्म्यं प्रमाणान्तरेण भि
द्यते प्रमाणान्तरं च प्रत्यक्षबलेनैव व्यवहारे लभते तस्याद् एकार्थम् एवास्थितं च चित्तं ॥ ७६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

यं संगच्छता उभयसिद्ध्यापयत्वादिति तमाक्षिपति न्यायाभासत्वेन तत्तोप्यधिकत्वादिति न चात्र कृतनाशाकृताभ्यागमचोद्यं यत एतत्तमेव कर्मणां कर्तृ तद् एव तज्जनितायाः
सुखदुःखाभ्यां युज्यते सुखदुःखे च वित्ति छायां पत्रे चित्तं मुक्त इति पुरुषे भोगाभिमान एते इति चित्तयोस्ते द्वयहादि इति स्वप्रत्ययं प्रतीत्य समुत्पन्नानां स्वभाव एवैषा तादृशा यत्त
एव स्मरन्ति फलं चोपभुञ्जते न त्वन्ये न च स्वभावा नियोगपर्यनुयोगावर्हन्ति एवं भवतमैवं भूतेति वा कस्मान्नैवमिति चेन्नियः सर्वो ऽनुपरितुष्यति तत्प्रसाद् किं च स्वात्मेति उपद्यम्प हेतु॰
धर्मिणाम् अनुभवानाम् अनुभवस्मृतीनां चैनानालेपितदाश्रयम् अभिन्नं चित्तम् अहम् इति प्रत्ययः प्रतिसंदधानः कथम् असंतम् अभिन्नात्मानम् अलम्बेत ननु ग्रहणस्मरणम् अरूपकारणभेदा सारो २९
ऽस्यापरो ऽस्य रूपविरुद्धधर्मसंसर्गो हि नाम प्रत्यभिज्ञानं नामैकः प्रत्ययः यतः प्रत्ययचित्तस्यैकत्वं स्यादित्यत आह स्वानुभवे इति ननु कारणभेद विरुद्धधर्मसंसर्गौ वन्द्यवाधकावुक्तौ विष
त आह न च प्रत्यक्षस्येति प्रत्यक्षानुसारतः एव सामग्र्यभेदः पारोक्ष्यापारोक्ष्य धर्मौ विरोधश्चोपपादितो न्यायकणिकायाम् अक्षणिकस्य चार्थक्रियान्यायकणिकाब्रह्मतत्त्वसमीक्षयोः
इति नेति सर्वम् अवदातं ॥ ७६ ॥ ॥

अथपरिकर्मितमनसोसूयादिमतः समाधितदुपायसंपत्सनुत्साहाच्छि तत्प्रसादनोपायानसूयादिविरोधिनः प्रतिपादयितुमुपक्रमते यस्येति चित्तस्याव।स्थितस्येदमिति मैत्रीक रुणेत्यादि प्रसादनोतं सुखितेषु मैत्रीं सौहार्दं भावयतईर्ष्याकालुष्यं निवर्तते चित्तस्य दुःखितेषु च करुणामात्मनीव परस्मिन्दुःखप्रहाणेच्छां भावयतः परापकारचि कीर्षाकालुष्यं चेतसो निवर्त्तते पुण्यशीलेषु मुदितां हर्षं भावयतः असूयाकालुष्यं चेतसो निवर्त्तते॰ अपुण्यशीलेषु चोपेक्षां माध्यस्थ्यं भावयतोमर्षका लुष्यं निवर्त्तते ततश्चास्य राजसतामसधर्म्मनिवृत्तौ सात्त्विकः शुक्लो धर्मउपजायते सत्वोत्कर्षसंपन्नः संभवति निवृत्तिविरोधपक्षे तस्य प्रसादः स्वाभाव्याच्चित्तं प्रसीदति॥

यस्य त्वस्यावस्थितस्येदं शास्त्रेण परिकर्म निर्दिश्यते तत्कथं॥३१॥ मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनं तत्र सर्वप्राणिषु सुखसंभोगापन्नेषु मैत्रीं भावयेत् दुःखितेषु करुणां पुण्यात्मकेषु मुदितां अपुण्यशीलेषूपेक्षां एवमस्य भावयतः शुक्लो धर्म उपजायते ततश्च चित्तं प्रसीदति प्रसन्नमेकाग्रं स्थितिपदं लभते॥३२॥ प्रच्छर्दनविधारणाभ्यां वा प्राणस्य॥ कौष्ठ्यस्य वायोर्नासिकापुटाभ्यां प्रयत्नविशेषाद्वमनं प्रच्छर्दनं विधारणं प्राणायामः ताभ्यां वा मनसः स्थितिं संपादयेत्॥३३॥ ६७॥

प्रसन्ने च वक्ष्यमाणोप्युपायेप्येकाग्रं स्थितिपदं लभते असत्सु पुनर्मैत्र्यादिभावनायां न ते उपायाः स्थित्यैकल्पंत इति तानिदानीं स्थित्युपायानाह प्रच्छर्दनविधारणाभ्यां वा प्राणस्य वा शब्दो वक्ष्यमाणोपायांतरापेक्षो विकल्पार्थः न मैत्र्यादिभावनापेक्षयातैः सह समुच्चयात् प्रच्छर्दनं विवृणोति कौष्ठ्यस्येति प्रयत्नविशेषात् योगशास्त्रविहितात् येन कौष्ठ्यो वायुर्नासिकापुटाभ्यां शनैः रेच्यते विधारणं विवृणोति विधारणं प्राणायामः रेचितस्य प्राणस्य कौष्ठ्यस्य वायोर्यद्वायोर्बहि रेवस्थापनं न तु सहसा प्रवेशनं तदेताभ्यां प्रच्छर्दनविधारणाभ्यां वायोर्लघुकृतशरीरस्य मनः स्थितिपदं लभते अत्र चोत्तरसूत्रगतां स्थितिनिबंधनीति पादान्ते स्थितिपदलक्षणमा[illegible]स्यसंपादयेदित्यर्थः प्राणनसंबंधिनी ये॥ ६७॥ ॥

पा॰टी॰ स्थित्युपायांतरमाह। विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबंधनी व्याचष्टे नासिकाग्रे धारयत इति धारणाध्यानसमाधीन् कुर्वतस्तस्य या दिव्यगंधसं
वित्तत्साक्षात्कारः एवमन्यास्वपि प्रवृत्तिषु योज्यं एतच्चागमात्प्रत्यक्षेण संनोपपत्तितः स्यादेतत् किमेताभिः प्रवृत्तिभिः कैवल्यं प्रत्यनुपयोगिनीभिरित्यत आह
२७ एतावत्तयो त्यैत्रैव कालेनोत्पन्नाश्चित्तमीश्वरविषयायां वा विवेकख्यातिविषयायां वा स्थितौ निबध्नंति न त्वन्यविषया वृत्तिः कथमन्यत्र स्थितिं निबध्नातीत्यत

विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबंधनी नासिकाग्रे धारयतोऽस्य दिव्या गंधसंवित् सा गंधप्रवृत्तिः जिह्वाग्रे रससंवित् तालुनि रूपसंवित्॥
जिह्वामध्ये स्पर्शसंवित् जिह्वामूले शब्दसंवित् इत्येता वृत्तय उत्पन्नाश्चित्तं स्थितौ निबध्नंति संशयं विधमंति समाधिप्रज्ञायां च द्वारी भवंतीति ए
तेन चंद्रादित्यग्रहमणिप्रदीपरत्नादिषु प्रवृत्तिरुत्पन्ना विषयवत्येव वेदितव्या यद्यपि हि तत्तच्छास्त्रानुमानाचार्योपदेशैरवगतमर्थतत्त्वं सद्
भूतमेव भवति एतेषां यथाभूतार्थप्रतिपादनसामर्थ्यात्तथापि यावदेकदेशोऽपि कश्चिन्न स्वकरणसंवेद्यो भवति तावत् सर्वं परोक्षमिव अ
पवर्गादिषु सूक्ष्मेष्वर्थेषु न दृढां बुद्धिमुत्पादयति तस्माच्छास्त्रानुमानाचार्योपदेशोपोद्बलनार्थमेवावश्यं कश्चिदर्थविशेषः प्रत्यक्षीकर्त्तव्यः
तत्र तदुपदिष्टार्थैकदेशप्रत्यक्षत्वे सति सर्वं सुसूक्ष्मविषयमपि आपवर्गाच्छ्रद्धीयते एतदर्थमेवेदं चित्तपरिकर्म निर्दिश्यते अनियतासु वृत्तिषु तद्विष
यायां वशीकारसंज्ञायामुपजातायां समर्थं स्यात्तस्य तस्यार्थस्य प्रत्यक्षीकरणायेति तथा च सति श्रद्धावीर्यस्मृतिसमाधयोऽस्याप्रतिबंधेन भविष्यंतीति॥३५॥

आह संशयं विधमंति अपसारयंति अत एव समाधिप्रज्ञायामिति वस्त्वंतराणामप्यागमसिद्धानां विषयवत्त्वमतिदिशति एतेनेति नन्वागमादिभिरवगतेष्वर्थे
षु कुतः संशय इत्यत आह यद्यपि हीति प्रवृत्त्युल्लेखो योगउपदिष्टार्थैकदेशप्रत्यक्षीकरणे च श्रद्धेति शेषो न्यायते तन्मूलाश्च ध्यानाद्योऽस्याप्रत्यूहं भवंतीति हेरंब
२७

विशोका वा ज्योतिष्मती । विगतशोका दुःखरहिता ज्योतिष्मती ज्योतिरस्या अस्तीति ज्योतिष्मती प्रकाशरूपा हृदयपुंडरीक इति उदरोरसोर्मध्ये पद्ममधोमुखं तिष्ट
तिष्टअष्टदलं रेचकप्राणायामेन तदूर्ध्वमुखं कृत्वा तत्र चित्तं धारयेत् तन्मध्ये सूर्यमंडलं अकारो जागरितस्थानं तस्योपरि चंद्रमंडलं उकारः स्वप्नस्थानं तस्योप
रि वह्निमंडलं मकारः सुषुप्तिस्थानं परं व्योमाध्यात्मिकं ब्रह्मनादं तुरीयस्थानं अर्द्धमात्रमुदाहरंति ब्रह्मवादिनः तत्कर्णिकायामूर्ध्वमुखी सूर्यादिमंडलमध्यगा ब्रह्म
नाडी ततोप्यूर्ध्वं प्रवृत्ता सुषुम्ना नाम नाडी तया खलु बाह्यान्यपि सूर्यादीनि मंडलानि प्रोतानि सा हि चित्तस्थानं तस्यां धारयतो योगिनः प्रवृत्तसंवित् उपजायते उ
पपत्तिपूर्वकं बुद्धिसंविद् आकारमादर्शयति बुद्धिसत्वं हीति आकाशकल्पमिति व्याचिता माह सूर्यादीनां प्रभा सा तां रूपांतराकारेण विकल्पेते नानारूपा भवति मन

विशोका वा ज्योतिष्मती प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबंधनीत्यनुवर्त्तते हृदयपुंडरीके धारयतो या बुद्धिसंवित् बुद्धिसत्वं हि भास्वरमा
काशकल्पं तत्र स्थितिवैशारद्यात्प्रवृत्तिः सूर्येंदुग्रहमणिप्रभारूपाकारेण विकल्पते तथाऽस्मितायां समापन्नं चित्तं निस्तरंगमहोदधि
कल्पं शांतमनंतमस्मितामात्रं भवति यत्रेदमुक्तं तमणुमात्रमात्मानमनुविद्यास्मीत्येवं तावत्संप्रजानीत इत्येषा द्वयी विशोका वि
षयवती अस्मितामात्रा च प्रवृत्तिर्ज्योतिष्मतीत्युच्यते यया योगिनश्चित्तं स्थितिपदं लभत इति ॥ ३५ ॥ ६९ ॥ ॥ ॥

अत्र बुद्धिरभिमतं ननु महत्तत्वं तस्य च सुषुम्नास्थस्य वैकारिकाहंकारजन्मनः सत्वबहुलतया ज्योतीरूपता विवक्षिता तद्विषयगोचरतया व्यापित्वमपि
सिद्धं अस्मिताकार्ये मनसि समापत्तिं दर्शयितुं अस्मितासमापत्तेः स्वरूपमाह तथेति शांतमपगतरजस्तमःतरंगं अनंतं व्याप्ति अस्मितामात्रं तत्पदनंतनानाप्रभारूपं
आगमांतरेणास्यमलं समीकरोति यत्रेदमुक्तं पंचशिखेन तमणुं दुरधिगमत्वात् आत्मानमहंकारस्पदमनुविद्यानुचिंत्य अस्मीत्येवं तावत्संप्रजानीत इति स्यादेतत् नानाप्रभारूपा वि
भवतु ज्योतिः कथं अस्मितामात्ररूपा ज्योतिष्मतीत्यत आह एषा द्वयीति विधूतरजस्तमोमलो अस्मितैव सत्वमयी ज्योतिरिति भावः द्विविधाया अपि ज्योतिष्मत्याः फलमाह

पा॰टी॰ वीतरागविषयंवाचित्तं वीतरागाः कृष्णद्वैपायनप्रभृतयस्तेषां चित्तं तदेवालंबनं तेनोपरक्तमिति स्वप्ननिद्राज्ञानालंबनंवा यदा खल्वयं स्वप्ने विविक्तवन
संनिवेशावर्तिनामृणीमिव चेद्रमंडलात्कोमलमृणालशकलानुकारिभिरंगप्रत्यंगैरूपेतामभिजातचंद्रकांतमणिमयीमतिसुरभिमालतीमल्लिकामालाहृदि
२५ णीं मनोहरां भगवतो महेश्वरस्य प्रतिमामाराधयन्नेव प्रबुद्धः प्रसन्नमनास्तादृशीं तामेव स्वप्नज्ञानालंबिनीभूतामनुचिंतयत्तस्यप्तदेकाकारमनस्तत्रैव वि

वीतरागविषयंवाचित्तं वीतरागचित्तालंबनोपरक्तं वा योगिनश्चित्तं स्थितिपदं लभत इति ॥३६॥ स्वप्ननिद्राज्ञानालंबनंवा स्वप्नज्ञानालंबनं निद्राज्ञान
लंबनंवा तदाकारं योगिनश्चित्तं स्थितिपदं लभत इत्यर्थः ॥३७॥ यथाभिमतध्यानाद्वा यदेवाभिमतं तदेव ध्यायेत् तत्र लब्धस्थितिकमन्यत्रापि स्थिति
पदं लभत इति ॥३८॥ परमाणुपरममहत्त्वांतोऽस्य वशीकारः सूक्ष्मे निविशमानस्य परमाण्वंतं स्थितिपदं लभत इति स्थूले निविशमानस्य परममहत्त्वां ॥५०॥
तं स्थितिपदं चित्तस्य एवं तामुभयकोटिमनुधावतो योऽस्याऽप्रतीघातः स परो वशीकारः तद्वशीकारपरिपूर्णं योगिनश्चित्तं न पुनरभ्यासकृतं परिकर्मापेक्षत इ

तत्तं स्थितिपदं स्थितिपदं लभते निद्रा चेह सात्त्विकी ग्राह्या यस्यां प्रबुद्धस्य सुखमहमस्वाप्समिति प्रत्यवमर्शो भवति एकाग्रं तस्यां मनो भवति तावन्मात्रेण
चोक्तं एतदेव ब्रह्मविदो ब्रह्मलोकरूपमुदाहरंति सुप्ता वसंतीति ज्ञानं च ज्ञेयरूपं तं न शब्दगोचरमपि तु मितिज्ञेयमपि गोचरीक्रियते यथाभिमतध्यानाद्वा किंब
हुनायदेवाभिमतं तत्तद्देवतारूपमिति कथं पुनः स्थितिपदस्याभिभावोवगंतव्य इत्यत आह परमाणुपरममहत्त्वांतोऽस्य वशीकारः व्याचष्टे सूक्ष्मे इति तु हेरंब
कमर्थं पिंडीकृत्य वशीकारपदार्थमाह एवं तामुभयामिति वशीकारस्यावीतरफलमाह तद्वशीकारादिति ॥५०॥ ॥ ॥ ॥ ॥ २५
इतआरभ्य चतुस्त्रिंशत् ३४ सूत्राणि अग्रे लिखितानि

षासंगीकं च वक्ष्यमाणोपयिकं च भूतेंद्रियपरिणामं विभजते एतेन। व्याचष्टे एतेनेति ननु चित्तपरिणामा न्मुक्तं न तु न स्वकरा धर्मलक्षणावस्थापरिणामाः तत्कथं तेषामतिदेश इ
त्यत आह तत्र व्युत्थाननिरोधयोरिति धर्मलक्षणावस्थाशब्दाः परं नोक्ता न तु धर्मलक्षणावस्थाः परिणामा नोक्ता इति संक्षेपार्थः तथाहि व्युत्थाननिरोधसंस्कारयोरित्यत्रैव सूत्रेध
र्मपरिणाम उक्तः इमं च धर्मपरिणामं दर्शयता तेनैव धर्मीकरणे लक्षणपरिणामो विरूद्धितः एवं स्यात् लक्षणपरिणामपरिणामा इति। लक्ष्यते नेनेति लक्षणं कालभेदस्तेन हि लाञ्छितं वस्तु
वस्त्वंतरेभ्यः कालांतरयुक्तेभ्योऽव्यवच्छिद्यत इति निरोधस्त्रिलक्षणः अस्यैव व्याख्यानं त्रिभिरध्वभिर्युक्तः अध्वशब्दः कालवचनः स खल्वनागतं लक्षणमध्वानं प्रथमं हित्वा नातत् किमध्व
र्मत्वमतिपतितेनेत्याह धर्मत्वमनतिक्रांतो वर्त्तमानलक्षणं प्रतिपन्नः यएव निरोधो नागत आसीत्स एव संप्रति वर्त्तमानो न तु निरोधः अनिरोधद्दत्यर्थः वर्त्तमानतारूपव्याख्यानं यत्रास्य स्व

एतेन भूतेंद्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः एतेन पूर्वोक्तेन चित्तपरिणामेन धर्मलक्षणावस्थारूपेण भूतेंद्रियेषु धर्मपरिणामो लक्षणपरि
णामोऽवस्थापरिणामश्च उक्तो वेदितव्यः तत्र व्युत्थाननिरोधयोर्धर्मयोरभिभवप्रादुर्भावौ धर्मिणि धर्मपरिणामो लक्षणपरिणामश्च निरोधस्त्रि
लक्षणस्त्रिभिरध्वभिर्युक्तः स खल्वनागतलक्षणमध्वानं प्रथमं हित्वा धर्मत्वमनतिक्रांतो वर्त्तमानलक्षणं प्रतिपन्नः यत्रास्य स्वरूपेणाभिव्यक्तिरेषोऽस्य द्वितीयोऽध्वा
न चातीतानागताभ्यां लक्षणाभ्यां वियुक्तः तथा व्युत्थानं त्रिलक्षणं त्रिभिरध्वभिर्युक्तं वर्त्तमानलक्षणं हित्वा धर्मत्वमनतिक्रांतमतीतलक्षणं प्रतिपन्नं एषोऽस्य
तृतीयोऽध्वा न चानागतवर्त्तमानाभ्यां लक्षणाभ्यां वियुक्तं एवं पुनर्व्युत्थानमुपसंपद्यमानमनागतलक्षणं हित्वा धर्मत्वमनतिक्रांतं वर्त्तमानलक्षणं प्रतिप
न्नं यत्रास्य स्वरूपाभिव्यक्तौ सत्यां व्यापारः एषोऽस्य द्वितीयोऽध्वा न चातीतानागताभ्यां लक्षणाभ्यां वियुक्तमिति एवं पुनर्निरोध एवं च पुनर्व्युत्थानमिति ॥५॥

रूपेणास्योचितार्थक्रियाकारित्वस्वरूपेणाभिव्यक्तिः समुदाचारः एषोऽस्य प्रथममनागतमध्वानमपेक्ष्य द्वितीयोऽध्वा स्यादेतत् अनागतमध्वानं हित्वा चेद्वर्त्तमानतामापन्नस्तां
च हित्वा अतीततामापत्स्यते हंत भोः अध्वनामुत्पादविनाशौ स्यातां न चैष्यते न ह्यसतः उत्पादः सतो वा विनाशः इष्यत आह न चातीतानागताभ्यां सामान्यात्मनावस्थिताभ्यां वियुक्त इति
अनागतस्य निरोधस्य वर्त्तमानतालक्षणं दर्शयित्वा वर्त्तमानव्युत्थानस्यातीततां तृतीयमध्वानमाह तथा व्युत्थानमिति निवृत्त किं निरोध एवानागतो न व्युत्थानं नेत्याह एवं पुन
र्व्युत्थानमिति व्युत्थानजातसापेक्षया पुनर्भावः न व्यक्त्यपेक्षया न ह्यतीतं पुनर्भवति निस्वरूपाभिव्यक्तिरर्थक्रियाक्षमस्याविर्भावः स चैवं लक्षणपरिणाम उक्तस्तज्जातीये

तिः पुनर्वर्तनतस्तत आह एवं पुनर्व्युत्थानमिति ॥५॥

यो॰ टी॰ धर्मपरिणामस्य चित्तमेवावस्थापरिणाममाह तथेति धर्मिणां वर्त्तमानाध्वनो बलवत्त्वाबलवत्त्वे वस्थानस्याः प्रतिलक्षणं तारतम्यं परिणामः उपसंहरति एष इति धर्मिणाम तृतीयपादः
भेदानां संबंधभेदाभिरूपयति तत्रानुभवानुसारात् धर्मिणा इति तात्विके षु परिणामो गुणानां कादाचित्को नेत्याह एवमिति कस्मात्पुनरयं परिणामः सद्दालनदसल आह
६९ चेति चो हेत्वर्थः वृत्तं प्रचारः एतदेव कुलदस्सन आह गुणस्वाभाव्यमिति उक्तमत्रैव पुरस्तात् सोयं त्रिविधो पि चित्तपरिणामो भूतेंद्रियेषु सूत्रकारेण निर्दिष्ट इत्याह एतेनेति
एष धर्मधर्मिभेदो धर्मरूपिणो भेदमालक्ष्य तत्र भूतानां पृथिव्यादीनां धर्मिणां गवादिर्घटादिर्वा धर्मपरिणामो धर्माणां चातीतानागतवर्त्तमानरूपता लक्षणपरिणामः
वर्त्तमानलक्षणापन्नस्य गवादेर्बाल्यकौमारयौवनवार्द्धकमवस्थापरिणामो घटादीनामपि नवपुरातनावस्थापरिणामः एवमिंद्रियाणामपि धर्मिणां तत्तन्नीलाद्यालोचनं

तथावस्थापरिणामः तत्र निरोधलक्षणेषु निरोधसंस्कारा बलवंतो भवंति दुर्बला व्युत्थानसंस्कारा इति दुर्बला व्युत्थानसंस्कारा इति एष धर्माणामवस्थाप
रिणामः तत्र धर्मिणो धर्मैः परिणामो धर्माणां त्र्यध्वनां लक्षणैः परिणामो लक्षणानामप्यवस्थाभिः परिणाम इत्येवं धर्मलक्षणावस्थापरिणामैः शू
न्यं न क्षणमपि गुणवृत्तमवतिष्ठते चलं च गुणवृत्तं गुणस्वाभाव्यं तु प्रवृत्तिकारणमुक्तं गुणानामिति एतेन भूतेंद्रियेषु धर्मधर्मिभेदात् त्रिविधः परिणामो वेदितव्यः प
रमार्थतस्त्वेक एव परिणामः धर्मिस्वरूपमात्रो हि धर्मो धर्मिविक्रियैवैषा धर्मद्वारा प्रपंच्यत इति तत्र धर्मस्य धर्मिणि वर्त्तमानस्यैवाध्वस्वतीतानागतवर्त्त
मानेषु भावान्यथात्वं भवति न द्रव्यान्यथात्वं यथा सुवर्णभाजनस्य भित्त्वान्यथाक्रियमाणस्य भावान्यथात्वं भवति न सुवर्णान्यथात्वमिति ॥ ६ ॥ ॥

धर्मस्य वर्त्तमानतादिलक्षणपरिणामो वर्त्तमानलक्षणस्य रत्नाद्यालोचनस्य स्फुटत्वास्फुटत्वादिरवस्थापरिणामः सोयमेवंविधो भूतेंद्रियपरिणामो धर्मिणो धर्म१लक्षणावस्था
नां भेदस्याश्रित्य वेदितव्यः अभेदमाश्रित्याह परमार्थतस्त्विति तु शब्दो भेदपक्षाद्विशिनष्टि पारमार्थिकत्वमस्य साध्यते न त्वन्यस्य परिणाम निषिध्यते कस्मात् धर्मिस्वरू
पमात्रो हीति ननु यदि धर्मिविक्रियैव धर्माः कथमसंकरप्रत्ययो लोके परिणामे विस्मृत आह धर्मद्वारेति धर्मलक्षणावस्थाः परिगृह्यंते तत्तद्वारेण धर्मिण एव विक्रियैतेषां
नासंकीर्णा च द्वाराणामभेदेपि धर्मिणाः परस्परासंकरात् ननु धर्माणामभिन्नत्वे धर्मिणो ध्वनो यो भेदे धर्मिणो नन्यत्वेन धर्मेणापीह धर्मिवद्भवितव्यमित्याह तत्र धर्मस्येति भावः
संस्थानभेदः सुवर्णादेर्यथा भाजनस्य रुचिकस्वस्तिकव्यपदेशभेदो भवति न तस्मात्तमन्यथा भवति न तु द्रव्यं सुवर्णमसुवर्णतामुपैति अत्यंतभेदाभावादिति व्याख्यामालाभिसंधिः ॥ ६ ॥ हेरंब
६९

एकांतवादिनं बौद्धमुपस्थापयति अपर आहेति धर्मा एव हि रूपवेदनादयस्तथोत्सन्नाः परमार्थसंतो न पुनः सुवर्णनामकं किंचिदेकमनेकेष्वनुगतं द्रव्यमिति यदि पुनर्निवर्त्तमानेष्वपि धर्मेषु
द्रव्यमनुगतं भवेत्ततो न चितिशक्तिवत्सन्निहितं अपि तु कूटस्थं न परिवर्त्तेत परिणामात्मकं रूपं प्रहाय रूपांतरेण कौटस्थेन परिवृत्तिः यथा चितिशक्तिरन्यथाभावं भजमानेष्वपि धगुणे
तुस्वरूपादप्रच्युता कूटस्थनित्यैवं सुवर्णादिरपि स्यात् न चेष्यते तस्मान्न द्रव्यमतिरिक्तं धर्मेभ्य इति परिहरति अयमदोष इति कस्मादेकांतानभ्युपगमात् यदि चितिशक्तेरिव द्रव्यस्यै
कांतिकं नित्यत्वमभ्युपगच्छेम तत एवमुपालभ्यमहि न त्वैकांतिकं नित्यतामातिष्ठामहे किं तु नदं तत्त्रैलोक्यं ननु द्रव्यमात्रं व्यक्तेरर्थक्रियाकारिणो रूपादपैति कस्मान्नित्यत्वप्रति
षेधात् प्रमाणेन यदि हि घटोऽप्यनेनोपेयात् कपालशर्कराचूर्णादिअवस्थास्वपि व्यक्तो घट इति पूर्ववदुपलब्ध्यर्थक्रियेकुर्यात् तस्मादनित्यं त्रैलोक्यं अस्तु तर्हि नित्यमेवोपलब्ध्य
र्थक्रियारहितत्वेन गगनारविंदवत्तुच्छता स्यादिति आह अपेतमप्यस्ति नाशं ततस्तुच्छतायै नैकांततो नित्यत्वस्यादित्यर्थः कस्माद्विनाशप्रतिषेधात्समालोन तथा हि यतुच्छं न त

अथ परमाह धर्मात्मध्विको धर्मा॰ पूर्वतत्वानि कस्मात् पूर्वापरावस्थाभेदमनुपतितः कौटस्थो न विपरिवर्त्तते यच्च न्यपोस्यादिति अयमदोषश्च क
स्मात् एकांतानभ्युपगमात् तदेतत्त्रैलोक्यं व्यक्तेरपैति नित्यत्वप्रतिषेधात् अपेतमप्यस्ति विनाशप्रतिषेधात् संसर्गाच्चास्य सौक्ष्म्यं सौक्ष्म्याच्चानुपलब्धिरिति
लक्षणपरिणामो धर्मोऽध्वसु वर्त्तमानोऽतीतलक्षणयुक्तोऽनागतवर्त्तमानाभ्यां लक्षणाभ्यामवियुक्त इति यो वर्त्तमानो वर्त्तमानलक्षणयुक्तोऽतीतानाग
गताभ्यां लक्षणाभ्यामवियुक्त इति तथानागतोऽनागतलक्षणयुक्तो वर्त्तमानातीताभ्यां लक्षणाभ्यामवियुक्त यथा पुरुष एकस्यां रक्तो न शेषासु वि

दृक्करावीरप्पुपलब्ध्यर्थक्रियेकरोति यथा गगनारविंदं करोति चैतत्त्रैलोक्यं कदाचादुपलब्ध्यर्थक्रियेद इति न यो सत्ति द्रव्यत्वधर्मलक्षणावस्थायो॰ गित्वाद्योपसं
न तुच्छगगननलिनविषाणादिवत् नाःसहेतुरूपयाभ्यां तथा च धर्मानात्मसंततं निष्पोयेन चितिशक्तिवत्कूटस्थनित्यः स्यात् किंतु कथंचिन्नित्यः तथा च परिणामीति सिद्धं एतेन म
पिंडाद्यवस्थानुकार्याणां घटादीनामनागतानां स्वसंवेदितत्वं संसादितत् अपेतमपि चेदस्ति कस्मान्नोपलभ्यत इति संसर्गात्स्वकारणलयात् सौक्ष्म्यं दर्शनानर्हत्वं ततश्चानु
पलब्धिरिति तदेव धर्मपरिणामं समर्थ्य लक्षणपरिणाममपि लक्षणानां परस्परानुगमनेन समर्थयते लक्षणपरिणाम इति एकैकलक्षणं लक्षणांतराभ्यां समनुगच्छतीति
मित्यर्थः नन्वेकलक्षणयोगे लक्षणांतरेणानुभूयेते तत् कथं तद्योग इत्यत आह यथा पुरुष इति नस्यतुभवाभावः प्रमाणसिद्धमुपलब्धि तद्वदहमेव तत्रात्तत्सद्भावे प्रमाणं सम त उ

हि भवतीति ॥७॥
स्यात् समवायिनस्तद्भिन्नस्य भवत इति ॥७॥

पा०यो०
६१

पयोऽन्तरोपमुखापयति अत्र लक्षणपरिणाम इति यदा धर्मो वर्त्तमानस्तदैव यद्यतीतो ऽनागतश्च तदा त्रयोप्यध्वानः संकीर्येरन् अनुक्रमेण अध्वनां भावे अयद्युत्पादप्रसंग इति भावः परि
हरति तत्र पदिरहार इत्यवर्त्तमानतेव हि धर्माणामनुभवसिद्धा ततः प्राक् पश्चात् कालः सर्वं धर्मं न गमयति न खलु लवसदृशत्वे न च सन्धिनश्यति तदिदमाह एवं हि न चित्तमिति क्रोधोत्तरकाले हि चि
त्तं राग धर्मकं मल्यते यदा च रागः क्रोधसमये ऽनागततलीनतया सत्कथमसावुत्पद्येत अनुत्पन्नश्च मत्तमत्यै नेति भवति वक्तव्याधि कुतो ऽध्वनां संकर इत्यपेक्षते किं चेति किं का
रणमसंकरे वस्तुनः कथं तत्र माह त्रयाणां लक्षणानां युगपत्ता स्ति संभवः क्वचित्नेकस्यां वित्तवृत्तौ कल्पे एकलक्षणानामेकस्य स्वव्यंजकांजनस्य भावो भवेत् संभवेत् लक्ष्या
धानं निरूपणं तया लक्षणानां लक्ष्याकारेण तद्वृत्ता अत्रैव पंचशिखाचार्यसंमतिमाह उक्तं चेति एतच्च प्रागेव व्याख्यातं उपसंहरति तस्मादिति आविर्भावतिरोभावरूपविरुद्धधर्मसंस
र्गादसंकरो ध्वनामिति दृष्टं तमाह यथा रागस्येति पूर्वं क्रोधस्य रागसंबंधावगमो दर्शितः इति इदानीं तु विषयांतरवर्त्तिनो रागस्य विषयांतरवर्त्तिना रागांतरेण संबंधावगम इति दार्ष्टान्तिक

अत्र लक्षणपरिणामे सर्वस्य सर्वलक्षणयोगादध्वसंकरः प्राप्नोतीति परैर्दोष उद्भावितः इति तस्य परिहारः धर्मिणां धर्मत्वं ऽप्रसाध्यं क्षतिचधर्मत्वलक्ष
णभेदोपि वाच्यो न वर्त्तमानस्य पथ एवास्य धर्मत्वं पर्यवसितं न तु धर्मकं स्यात् क्रोधकाले रागस्यासमुदाचारादिति किं च त्रयाणां लक्षणानां युगपदेकस्यां
व्यक्तौ नास्ति संभवः क्रमेण स्वव्यंजकांजनस्य भावो भवेदिति किंच ज्यायाउक्तं च रूपातिशया वृत्त्यतिशयाश्च विरुध्यंते सामान्यानि त्वतिशयैः सह प्रवर्तंते तस्मादसं
करः यथा रागस्यैव क्वचित् समुदाचार इति न तदानीमन्यत्राभावः किं तु केवलं सामान्येन समन्वागत इत्यस्ति तदा तत्र तस्य भावः तथा लक्षणस्येति न
धर्मी त्र्यध्वा अध्वानस्त्रिलक्षिता अलक्षिताश्च तांतामवस्थां प्राप्नुवंतो ऽन्यत्वेन प्रतिनिर्दिश्यंते ऽवस्थांतरतो न द्रव्यांतरतः ॥ २ ॥ ॥ ॥

माहतथा लक्षणस्येति ननु सत्स्यपनेकांताभ्युपगमे ऽभेदोक्तौ निधर्मालक्षणावस्थान्यत्वेतद्भिन्नस्य धर्मिणो ऽन्यत्वप्रसंगः स एव च नेष्यते तदुनुगमानुभवविरोधादित्यत आह धर्मीनत्र्य
ध्वा पतद्भिन्ना धर्मास्त्र्यध्वानः धर्माणामध्वत्रययोगमेव स्फोरयति ते लक्षिता अभिव्यक्ता वर्त्तमानाद्दृतियावत् अलक्षिता अव्यक्ता अनागता अतीताइतियावत् तत्र लक्षितास्तांताम
वस्थां बलवत्तदुर्बलत्वादिकां प्राप्नुवंतो ऽन्यत्वेन प्रतिनिर्दिश्यंते अवस्थांतरतो न द्रव्यांतरतः अवस्थाशब्देन धर्मलक्षणावस्था उच्यंते एतदुक्तं भवति अनुभव एव हि धर्मिणो ध
र्मादिरूपतत्तापापधर्मिकत्वपि धर्मिणमेकमनुगमयन् धर्माश्च परस्परतो व्यावि[illegible]धर्मादीनां भेदाभेदौ व्यवस्थापयति न ह्येकांतिके भेदे धर्मादीनां धर्मिरूपवत् धर्मादित्वं नास्यैकांति
केभेदे गवाश्ववद्धर्मादित्वं स चानुभवो नैकांतिकत्वे भवस्थापयन्नपि धर्म्यादिरूपयजनापापकधर्मकत्वपि धर्मिणमेकमनुगमयन् धर्मा अपि परस्परतो व्यावर्त्तयन्नसत्यमनुभूयमा हेरंब
रेतिजदनुसारिणो वयं न तमतिवर्त्तामहे कथं धर्मा उद्भवात् व्यवस्थापितुमीश इति ॥ ६१ ॥

अत्रैव लौकिकं दृष्टान्तमाह यथैकारेखेति यथा तदेव रेखास्वरूपं तत्तत्स्थानापेक्षया शतादिलेनव्यपदिश्यते एवं तदेव धर्मिरूपं तद्धर्मलक्षणावस्थाभेदेनान्यत्वेन प्रतिनिर्दिश्यत इत्यर्थः दार्ष्टान्तिकार्थ
दृष्टान्तान्तरमाह यथा चैकत्वेपीति अत्रान्तरे परोक्तं दोषमुत्थापयति अवस्थिते ति अवस्थापरिणामे धर्मलक्षणावस्थापरिणामे ० कौटस्थ्यदोषप्रसंग इत्यर्थः धर्मधर्मरूपलक्षणावस्थात्रयं पृच्छति
कथमिति उत्तरं अध्वनो व्यापारेणेति दृष्टः किल योऽनागतो ध्वा तस्य व्यापारः स्वीयस्य वर्तमानत्वेनाव्यवहितत्वादेतोः यदा धर्मो दृष्टिलक्षणः स व्यापारं दाधिकाधारं मैत्री संसत्त
(विनकरोति तदाऽनागतः यदा करोति तदा वर्त्तमानः यदा कृत्वा निवृत्तस्तस्य नैव स्वव्यापारो हि धिकारोऽपारं भातदृतीतः इति एवं त्रैकाल्येपि सत्त्वाद्धर्मधर्मिणोर्लक्षणानामवस्थानां च कौ
टस्थ्यमाप्नोति सर्वदा सत्ताद्विभ्रियत्वं च तुल्यमपि न सर्वदा सत्वे वा नो सादृः तावन्मात्रं च लक्षणं कूटस्थनित्यतायाः न हि चितिशक्तेरपि कूटस्थनित्यतायाः कश्चिदन्यो विशेषद्वति
भावः परिहरति नासौ दोषकस्मात् गुणिनित्यत्वेपि गुणानां विमर्दवैचित्र्यादिभावकत्वं तस्य वैचित्र्याद् एतदुक्तं भवति यथा विसर्वदा सत्त्वं च तुल्यमपि गुणानां तथापि गुणविमर्दवैचि

यथैकारेखा शतस्थाने शतं तद्दशस्थाने दश एकाचैकस्थाने यथा चैकत्वेपि स्त्री माता चोच्यते दुहिता च स्वसा चेति अवस्थापरिणामे कौटस्थ्यप्रसंग दोषः कैश्चिदुक्तः अध्वनो व्यापारेण व
वहितत्वात् यदा धर्मः स्वव्यापारं न करोति तदानागतः यदा करोति तदा वर्त्तमानः यदा कृत्वा निवृत्तस्तदातीत इत्येवं धर्मधर्मिणोर्लक्षणानामवस्थानां च कौटस्थ्यं प्राप्नोतीति परैर्दोष उच्यते नासौ
दोषः कस्मात् गुणिनित्यत्वेपि गुणानां विमर्दवैचित्र्यात् यथा संस्थानमादिमद्धर्ममात्रं शब्दादीनां विनाश्यविनाशिनामेवं लिङ्गमादिमद्धर्ममात्रं सत्त्वादीनां गुणानां विनाश्यविनाशि
नां विनाश्य विनाशिनां तत्र सिद्धविकारसंज्ञेति तत्रेदमुदाहरणं मद्धर्मी पिण्डाकाराद्धर्मान्तरमुपसंपद्यमानो धर्मतः परिणमते घटाकार इति घटाकारो नागतं लक्षणं हित्वा वर्त्तमानलक्ष
णं प्रतिपद्यत इति लक्षणतः परिणमते घटो नवपुराणतामनुभवन्नवस्थापरिणामं प्रतिपद्यत इति धर्मिणोपि धर्मान्तरमवस्था धर्मस्यापि लक्षणान्तरमवस्था परिणामो भेदेनोपदर्शित इति एवं
पदार्थान्तरेष्वपि योज्यमिति त एते धर्मलक्षणावस्थापरिणामा धर्मिस्वरूपमनतिक्रान्ता इत्येक एव परिणामः सर्वानमून् विशेषानभिप्लवते अथ कोयं परिणामः अवस्थि
तस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिः परिणाम इति ॥१३॥ ९॥

अत्रान्तरालसंभूतमद्विकाराविभविति तिरोभावभेदेन परिणामशालितया नकौटस्थ्यं वितिशक्तेस्तु न खलु तत्संभूतविकाराविर्भवितिरोभाव इति कैटस्थ्यं यथाहुः नित्यं तम्भाऽविद्वांसो यत्
स भावो न नश्यतीति विमर्दवैचित्र्यमेव विकारयैचित्र्ये हेतुं दृष्टिकृतौ एकतो च दर्शयति यथा संस्थानं स्थित्या परिणामलक्षणमादिमद्धर्ममात्रं विनाशिनि रोभावि वर्णदादीनां शब्दस्पर्शरू
पगन्धमात्रा णां च कार्यमपेक्ष्य विना शिनामनिरोभाविनां कतौ दर्शयति एवं लिङ्गमिति तस्मिन्विकारसंज्ञा तत्त्वेनाविकारस्य सौ विशिष्टशक्तिरिति भावः तदेवं परिणामक्रमसिद्धो विकृतिं
प्रकृतिं चोदाहरस्य विकृतावेवलेख्यसिद्धायां गुणविमर्दवैचित्र्यं धर्मलक्षणावस्थापरिणामवैचित्र्ये हेतुमुदाहरति तत्रेदमुदाहरणमिति तत्रावयं नियमो लक्षणावस्था[redacted]
परिणामस्य नामद्रति सर्वेषामेव धर्मलक्षणावस्थाभेदानामेवस्थाशब्दवाच्यत्वादेक एवावस्थापरिणामः सर्वसाधारणं द्रष्टा हृधर्मिरूपमिति व्यापकं परिणामलक्षणमाह अवस्थि

...स्येति धर्मशब्द आश्रितत्वेन धर्मलक्षणावस्थावाचकः ।१।

पा.३.१० यस्यैष त्रिविधः परिणामस्तं धर्मिणं सूत्रेण लक्षयति तत्र शांतोदिताव्यपदेश्यधर्मानुपाती धर्मी धर्मोस्यास्तीति धर्मीति नाविज्ञाते धर्मे स शक्यो ज्ञातुमिति धर्मं दर्शयति योग्यतेति धर्मिणोऽस्य
मृदादेः शक्तिरेव चूर्णपिंडघटाद्युत्पत्तिशक्तिरेव धर्मः स चेयं तत्र व्यक्तत्वेन भाव इति यावत् नन्वेवमव्यक्ततया संतस्ते तत्र प्रादुर्भवंतु उदकाहरणादयस्तु कृतेः स्वकारणादनुत्पादिताः कुतः प्राप्ता
६२ इयत उक्तं योग्यतावच्छिन्नेति यासौ घटादीनामुत्पत्तिशक्तिः सोदकाहरणादियोग्यतावच्छिन्ना तेनोदकाहरणाद्यो घटादिभिः स्वकारणादेव प्रादुर्भाविता नाकस्मिका इति भावः अथवा
कै धर्मिण इत्यत्रोत्तरं योग्यतावच्छिन्ना धर्मिण इति को धर्म इत्यत्रोत्तरं शक्तिरेव धर्मस्ते यथा योग्यतैव धर्म इत्यर्थः अतस्तद्वान् धर्मीति सिद्धं भवति तत्सद्भावे प्रमाणमाह फल
प्रसवभेदानुमित एकस्य धर्मिणोऽन्यश्चान्यश्च चूर्णपिंडघटादिरूप इत्यर्थः ।। कार्यभेददर्शनाद्धि भिन्न इतियावत् परिदृष्ट उपलब्धः तत्रानुभवारोहिणो वर्तमानस्य पिंडस्य शांताव्यपदेश्या

तत्र शांतोदिताव्यपदेश्यधर्मानुपाती धर्मी योग्यतावच्छिन्ना धर्मिणः शक्तिरेव धर्मः स च फलप्रसवभेदानुमितसद्भावः एकस्यान्योन्यश्च परिदृष्टः तत्र वर्तमानः स्वव्यापारमनु
भवन् धर्मो धर्मांतरेभ्यः शांतेभ्यश्चाव्यपदेश्येभ्यश्च भिद्यते यदा तु सामान्येन समन्वागतो भवति तदा धर्मिस्वरूपमात्रत्वात् कोसौ केन भिद्येत तत्र च ये खलु धर्मिणो धर्माः
शांता उदिता अव्यपदेश्याश्चेति तत्र शांता ये कृत्वा व्यापारानुपरताः सव्यापारा उदिताः ते चानागतस्य लक्षणस्य समनंतरा वर्तमानस्यानंतरा अतीताः किमर्थमतीतस्यानंतरा
न भवंति वर्तमानाः पूर्वपश्चिमताया अभावात् यथानागतवर्तमानयोः पूर्वपश्चिमता नैवमतीतस्य तस्मान्नातीतस्यास्ति समनंतरः । तदनागत एव समनंतरो भवति वर्तमानस्येति ॥१०॥

भ्यां चूर्णघटाभ्यां भेदमाह तत्र वर्तमान इति यदि न भिद्येत पिंडश्चूर्णघटयोरपि तद्व्यापारस्यापत्तिप्रसंग इति भावः अव्यक्तस्य तु पिंडस्य नो केन भेदसाधनं संभवतीत्या
ह यदा त्विति को सौ केन भेदसाधनेन भिद्येतेति तद्भेदसाधनमभिधाय तं भेदं विभजते तत्र ये खल्विति उदितादिति वर्तमानादित्यर्थः अध्वनां पौर्वापर्यं नियमयति ते चेति चोदयति
किमर्थमिति किं पुनरिति मतीतस्यानंतरा न भवंति वर्तमानाः हेतुमाह पूर्वपश्चिमताभावान्न विपर्ययेण विपर्यये लाभमनुपलब्धिं सूचयति अनुपलंभ एव धर्मे तद्दर्शयति यथाना १०॥
गत वर्तमानयोरिति उपसंहरति तस्मादनागत एव समनंतरः पूर्वत्वेन भवति वर्तमानस्य नातीतः अतीतस्य वर्तमानः पूर्वत्वेन समनंतरो नाव्यपदेश्याः तस्मादध्वनां पविशेषो नातरिति

हेरंब
६२

स्यादेतत् अनुभूयमानानुभूततया उदितातीतौ शक्यानुत्तेनं अव्यपदेश्यस्तु न दृष्टः। अव्यपदेश्यतयैव शक्यमानो नेनु मिसा। शयवान्य छति अथाव्यपदेश्या। के केषु समाम्नाताः अत्रोत
रमात् सर्वं सर्वात्मकमिति यन्नोक्तमिति तदेवोपपादयति जलभूम्योरिति जलस्य हि रसरूपस्पर्शशब्दवतो भूमेश्च गंधरसरूपस्पर्शशब्दवत्याः परिणामिकं वनस्पतिपलतु ला।
दिषु मूलफलप्रसवपल्लवादिगतरसादिवैलक्षण्यं दृष्टं सोयमनेवमात्मिकाया भूमेरन्यादृशस्यवाजलस्यानपरिणामो भवितुमर्हति उपपादितं हिनाम दुलघत इति तथा
स्थावराणां परिणामिके जंगमेषु मनुष्यपशुमृगादिषु रसादिवैचित्र्यं दृष्टं उपयुज्यानाहितेफलादीनि रूपादिभेदं संपदमापादयंति एवं जंगमानां परिणामिकं स्थावरेषु दृष्टं
रुधिरावसेकाल्लिकुदाडिमीफलानि तालफलमात्राणि भवंति उपसंहरति एवं सर्वभूम्यादिसर्वरसाद्यात्मकं तत्र हेतुमाह जात्यनुच्छेदेन जलभूमित्वादिजातेः सर्व
त्रप्रमितायमानत्वेनानुच्छेदात् नन्नु सर्वं चेत्सर्वात्मकं हंत भोः सर्वस्य सर्वदा सर्वत्र सर्वथा सन्निधानात्समानकालं भावानां व्यक्तिः प्रसज्येत न खलु सन्निहिता विविकल्का।

अथाव्यपदेश्याः के सर्वे सर्वात्मकमिति यत्रोक्तं जलभूम्योपादिपरिणामिकां रसादिवैश्वरूप्यं स्थावरेषु दृष्टं तथा स्थावराणां जंगमेषु जंगमानां स्थावरेषु इत्येकं।
सनुच्छेदेन सर्वं सर्वात्मकमिति देशकालाकारनिमित्तापबंधात् न खलु समानकालमात्मनाम भिव्यक्तिरिति य एतेषां भिव्यक्तानभिव्यक्तेषु धर्मेष्वनुपातीसा
मान्यविशेषात्मा सोन्वयी धर्मी यस्य तु धर्ममात्रमेवेदं निरन्वयं तस्य भोग्याभावः कस्मात् अन्येन विज्ञानेन कृतस्य कर्मणोऽन्यत् कथं भोक्तृनाधिक्रियेतेनत
स्य सभावश्च नान्यदृष्टस्य स्मरणमन्यस्यास्तीति वस्तुप्रत्यभिज्ञानाच्च स्थितोन्वयी धर्मी य धात्मभ्युपगतः प्रत्यभिज्ञापि तत्तस्मात्रेदं धर्ममात्रं निरन्वयमिति ॥१४ ॥१५॥

रणं कार्यं विलंबितुमर्हति सत आहृदेशका। लेतिय यकिकारणं सर्वं सर्वात्मकं तथापि योयस्य कार्यस्य देशो यथा कुंकुमस्य काश्मीरः तेषां सत्वेपि पांचालादिषु न समुदाचार इति न कुंकु
मस्य पांचालादिष्वभिव्यक्तिः एवं निदाघे न प्रावृषः समुदाचार इति न तदा शालीनां एवं न मृगी मनुष्यं प्रसूते न तस्यामनुष्याकारः समुदाचार इति एवं नापुण्यवान् सुखरूपं भुंक्ते
न तस्मिन्पुण्यनिमित्तस्य समुदाचार इति तस्मा देशकालाकारनिमित्तानामपबंधात् न समानकालमानां भावानामभिव्यक्तिरिति तदेवं धर्मान्विभजन्निषु धर्मिणां तु
गमं दर्शयति य एतेष्विति सामान्यं धर्मिरूपं विशेषो धर्माः तदात्मोभयात्मक इत्यर्थः तदेकमनुभवसिद्धमपि गत्वा धर्मिणं दर्शयित्वा तमनिच्छतो वैनाशिकस्यलक्षणलिकोवि
ज्ञानमात्रं चित्तमिच्छतोऽनिष्टप्रसंगमुक्तं स्मारयति यस्य त्विति वस्तुप्रत्यभिज्ञानाच्चेति न हि देवदत्तेन दृष्टं यज्ञदत्तः प्रत्यभिजानाति तस्मादेव वानुभविता स एव प्रत्यभिज्ञातेति ॥१५॥

पा॰टी॰ ननुः किमेकस्य धर्मिण एक एव धर्मलक्षणावस्थालक्षणः परिणामः उतानेको धर्मलक्षणावस्थालक्षणाः परिणामाः तत्र किं प्राप्तमेकत्वादेकस्यैव परिणामः न चैकरूपात्कारणा
र्यभेदो भवितुमर्हति तस्याकस्मिकत्वप्रसंगादिति एवं प्राप्ते उच्यते क्रमान्यत्वात्परिणामान्यत्वं एकस्या मृद्रव्यस्य चूर्णपिंडघटकपालकणाकारा परिणतिपरंपरा क्रमवती लोके परी
६२ क्षकैरध्वंसं समीक्ष्यते अन्यश्चेदं चूर्णपिंडयोरानंतर्यं अन्यश्च पिंडघटयोः अन्यश्च घटकपालयोरन्यश्च कपालकणयोरेके त्वपरस्यान्यत्र पूर्वत्वात् सोयं क्रमभेदः परिणामभेदक
भिन्नं कल्पमानः परिणामभेदमापादयति एकोपि धर्मी क्रमेण निपातितः सहकारिसमवधानक्रमेण क्रमवतीं परिणामपरंपरामुद्वहन्नेनामात्मकत्वं सिंकयतीति भावः धर्मपरि

क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥ एकस्य धर्मिण एक एव परिणाम इति प्रसक्ते क्रमान्यत्वं परिणामान्यत्वे हेतुर्भवतीति तथाहि चूर्णमृत्पिंडमृद्घटमृत्कपालमृ
त्कणमृदिति च क्रमः यो यस्य धर्मस्य समनंतरो धर्मः स तस्य क्रमः पिंडः प्रच्यवते घट उपजायत इति धर्मपरिणामक्रमः लक्षणपरिणामक्रमो घटस्याना
गतभावाद्वर्त्तमानभावक्रमः तथा पिंडस्य वर्त्तमानभावादतीतभावक्रमः नातीतस्यास्ति क्रमः कस्मात् पूर्वपरतायां सत्यां समनंतरत्वं सा तु नास्त्यतीतस्य तस्माद्द्वयो
रेव लक्षणयोः क्रमः तथावस्थापरिणामक्रमोपि घटस्याभिनवस्य प्रांते पुराणता दृश्यते सा च क्षणपरंपरानुपातिना क्रमेणाभिव्यज्यमाना परां व्यक्ति
मापद्यत इति धर्मलक्षणाभ्यां च विशिष्टोयं तृतीयः परिणाम इति ॥१५॥ ॥

णामान्यत्ववल्लक्षणपरिणामान्यत्वेऽवस्थापरिणामान्यत्वे च समानं क्रमान्यत्वं हेतुरिति तदेतद्भाष्येणावद्योतते एकस्य धर्मिण इति क्रमं क्रमवतोरभेदमास्थायोक्तं तस्य क्रम इत्यु
क्तं तथावस्थापरिणामक्रम इति तथाहि कीनाशेन कोष्ठागारे प्रयत्नसंरक्षिता अपि व्रीहयो हायनैरनिकृभिः पाणिस्पर्शमात्रविशीर्यमाणावयवसंस्थानाः परमाणुभावमनुभ हेरंब
तो दृश्यंते न चायमभिनवो नाम कस्मादेव प्रादुर्भवितुमर्हति तस्मात्क्षणपरंपराक्रमेण सूक्ष्मतरसूक्ष्मतमस्थूलबृहत्तरबृहत्तमादिक्रमेण प्राप्तेषु विशिष्टोयं लक्षित इति ॥१५॥
६२

न रे क्रमान्यत्वं धर्मधर्मिभेदमपेक्ष्य सतत्र साहत एतदिति आविकारेभ्य आ विकारेभ्य आ च लिङ्गात् आपेक्षिको धर्मधर्मिभावो मृद्द्वारेण चितिमात्रापेक्षया धर्मत्वादि स्यात् धर्मोऽपीति यदा परमार्थ
धर्मिण्यभेदोपचारप्रयोगस्तद्द्वारेण सामानाधिकरण्यद्वारेण धर्म्येव धर्म इत्यायातं तदैक एव परिणामो धर्मिपरिणाम एवैते सर्वे धर्मलक्षणावस्थान्तो धर्मस्वरूपाभिनिवेशात्
तदनेन धर्मिणो दूरोत्सारितं कूटस्थनित्यत्वमिति क्रमप्रायं धर्मपरिणामं प्रतिपाद्य प्रसंगेन चित्तधर्माणां प्रकारभेदमाह चित्तस्येति परिदृष्टाः प्रत्यक्षाः अपरिदृष्टाः परोक्षाः तत्र प्र
यात्मकाः प्रमाणादयो रागादयश्च वस्तुमात्राद्यप्रकाशरूपतामाह स्यादेतत् अपरिदृष्टाश्चेन्न संवेद्यन्त आह अनुमानेन प्रापितो वस्तुमात्रेण सद्भावोपेयो नेनथोक्तरः य

तएते क्रमाः धर्मधर्मिभेदे सति प्रतिलब्धस्वरूपाः धर्मोऽपि धर्मी भवत्यन्यधर्मस्वरूपापेक्षयेति यदा तु परमार्थतो धर्मिण्यभेदोप
चारस्तद्द्वारेण स एवाभिधीयते धर्मस्तदायमेकत्वेनैव क्रमः प्रत्यवभासते चित्तस्य द्वये धर्माः परिदृष्टा अपरिदृष्टाश्च तत्र
प्रत्ययात्मकाः परिदृष्टाः वस्तुमात्रात्मका अपरिदृष्टास्ते च सप्तैव भवन्ति॥ अनुमानेन प्रापितवस्तुमात्रसद्भावाः निरोध
धर्मसंस्काराः परिणामोऽथ जीवनं चेष्टा शक्तिश्च चित्तस्य धर्मा दर्शनवर्जिता इति॥१५॥ ९३॥ ॥ ॥ ॥ ॥

श्चान्मानसा धर्म्मा इह चिन्हें हाग मोऽप्यनुमानं सप्तापरिदृष्टाकारिकया संगृह्णाति निरोधेति निरोधः वृत्तीनामसंप्रज्ञातावस्था चित्तस्यागमतः संस्कारशेषभवोऽनु
मानतः श्वसमधिगम्यते धर्मग्रहणेन पुण्यापुण्ये उपलक्षयति कर्मेति पाठस्तत्रापि तज्जनिते पुण्यापुण्ये एव गृह्येते ते चागमतः सुखदुःखोपभोगदृष्टा
द्वानुमानतो गम्येते संस्कारस्तु स्मृतेरनुमीयते एवं त्रिगुणत्वाच्चित्तस्य चलं च गुणवृत्तमिति प्रतिक्षणं परिणामोऽनुमीयते एवं जीवनं प्राणं प्रयत्नभेदोऽस्य विहितः चित्तस्य ध
र्मः श्वासप्रश्वासाभ्यामनुमीयते एवं चेतसश्चेष्टा क्रियायाः पयाते स्त्रीन्द्रियैः शारीरप्रदेशैर्वा संयुज्यते सापि तत्संयोगाहेवानुमीयते एवं शक्तिरप्युद्भूतानां सू
क्ष्मावस्था चेतसो धर्म्माः स्थूलकार्यानुभवादेवानुमीयन्त इति॥१५॥

अतः परमापदपरिसमाप्तेः संयमविषयस्तद्वशीकारसूचनी विभूतिश्च वक्तव्या तत्रोक्तप्रकारस्य परिणामत्रयमेव तावत्प्रथममुपात्तसकलयोगांगस्य योगिनः संयमविषयमुपक्षिपति यत्रं ननु
पां०यो० यत्र संयमकृतत्वेन साक्षात्कारणं तत्कथं परिणामत्रयसंयमोतीतानागतसाक्षात्कारयेदित्यत आह तेन परिणामत्रयं साक्षात्क्रियमाणं तेषु परिणामेष्वनुगतत्वे अतीतानागतेन द्विषयं तानं संपा
दयति। परिणामत्रयसाक्षात्करणमेव तदंतर्भूतातीतानागतसाक्षात्करणात्मकं भिन्नविषयभेदः संयमसाक्षात्कारयोरित्यर्थः ॥ अयमपरः संयमस्य विषयउपक्षिप्यते शब्दं अत्र
३४ वाचकं शब्दमाश्रित्य प्रथमं तावद्वाग्व्यापारविषयमाह तत्र वागिंद्रियं वर्णाभिव्यंजकमष्टस्थानं यथाह अष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा जिह्वामूलं च दंता
श्च नासिकौष्ठौ च तालु चेति सा वाचा वर्णेष्वेव यथा लोकप्रतीति सिद्धे पर्यवतीमवाचकइत्यर्थः श्रोत्रव्यापारविषयं निरूपयति श्रोत्रं पुनर्वाचकं ध्वनेरुदात्तस्य बाह्येंद्रिया
भिघातिनो यः परिणति भेदो वर्णात्मा तेनाकारेण परिणतं तन्मात्रविषयं ननु वाचकविषयमित्यर्थः यथा लोकप्रतीति सिद्धेभ्यो वर्णेभ्यो वाचकं भिन्नमितिः पदं पुनर्वाचकं पुनर्नाद

अतोऽशौ योगिनउपात्तसर्वसाधनस्य बुभुत्सितार्थप्रतिपत्तये संयमस्य विषयउपक्षिप्यते परिणामत्रयसंयमादतीतानागतज्ञानं धर्मलक्षणावस्थापरिणामेषु संयमाद्यो
गिनो भवत्यतीतानागतज्ञानं धारणाध्यानसमाधित्रयमेकत्र संयमउक्तः तेन परिणामत्रयं साक्षात्क्रियमाणमतीतानागतज्ञानं तेषु संपादयति ॥१६॥ शब्दा
र्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानं तत्र वाग्वर्णेष्वेवार्थवती श्रोत्रं च ध्वनिपरिणाममात्रविषयं पदं पुनर्नादानुसं
हारबुद्धिनिर्ग्राह्यमिति वर्णा एकसमयासंभावित्वात्परं निरनुग्रहात्मानस्ते पदमसंस्पृश्यानुपस्थाप्याविर्भूततिरोभूताश्चेति प्रत्येकमपदस्वरूपा उच्यंते ॥१७॥

नुसंहारबुद्धिनिर्ग्राह्यं यथा प्रतीतिसिद्धात्वादात् वर्णा प्रत्येकं गृहीता अनुपश्चात्संहरत्येकत्वमापादयति गौरित्येतदेकं पदमिति तथा परं गृह्यते यद्यपि प्राचोपि बुद्धयो
वर्णाकारं परमेव प्रत्येकं गोचरयंति तथापि न विशदं प्रथमेन चरमेनु चित्तानेतदति विशदमिति नादानुसंहारबुद्धिनिर्ग्राह्यमुक्तं यस्तु वैज्ञासादेक पदानुभवमविज्ञाय वर्णानेववा
चकान्नातिष्ठते तिमुत्साहवत्तीदृति नेत्थ लक्ष्मी वर्णाः प्रत्येकं वाच्यविषयं पि यमाद्धारणा गद्दतकाद्व श्रीमावलंबनं सहंता वाच्यावारणाद्विपिहरधारणं नतावस्वप्रमा
ल्पः एकस्मादर्थप्रतीतेरनुत्पत्तेः उत्पत्तौ वा द्वितीयादीनामनुच्चारणप्रसंगो निष्फल इति ततो ये कुर्मी लिविशेषानाधा पि न साधनस्य साधनान्यायातिपतनात् तस्मान्
द्वितीयः परिशिष्यते संभवतित्रावगासंहतानां पिठरधारणं एकसमयमभाविनीत्वं वर्णानां नुपैत्यवयोसंभवोतः परस्परमनुग्राह्यानुग्राहकत्वायोगान्ते संभूयापि नार्थधि
यमादरूपमेकमसंस्पृशंतस्तादात्म्येनातएवानुपस्थापयंतः आविर्भूततिरोभूता अशलाकाकल्पाश्च सेकमपदस्वरूपा उच्यते ॥१७॥ श्रीराम ॥ ॥ ॥ हेरंब
३४

८

यदि पुनः पदमेकं तादात्म्येन सर्वशेषु शेषपूर्वर्णेषु स्ततो नोक्तदोषप्रसंगइत्याह वर्णः पुनरेकैकः पदात्मा सर्वाभिधानशक्तिप्रचितः सर्वाभिरभिधानशक्तिभिधानशक्तिभिर्निचितो गोशब्दे गौरन
गरद्रसादिषु गकारो गो साधर्म्याभिधायिषु इत्यादि नत्तदभिधानशक्तिः एवं सोमशोभरिस्यादिषु औकाराघर्थाभिधायिषु पदेषु औवर्णो दृष्ट इतिसो पितत्तदभिधानशक्ति४ एवंसर्वत्रोहनीयं सचै
कैको वर्णो गकारादिः सहकारिवर्णांतरमोकारादि तदैव प्रतियोगि प्रतिसंबंधिवस्य नत्तयोक्तं नस्य भावस्तत्त्वं तस्मादैश्वरूप्यं नानात्वमिवापन्नो न तु नानात्वमापन्नः तस्य नतावदे
व पूर्वोवर्णो गकार उत्तरेण ओकारेण गणगणद्विपदे भ्यो व्यावर्तते तदर्थौकारोगकारेणाशो चिराद्विपदे भ्यो व्यावर्त्य विशेषमोत्तं वाचकेगो पदस्फोटे एव स्थापितोनेनु संहारबुद्धौ
अयमभिसंधिः अर्थाप्रसप्तोहि वर्णैर्नियतक्रमत यापरस्परमसंभवद्विश्राकाः कर्तुमन्न च संसर्ग रद्वारेण नैयायिकानामिवपरमात्मवैनाखवर्गे वाजनयितव्ये नियत
तत्क्रमाणामपि साहि समर्थं तु ध्युपजननेवर्णानामिति सांप्रतं विकल्पासहत्वात् सखल्वयं वर्णानुभवजन्यः संस्कारस्मृति प्रसवहेतुरन्यो वान्येयादिजन्यद्वा

वर्णः पुनरेकैकः पदात्मा सर्वाभिधानशक्तिप्रचित४ सहकारिवर्णांतर
प्रतियोगित्वाद्वैश्वरूप्यमिवापन्नः पूर्वश्चोत्तरश्च पूर्वेणविशेषवत्स्थापित॥१५॥

पूर्वाभिधानोन्नतावनंतरः कल्पनागौरवापत्तेः सएवतावदृदृष्टपूर्वः कल्पनीयस्तस्य चक्रमद्विर्वर्णानुभवैरेकस्यजन्यत्वं नसंभवतीति तज्ज्ञानीयानेकावां
तरसंस्कारकल्पनेऽतिगौरवं न चैषादृतापकहेतुं गमतातस्तदं गतामनुभवतीति न खलु संबंधी धीर्यप्रत्याख्यानं गमज्ञानेंगतामुपैति स्मृतिफलप्रसवानुमितस्तु संस्का
रः स्वरूपेणानुभवविषयत्नियतोन विषयांतरे प्रत्ययमाधातुमुत्सहते अन्यथापत् किंचिदेकैकमनुभूयसर्वः सर्वं जानीयादिति नचप्रत्येकवर्णानुभवज
नित संस्कारपिंडलब्धजन्मस्मृतिर्द्वर्णसमारोहिणो वर्णा४ समाधिगतसहभावाचकादिति सांप्रतं क्रमात्क्रमविपरीतक्रमानुभूतानां तत्र विशेषेणार्थधीज
ननप्रसंगात् न चैतत् स्मरणस्तानं पूर्वानुभववर्तिनाम परापरतौ नौ वरयितार्ह मितस्माद्वर्णेभ्यो संभवन्नर्थप्रत्ययएकपदानुभवमेव स्वनिमित्तमुपकल्पयति॥१५॥

नचैषपदे प्रसंगः तद्धि प्रत्येकमेव प्रसक्तं भेदभिन्नाध्वनयो व्यंजयंतः परस्परविसदृशप्रतत्तस्वव्यंजकध्वनिभिस्तुल्यस्थानप्रयत्ननिष्पन्नाः सदृशा संतोन्येन्यविसदृशोः पदैरप
पां॰टी॰ मेकसदृशमापादयंतः प्रतियोगिभेदेन तत्सादृश्यानां भेदात्तत्प्रधानादेकमप्यनवयवमपिसावयवमिवानेकात्मकमिवावभासयंति यथानियतवर्णपरिमाणसंस्थानमुख
६५ मेकमपिमणिकृपाणदर्पणादयो विभिन्नवर्णपरिमाणसंस्थानमनेकं पादर्शयंति नपरमार्थतः सादृश्योपधानभेदकल्पिताः भागा एवनिर्भागस्य पदस्य वर्णाः तेनतद्धु
र्वर्णात्मनापदभेदेस्फोटमभेदं वनिर्विभागमेवनिर्भेदमिवसभागमिवावलंबते अतोगोपदस्फोटभेदस्यैकस्यगकारभागोगौरादिपदस्फोटस्यसादृश्येन। ननिर्द्धारयिषि
तभागिनमित्यकारेण विशिष्टो निर्द्धारयत्येव मोकारो विभागः शौविरादिपदसदृशतयानशक्तो निर्द्धारयितुंस्वभागिनं गोपदस्फोटमितिगकारेणविशिष्टो निर्द्धारयति अ
सहभाविनामपि च संस्कारद्वारेणास्तिसहभावइति विशेषणविशेष्यभावोपपत्तिः नचभिन्नविषयत्वं संस्कारयोर्भागद्वयविषय॰ योरनुभवयोस्तज्जन्मनोश्चसंस्कार

इत्येवं बहवो वर्णाः क्रमानुरोधिनोर्थसंकेतेनावच्छिन्नाः इयंतएतेसर्वाभिधा
नशक्तिपरिच्छिन्नागकारौकारविसर्जनीयाः सास्नादिमंतमर्थं द्योतयंतीति ॥ ६६ ॥

योरेकपदविषयत्वात् केवलभागानुभवेनपदमव्यक्तमनुभूयते अनुभूयते अनुसंहारधियानुभवयोनिसंस्कारलब्धजन्मनाव्यक्तमितिविशेषः यक्तानुभवाभ्यासांवःसंस्कारा
त्प्राधान्क्रमेणाव्यक्तमनुभवमादधानादृशः यथा दूरादृनस्पतावस्तिप्रत्ययाः व्यक्तवनस्पतिप्रत्यय हेतवः नचैयंविधावर्णानामर्थप्रत्यायनेसंभविनी नोखलुवर्णाध्य
त्येकमव्यक्तमर्थप्रत्ययमादधत्यंतेव्यक्तमितिशक्यंवक्तुं प्रत्यक्षज्ञान एव नियमाद्व्यक्ताव्यक्तत्वस्य वर्णाभिधेयस्त्वर्थप्रत्ययोनप्रत्यक्षः नदेषवर्णैर्भ्योज्यमानः स्फुटएवजायेतनवनाभवेत
न्नत्स्फुटः स्फोटस्यतुध्वनिव्यंग्यस्यप्रत्यक्षस्यसतः स्फुटास्फुटत्वेकल्पेतेद्रूस्वहमानं एवं प्रत्येकवर्णानुभवजनितसंस्कारसहितान्त्यध्वनिलब्धजन्मन्यनुसंहारबुद्धौ संहतावर्णाएकपदस्फोटमा
वमापन्नाः प्रयत्नविशेषव्यंग्यतमापयत्नविशेषसवनियतक्रमापेक्षतयाक्रमान्यत्वेनदृभिव्यंजकप्रयत्नविशेषाभावेनतदभिव्यक्त्यभावप्रसंगात् क्रमानुरोधिनोर्थसंकेतेनावच्छिन्नाः संकेता हेरंब
वच्छेदमेवलौकिकेसभागपदविषयंदर्शयंती इयंतोद्विज्ञास्त्रिचतुराः पंचषावा एते सर्वाभिधानशक्तिपरिच्छिन्नागकारविसर्जनीयाः सास्नादिमंतमर्थमवद्योतयंतीति ॥ ६६ ॥ ६५

तत्र किमिदानीं संकेतानुसारेण वर्णा नामेव वाचकत्वं तथा च न पदं नाम किंचिदेकमिस्यत आह तदेतेषामिति ध्वनिनिमित्तः क्रमो ध्वनिक्रमः उपसंहृतो ध्वनिक्रमो येषु तेते तथोक्ताः बुद्ध्या निर्भास्य
ते प्रकाश्यन्त इति बुद्धिनिर्भासः संकेतेनावच्छिन्नाः स्थूलदर्शी लोकाशयानुरोधेन गकारौकारविसर्जनीयाः इत्यक्रमं गकारादीनाम् अपितद्भागतया तास्मिन वाचकत्वं तानात्मनी स्वनुसारतः
स्तैकमेव पदं वाचकमित्यर्थः एतदेव स्पष्टयति तदेकं पदं लोकबुद्ध्या प्रतीयत इति संबंधः कस्मादेकमित्यत आह एकबुद्धिविषयो गौरित्येकं पदमिति लोकाशयानुरोधे विषयो यत स्तस्मादेवांत
स्य व्यंजकमाह एकप्रयत्नाक्षिप्तमिति रसदितिपदव्यंजकतोयं लाद्धिलक्षणः पत्र रदमिपदव्यंजकस्य प्रयत्नः स चोपक्रमतः रसदितिपदव्यक्तिलक्षणफलावच्छिन्नः पूर्वापरीभूत एकस्तदा क्षिप्तं
भागानां सादृश्योपधानभेदकल्पितानां परमार्थसतामभावाद् भागं अत एव पूर्वापरीभूत भागाभावादक्रमं ननु वर्णाः पूर्वापरीभूतास्ते चास्य भागा इति कथमक्रममभागं चेत्यत आह अव
र्णी न ह्यस्य वर्णा भागाः किंतु सादृश्योपधानभेदात् स्यदमेव तेन तेनाकारेण परमार्थसता प्रथते न हि सिलिङ्गपरत्वदर्पणादिवर्ती निमुखाभिमुखस्य परमार्थसतोवयवा इति बौद्धमनुसंहारबु

तदेकत्वेषामर्थसंकेतेनावच्छिन्नानामुपसंहृतध्वनिक्रमाणांप एको बुद्धिनिर्भासस्तत्सदं वाचकं वाच्यस्य संकेत्यते तदेकपदमेक
बुद्धिविषयं एकप्रयत्नाक्षिप्तमभागमक्रममवर्णं बौद्धमेतस्य वर्णप्रत्ययव्यापारोपस्थापितं परत्र प्रतिपाद्यविषया वर्णैरेवाभिधीय
मानैः श्रूयमाणैः श्रोत्रभिरनादिवाग्व्यवहारवासनानुविद्धयालोकबुध्या सिद्धवत्संप्रतिपत्त्या प्रतीयते ॥१७॥ ॥

इमेनु संहारबुद्धौ विदितमंस वर्णप्रत्ययस्याव्यापारः संस्कारः पूर्ववर्णानुभवजनितसंस्कारसहितस्तेनोपस्थापितं विषयीकृतं वर्णानुभवतत्संस्काराणां चपरद्विषयत्वमनुपपादि
तम धस्तात् तस्मादेतत् अभागमक्रममवर्णं चेत्सदृशसंक स्मादेवं विधं करा चित्रप्रपत्ते न हि लाक्षारसावसेकोपधानापादिता रूपाभावः स्फटिकमणिस्तदकामेः स्वच्छधव
लो नानुभूयते तस्मात् सारमार्थिक एव वर्णा इत्यत आह परत्रेति प्रतिपाद्यविषया वर्णैरिवाभिधीयमानैः कर्त्त्व्ये मानैः श्रूयमाणैः श्रोत्रभिरनादिर्योयं वाग्व्यव
हारो विभक्तवर्णपदनिबंधनस्तज्जनितवासनासाध्यनादिरेव तदनुविद्धया तद्वासितया लोकबुध्या विभक्तवर्णरूषितपदावगाहिन्या सिद्धवत्परमार्थवत्संप्रतिपत्त्यासं
वादेन वक्रभोपरं प्रतीयते एतदुक्तं भवति अस्ति किंचिदुपाधिर्यदुपधेयेन संयुज्यते वियुज्यते च यथा लाक्षादिस्तत्र तद्योगे स्फटिकः स्वाभाविकेन स्वच्छधवलेन रूपेण प्रका
शत इति युज्यते यदप्रत्ययस्य तु प्रपञ्चभेदोपनीतध्वनिभेदाद्धन्यतो नु सादृश्य च सदा सादृश्यदोषतदूषितनतपावर्णा मनैव प्रत्ययजननकत्वमिति कुतो निरूपाधिनः पद
स्य प्रथा यथा तु धूर्वनयः सदृशतात्मनो विपर्यासम्पहितवः उपलंभक मे तेषां विपर्यासम्पकारणं उपायश्चाब्रवीनिपतः पददर्शिनां तानस्यैवच वाधेयं लोके ध्रुवमुपलभ्य वदन्ति ॥१७॥

यतः पदात्मा विभक्तवर्णरूपितः प्रकाशते ऽ तः स्थूलदृष्टिर्लोको वर्णानेव पदस्याभिमन्यमानस्तानेव प्रकारभेदभाजोऽर्थभेदे संकेतयत्याह नस्येति तस्य पदपदस्याजानेत एकस्यापि
पां॰टी॰ संकेतबुद्धितः स्थूलदृष्टिलोककल्पिताः पवर्णात्मना विभागः विभागमाह एतावतां नन्तूनानामधिकानां वा एवंजातीयको नैरंतर्यक्रमविशेषः अनुसंहार एकबुद्ध्युपग्रहः ए
कस्यार्थस्य गोत्वादेर्वाचक इति ननु य एकस्यार्थस्यायं शब्दो वाचक इति संकेतः हंत भोः शब्दार्थयोर्योनेतरेतराध्यासस्तर्हि तत आह संकेतस्त्विति सत्तावा तास्वरूपं यस्य स
६६ तथोक्तः न हि क्रमवत् इ सेव संकेतोऽर्थमवधारयत्यपि तु स्मर्यमाणः एतदुक्तं भवति अभि॰ आकारे एवं संकेते कथं चिद्देदं परिकल्प्य यशोपवृकेति य एषां प्रविभागस्तः सतत्त्रसंयमी भवति
सर्वविस्सर्वभृतरूतादिति तदेवं विकल्पितवर्णभागमेकमनवयवं पदं प्रसाध्य कल्पितपदविभागं वाक्यमेकमनवयवं बुत्साद यिनुमाह सर्वपदेषु चास्ति वाक्यशक्तिः अयमभिसंधिः प
र प्रसाय नाय शब्दः प्रयुज्यते तेन देवन्नपरं प्रतिप्रतिपादयितव्यं यत्तेप्रति पित्सिते तदेव तैः प्रतिपित्सितं यदुपहाना दिगोचरो न च पदार्थमात्रं तत्को चरः किंतु वाक्यार्थ इति वाक्यार्थपदाए

तस्य संकेतबुद्धितः प्रविभागपतमेवंजातीयकोऽनुसंहार एकस्यार्थस्य वाचक इति संकेतस्त्त पदपदार्थयोः स्तितरेतराध्यासरूपः स्मरत्यात्मकः योऽयं
शब्दः सोऽयमर्थो योऽर्थः स शब्द इत्येवमितराध्यासरूपसंकेतो भवतीति एवमेते शब्दार्थप्रसयादितरेतराध्यासात् संकीर्णा॰ गौरितिशब्दो गौ
रित्यर्थो गौरितिज्ञानं य एषां प्रविभागज्ञः स सर्ववित् सर्वपदेषु चास्ति वाक्यशक्तिः वृक्ष इत्युक्तेऽस्तीति गम्यते न सत्तां पदार्थो व्यभिचरती
तीति तथा न घसा धनास्तीति पचतीत्युक्ते सर्वकारकाणामाक्षेपो नियमार्थोऽनुवादः कर्तृकरणकर्मणां चैत्रामिन्नेतंडुलानामिति ॥ १२ ॥

वसर्वे शब्दास्तेन सएवोतेषामर्थः अतो यत्रापि केवलस्य पदस्य प्रयोगस्तत्रापि पदान्तरेणाभिसंबन्धे की क्रियातलोर्थो गम्यते ननु केवलात्केस्मात्तन्मात्रस्यासामर्थ्यात् तथा स्वकेवलमेव
तत्र तत्र वाचकं न तु पदानि तद्भागतया तु तेषामप्यस्ति वाक्यार्थवाचकशक्तिः पदार्थस्व पदभागतया वर्णानां ते न यथा वर्णा एकैकः सर्वपदार्थाभिधानशक्तिच्चितएवं पद
मप्येकं सर्ववाक्यार्थाभिधानशक्तिप्रचितं तदिदमुक्तं सर्वपदेषु चास्ति वाक्यशक्तिः वृक्ष इत्युक्ते अस्तीति गम्यते अध्याहृतास्तिपदसहितं वृक्ष इति पदं वाक्यार्थे वर्तते इति
तत्भागवत्तात् वृक्षपदं तत्र वर्तते कस्मात्पुनरस्तीति गम्यते इत्यत आह न सत्तां पदार्थो व्यभिचरतीति लोके एव हि पदानाम यो वधारणोपायः स वक्वेव लं पदार्थमस्त्यर्थो न भिस्य हेख
स्य सर्वत्र वाक्यार्थं करोति सोयमव्यभिचारः सत्तायाः पदार्थस्य अत एव शब्दवृत्तिविदो व्यवहारेऽयं यत्रान्यत् क्रियापदं नास्ति तत्रास्तिर्भवति र्वापरः प्रयोक्तव्य इति क्रियाभेदाव्यभिचारित्वा
त्पदिकसमुक्ता क्रियाभेदकारकाभिधानं दर्शयति सस्यरूदतिपचतीत्युक्ते हि कारकमात्रस्य तद्व्यपयोग्यस्याक्षेपात्स्वमादन्यत्वात्तिपन्नाद्दृष्टा नामनुवादः तदेवं भदएव वाक्यार्थ इति ॥ १२ ॥
६

तथानपेक्षमपि यद्वाक्यार्थेमानं दृश्यत इति सुतरामस्ति वाक्यशक्तिः पदानामित्याह दृष्टं चेति न वैतावता पि श्रोत्रियादि पदस्य स्वतंत्रस्यैवं विधार्थप्रत्यायनं न यावद्धलादिभिरभिसमासो
स्य भवति तथा चास्या पि वाक्यावयवत्वात्कल्पितत्वमेवेति भावः स्यादेतत् पदानामेव चेद्वाक्यशक्तिः कृतं तर्हि वाक्येन ते एव तदर्थावसायादिसत आह तत्र वाक्य इति उक्तमेतत् न केव
वाला सदा सदार्थ॥ प्रतिरि ।क्षितः प्रतीपतेनपावदेतत्सदंतरेणानि समस्तमिति तथा च वाक्यास्यदान्यपोद्धृत्य कल्पितानि वाक्यार्थाच्चापोद्धृत्य तदेकदेशं कारकं वा क्रियां वा तत्संदं
प्रकल्प्य दिविभागकल्पनया व्याकरणे यत्न व्याख्येयं॥ किमर्थं पुनरेतावता क्लेशेनान्वाख्यायन्त इत्यत आह अन्यथेति घटो भव तिभवतीति इतीतिनामाख्यातयोर्ध्रसाम्यात्॥ एव
एवमश्व स्तं अश्वो यातीति एवमश्वाश्वयः पिव अजोश्व्यः शत्रून्निति नामाख्यातसारूप्यादनिर्ज्ञातं नामत्वेनाख्यातत्वेन वा अन्वाख्यानाभावे निष्कृष्य अज्ञातं न तत्कथं क्रियायां कारके वा व्याक्रियेत व्याख्या
येत तस्माद्वाक्यासदान्यपोद्धृत्य सख्याख्यानयानि तत्त्वाख्यानाद्देवपारमार्थिको विभागः पदानामिति तदेवं शब्दरूपं व्युत्पाद्य शब्दार्थप्रत्ययानां संकेतातादितसंकराणामसंकरमाख्या

इहैवं वाक्यार्थे पदवचनं श्रोत्रियश्छंदोऽधीते जीवति प्राणान्धारयतीति तत्र वाक्ये पदपदार्थाभिव्यक्ति॥ पदं प्रविभज्य व्याकरणीय क्रियावाचकं कारकवाचकं वा अन्यथा भवत्यश्वोऽजपयइत्ये
वमादिषु नामाख्यातसारूप्यादनिर्ज्ञातं कथं कारके क्रियायां वा व्याक्रियेतेति तेषां शब्दार्थप्रत्ययानां प्रविभागः तद्यथा श्वेतते प्रासाद इति क्रियार्थः शब्दः श्वेतः प्रासाद इति कारकार्थः
शब्दः क्रियाकारकार्थ[illegible] तदर्थः प्रत्ययश्च कस्मात् सोयमित्यभिसंबंधादेकाकारप्रत्ययः संकेत इति यश्च श्वेतोऽर्थः स शब्दप्रत्यययोरालंबनीभूतः स हि स्वाभिरवस्थाभिर्विक्रि
यमाणो न शब्दसहगतो न बुद्धिसहगतः एवं शब्द एवं प्रत्ययो नेतरेतरसहगत इति अन्यथा शब्दोऽन्यथार्थोऽन्यथा प्रत्यय इति विभागः एवं तत्प्रविभागसंयमाद्योगिनः सर्वभूतरुतज्ञानं संपद्यत इति

तु उपक्रमते तेषां शब्दार्थप्रत्ययानां विभागः तद्यथा श्वेतते प्रासाद इति क्रियार्थः शब्दः स्फुटतरोऽस्य त्र पूर्वापरीभूतायाः क्रियायाः साध्यरूपायाः सिद्धरूपः क्रियार्थः श्वेत तद्धति भिन्नः श
ब्दः यत्रापि शब्दार्थस्य सिद्धरूपत्वं तत्राप्यर्थात्तस्मिञ्छब्दस्य भेद इत्याह श्वेतः प्रासाद इति कारकार्थः शब्दो भिद्यते तस्यास्य कारकविभक्तेर्भावः अर्थे विभज्यते क्रियाकारकात्तदर्थ एव योऽस्य शब्दयो
र्थः क्रियाकारकात्मा प्रत्ययं विभजते प्रत्ययश्चेति चशब्देन तदर्थद्वयेनास्य इसदमनानुकृष्यते तदत्रान्यपदार्थप्रधानं संबध्यते सएव क्रिया कारकात्मार्थोऽयस्य सतत योक्तः नन्वभेदे
न प्रतीतेः शब्दार्थप्रत्ययानां संकरात्कुतः प्रविभाग इत्याशयवानाह पृच्छति कस्मादिति॥ उत्तरमाह सोयमित्यभिसंबंधादिति संकेतोपाधिरेकाकारप्रत्ययो न तु तात्त्विक इत्यर्थः संकेतस्यानि
मित्तता राशसंकेत इति तत्स्यापरमार्थमाह यस्तु श्वेतोऽर्थ इति अवस्थानवयुरावाऽस्वादयः सहगतः संकीर्णः एवं च प्रविभाग संयमाद्योगिनः सर्वेषां भूतानां पशुमृगसरीसृपवयः तत्स्यर्थः
प्रभृतीनां पानितत्वान्यव्यक्तं पदं तदर्थत्वस्य सयश्चेति तदिह मनुष्यवचनवाच्यप्रत्ययेषु कृतः संयमः समानजातीयतया तेष्वपि कृत एवेति तेषां तदर्थभेदेन तत्त्वसर्वं योगी जानाति

पा॰टी॰ सनं तानजात्यादि संस्काराः स्मृतेर्हेतवो ऽविद्यादिसंस्काराः अविद्यादीनां क्लेशानां हेतवः विपाकोज्जात्यायुर्भोगरूपस्तस्य हेतवो धर्मरूपाः एर्व्वे पुर्भवेष्वभिसंस्कृताः निष्पादिताः स्वकारणैर्यथास
कृतंयंज्ञानं कृतमिति निगम्यते परिणामचेष्टानिरोधशक्तिजीवनान्येव धर्माः श्चित्तस्य तद्रूपपरिदृष्टाश्चित्तधर्मास्तेषु श्रुतेषु अनुमितेषु सपरिकरेषु संयमः संस्काराणां द्वयेषां साक्षात्क्रिया
६१ यै समर्थः ॥ अस्तु तत्रसंयमात्तत् साक्षात्कारः पूर्वजातिसाक्षात्कारस्तु कुत स्तदुत्पत्त आहतन्व देशेति निमित्तं सर्वशरीरमिंद्रियादि च तानुबंधसंस्कारसाक्षात्कार एव नांतरं।

संस्कारसाक्षात्करणात्पूर्वजातिज्ञानं द्वये खल्वमी संस्काराः स्मृतिक्लेशहेतवो वासनारूपा विपाकहेतवो धर्मरूपास्ते पूर्वभवाभिसंस्कृताः परिणामचेष्टानिरोध
शक्तिजीवनधर्मवदपरिदृष्टाश्चित्तधर्मास्तेषु संयमः संस्कारसाक्षात्क्रियायै समर्थः ॥ न च देशकालनिमित्तानुभवैर्विना तेषामस्ति साक्षात्करणं तदित्थं संस्कारसा
क्षात्करणात्पूर्वजातिज्ञानमुत्पद्यते योगिनः परत्राप्येवमेव संस्कारसाक्षात्करणात्परजातिज्ञानमुत्पद्यते अत्रेदमाख्यानं श्रूयते भगवतो जैगीषव्यस्य
संस्कारसाक्षात्करणाद्दशसु महासर्गेषु जन्मपरिणामक्रममनुपश्यतो विवेकजं ज्ञानं प्रादुरभूत् अथ भगवानावट्यस्तनुधरस्तमुवाच दशसु महासर्गेषु भव्यत्वा
दनभिभूतबुद्धिसत्वेन त्वया नरकतिर्यग्गर्भसंभवं दुःखं संपश्यता देवमनुष्येषु पुनः पुनरुत्पद्यमानेन सुखदुःखयोः किमधिकमनुभूतमिति भगवंत
मावट्यं जैगीषव्य उवाच दशसु महासर्गेषु भव्यत्वादनभिभूतबुद्धिसत्वेन मया नरकतिर्यग्भवं दुःखं संपश्यता देवमनुष्येषु पुनः पुनरुत्पद्यमानेन यत्किं
चिदनुभूतं तत्सर्वं दुःखमेव प्रत्यवैमि भगवानावट्य उवाच यदिदमायुष्मतः प्रधानवशित्वमनुत्तमं च संतोषसुखं किमिदमपि दुःखं [illegible] पक्षे
निक्षिप्तमिति भगवाञ्जैगीषव्य उवाच विषयसुखापेक्षयैवेदमनुत्तमं संतोषसुखमुक्तं कैवल्यापेक्षया दुःखमेव बुद्धिसत्वस्यायं धर्मस्त्रिगुणः ॥
त्रिगुणश्च प्रत्ययो हेयपक्षे न्यस्त इति दुःखरूपस्तृष्णातंतुस्तृष्णादुःखसंतापापगमात्तु प्रसन्नमबाधं सर्वानुकूलं सुखमिदमुक्तमिति ॥१८॥ ॥

यक तथा जात्यादि साक्षात्कारमाक्षिपती सर्वः स संस्कारः संयमं परकीयेष्वतिदिशति परत्राप्येवमिति अत्र पक्षे ऽस्मादृशे लं भगवत आवट्यस्य जैगीषव्येण संवादमुपन्यस्यति पत्रानु
श्रूयते दशेति महाकल्पः महासर्गः तनूधरः तनुनिर्माणकायसंपन्नः भव्याः शीभनो विगलितरजस्तमोमलः सत्त्वः प्रधानवशित्वमैश्वर्यं तेन हि प्रधानं विक्षोभयत्येतादृशं कार्येन्द्रिय हेरंब
संपादितम् अनितसीनादृशं रत्नं स्वकीयानि च कार्येन्द्रियसहस्राणि निर्माय तत्र अतिदिदृक्षु विचपर्यन्ते ऽपि विहरतीति संतोषो हि तृष्णाक्षयो बुद्धिसत्वस्य प्रशांतता धर्मः ॥२०॥ ६१

निरूपक्रमं

पन्नं एरम्रसय: मात्रस्य चित्तमात्रस्य साक्षात्करणादिति यथा संस्कारसाक्षात्कारस्तदनुबंध पूर्वजन्मसाक्षात्कारमाक्षिपत्येवं परचित्तसाक्षात्कारो पितदालंबनसाक्षात्कारमाक्षिपेदिति प्राप्ते आह
नचेति सानुबंधसंस्कारविषयो सौ संयमः अयं तु परचित्तमात्रविषयइत्यभिप्रायः कानं पंचात्मकः कायः स च रूपवत्तया चाक्षुषो भवरूपेण हि कायश्चाक्षुषं रूपं चक्षुर्ग्रहणकर्मशक्तिमनुभवति यत्र
यदा रूपे संयमविशेषो योगिना क्रियते तदा रूपस्य ग्राह्यशक्तीरूपवत्कायप्रत्यक्षता हेतुः स्तम्भ्यते तस्माद्ग्राह्यशक्तिस्तंभे स संतद्धानं यो ।यो गिनस्तनः पत्रकी पच क्षुर्जनितेन प्रकाशेन ताने
नासंप्रयोगश्चक्षुर्ज्ञानाविषयत्वं योगिनः कायस्येतियावत् तस्मिन्कर्तव्येतद्धानं कारणमित्यर्थः एतेनेति कायशब्दस्पर्शरसगंधसंयमात्तद्ग्राह्यशक्तिस्तंभे श्रोत्रत्वक्रसनघ्राणप्रकाशासंप्र
योगेनतदन्तर्द्धानमिति सूत्रमूहनीयं सोवा आयुर्विपाकंच कर्म द्विविधं सोपक्रमं चैतत्खलु लोकभाविके कर्मजातस्यायुर्भोगहेतुत्वात् युर्विपाकं तत्र यत्किंचित्कालानपेक्षमेव भोगदानायप्रवृत्तं दत्त

प्रत्ययस्य परचित्तज्ञानं ॥ प्रत्यये संयमात्प्रत्ययस्य साक्षात्करणात्ततः परचित्तज्ञानं ॥१९॥ नवसालंबनं तस्याविषयीभूतत्वात् सालंबनं प्रत्ययं ज्ञानात् समुत्पन्नालंबनेरक्तमिति तिनज्ञानातिपरप्र
त्ययस्यपदालंबनं तद्यो गि चित्तेनना लंबनी कृतं परप्रत्ययमात्रं तु यो गिचित्तस्यालंबनीभूतमिति ॥२०॥ कायरूपसंयमात्तद्ग्राह्यशक्तिस्तंभे चक्षुःप्रकाशासंप्रयोगेऽन्तर्धा
नं कायस्यरूपे संयमाद्रूपस्य या ग्राह्यशक्तिस्तां प्रतिबध्नाति ग्राह्यशक्तिस्तंभे सति चक्षुःप्रकाशासंप्रयोगेऽन्तर्धानमुपपद्यते योगिनः एतेन शब्दाद्यन्तर्धानमुक्तं वेदितव्यं ॥२१॥
सोपक्रमं निरूपक्रमं च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा आयुर्विपाकं कर्म द्विविधं सोपक्रमं निरूपक्रमं तत्र यथार्द्रवस्त्रं वितानितं लघीयसा कालेन शुष्येत्
तथा सोपक्रमं यथा च तदेव संपिंडितं चिरेण संशुष्येत् एवं निरूपक्रमं यथा वाग्निः शुष्के कक्षे मुक्तो वातेन समंततो युक्तः क्षेपीयसा कालेन दहेत् तथा सोपक्रमं यथा वा स एवाग्नि
स्तृणराशौ क्रमशोऽवयवेषु न्यस्तश्चिरेण दहेत् तथा निरूपक्रमं तदैकभविकमायुष्करं कर्म द्विविधं सोपक्रमं निरूपक्रमं च तत्संयमादपरान्तस्य प्रायणस्य ज्ञानं अरिष्टेभ्यो
ति त्रिविधमरिष्टं आध्यात्मिकमाधिभौतिकमाधिदैविकं च तत्राध्यात्मिकं घोषं स्वदेहे पिहितकर्णो न शृणोति ज्योतिर्नेत्रे अवष्टब्धे न पश्यति तथाधिभौतिक
के यमपुरुषान् पश्यति पितॄनतीतानाकस्मात् पश्यति आधिदैविकं स्वर्गं अकस्मात् सिद्धान् वा पश्यंति विपरीतं वा सर्वमिति अनेन वा जानात्यपरान्तमुपस्थितमिति ॥२२॥

वेऊ भोगमत्यावशिष्ट फलप्रदत्तत्वापारं केवलं तत्फलस्य सहसा भोक्तुमकेन शरीरेण शक्यत्वात् किंतु तदेव सोपक्रमांतु पक्रमो व्यापरं स्तत्सहितमित्यर्थः तदेवनुक्तक्रो
क फलं तत्कालमपेक्ष्य फलदानाय व्याप्ति यमालंकरादि न्यामंद व्यापारं निरूपक्रमं एतदेव निर्दर्शनाभ्यां विशदयन्नचेति ॥ अत्रैवातिवैशद्याय निदर्शनांतरं दर्शयति यथावावद्वि
रिति परांतमहाप्रलयमपेक्ष्यापरं तोमरणं तस्मिन्कर्मलि धर्माधर्मयोः संयमात्परान्तज्ञानं ततश्च प्रयोग सोपक्रममात्मनः कर्म विज्ञाय बहून्कायान् निर्माय सहसा फलं भुक्त्वा स्वेच्छया
म्रियते प्रासंगिकमाह अरिष्टेभ्यो वा अरिष्टान्त्रासयंतीत्यरिष्टानि त्रिविधानि मरणचिह्नानि विपरीतं वा सर्वमाहेंद्रजालादिव्यतिरेकेण ग्रामनगरादि स्वर्गमभिमन्यते मनुष्यलोकमेव दे

नैति मैत्र्यादिषु संयमान्मैत्र्यादिबलान्यस्य भवंति तत्र मैत्रीभावनातो बलं येन नु जीवलोकं सुखाकरोति ततः सर्वहितो भवति एवं करुणाबलात् प्राप्ति नो दुःखात् दुःखहेतोर्वास
पा॰यो मुद्धरति एवं मुदिताबलाद् जीवलोकस्य माध्यस्थ्यमाधत्ते वक्ष्यमाणोपधिकं भावनाकारणत्वं समाधेराह भावनातः समाधिर्यः स संयमः यद्यपि धारणाध्यानसमाधित्रयमे
६८ संयमो न समाधिमात्रं तथापि समाध्यनंतरं कार्योत्पादात्समाधेः प्राधान्यात्तत्र संयम उपचरितः क्वचिद्भावनासमाधिरिति पाठः तत्र भावनासमाधी समुदस्य संयममात्रा

मैत्र्यादिषु बलानि मैत्रीकरुणामुदितेति तिस्रो भावनास्तत्र भूतेषु सुखितेषु मैत्रीं भावयित्वा मैत्रीबलं लभते दुःखितेषु करुणां भावयित्वा करु
णाबलं लभते पुण्यशीलेषु मुदितां भावयित्वा मुदिताबलं लभते भावनातः समाधिर्यः स संयमः ततो बलान्यवंध्यवीर्याणि जायंते पापशीले
षु उपेक्षा न तु भावना तत्र तस्यां नास्ति समाधिरिति अतो न बलमुपेक्षातः तत्र संयमाभावादिति बलेषु हस्तिबलादीनि हस्तिबले संयमाद्धस्ति
बलो भवति वैनतेयबले संयमाद्वैनतेयबलो भवति वायुबले संयमाद्वायुबल इत्येवमादि प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्ट
ज्ञानं ज्योतिष्मती प्रवृत्तिरुक्ता मनसस्तस्या य आलोकः तं योगी सूक्ष्मे वा व्यवहिते वा विप्रकृष्टे वार्थे विन्यस्य तमर्थमधिगच्छति॥२५॥

वध्यो हेतू भवतः वीर्यं प्रयत्नस्तेन मैत्र्यादिबलवतः पुंसः सुखितादिषु परेषां कर्त्तव्येषु प्रयत्नोऽवंध्यो भवतीति उपेक्ष्योदासीन्यं न तत्र भावना नापि हेरंब
सुखादिवद्ग्राह्यं किंचिदस्तीति बनिमस्य बले संयमप्रवृत्तस्य बललाभ इति प्रनं सूक्ष्मव्यवहिते विप्रकृष्टे वाऽर्थे संयमेन विन्यस्य तमधिगच्छतीति॥२५॥
६८

मुमात् आध्रुवादितो मेरुपृष्ठात् तदेवमनेन संग्रहश्लोकांतेन संक्षेपतः सप्तलोकाननुपन्यस्य विस्तरेण तद्‌ तत्रावीचेरिति यन शब्देन पृथिव्युच्यते भूमिस्थानमित्यर्थः एतेमहा

भुवनज्ञानं सूर्ये संयमात् तत्प्रस्तारः सप्त लोकाः तत्रावीचेः प्रभृति मेरुपृष्ठं यावदित्येवं भूर्लोकः मेरुपृष्ठादारभ्य आध्रुवात् ग्रहनक्षत्रताराविचित्रोऽन्तरिक्षलोकः ततः परः स्वर्लोकः पंचविधो माहेंद्रस्तृतीयो लोकः चतुर्थः प्राजापत्यो महर्लोकः त्रिविधो ब्राह्मः तद्यथा जनलोकस्तपोलोकः सत्यलोक इति ब्राह्मस्त्रिभूमिको लोकः प्राजापत्यस्ततो महान् माहेंद्रश्च स्वरित्युक्तो दिवि तारा भुवि प्रजा इति संग्रहश्लोकः तत्रावीचेरुपर्युपरि निविष्टाः षण्महानरकभूमयः घनसलिलानलानिलाकाशतमःप्रतिष्ठाः महाकालांबरीषरौरवमहारौरवकालसूत्रांधतामिस्राः यत्र स्वकर्मोपार्जितदुःखवेदनाः प्राणिनः कष्टमायुर्दीर्घमाक्षिप्य जायंते ततो महातलरसातलअतलवितलतलातलपातालाख्यानि सप्त पातालानि भूमिरियमष्टमी सप्तद्वीपा वसुमती यस्याः सुमेरुर्मध्ये पर्वतराजः कांचनः तस्य राजतवैडूर्यस्फटिकहेममणिमयानि शृंगाणि तत्र वैडूर्यप्रभानुरागान्नीलोत्पलपत्रश्यामो नभसो दक्षिणो भागः श्वेतः पूर्वः स्वच्छः पश्चिमः कुरंटकाभ उत्तरः दक्षिणपार्श्वे चास्य जंबूर्यतोऽयं जंबूद्वीपः तस्य सूर्यप्रचाराद्रात्रिंदिवं लग्नमिव वर्तते तस्य नीलश्वेतशृंगवंत उदीचीनास्त्रयः पर्वता द्विसहस्रायामाः तदंतरेषु त्रीणि वर्षाणि नव नवयोजनसाहस्राणि रमणकं हिरण्मयं उत्तराः कुरव इति॥ निषधहेमकूटहिमशैला दक्षिणतो द्विसहस्राः तदंतरेषु त्रीणि नव नवयोजनसाहस्राणि हरिवर्षं किंपुरुषं भारतमिति सुमेरोः प्राचीना भद्राश्वाः माल्यवत्सीमानः प्रतीचीनाः केतुमाला गंधमादनसीमानः मध्ये वर्षमिलावृतं॥२३॥ ॥॥

नरका अनेके पनरका परिवारा बोध्याः एतानेव नामांतरेणोपसंहरति महेति तस्य सूर्यप्रचाराद्रात्रिंदिवं लग्नमिव विवर्तते यमेवास्य भागं सूर्यस्तपति तत्रान्यिव भागमलंकारेतितन्त्र द्दितिमिति॥२३॥

पा॰टी॰ सकलजंबूद्वीपपरिमाणमाह तदेतद्योजनशतसहस्रं किंभूतं योजनानां शतसहस्रमित्याह । सुमेरोर्दिशि दिशि तदर्द्धेन पंचाशतयोजनसहस्रेण व्यूढं संक्षिप्तं यतोऽस्य मध्यस्थः सुमेरुः स
मुद्राश्च सर्षपराशिकल्पाद् इति द्विगुणाद् इति संबंधः यथा सर्षपराशिर्नेत्री हिरा द्रिरिवो छिन्नो नापि भूमिसमस्तथा समुद्रा अपि सर्वः विचित्रैः शैलैरवतंसैरिव भूषवर्त्त
६९

तदेतद्योजनशतसहस्रं सुमेरोर्दिशि दिशि तदर्द्धेन व्यूढं सरवलयं शतसाहस्रायामो जंबुद्वीपः ततो द्विगुणेन लवणोदधिना वलयाकृतिना वेष्टितः ततश्च
द्विगुणाः शाककुशक्रौंचशाल्मलगोमेधपुष्करद्वीपाः समुद्राश्च सर्षपराशिकल्पाः सविचित्रशैलावतंसाः इक्षुरससुरासर्पिर्दधिमंडक्षी
रस्वादूदकसमुद्रपरिवेष्टिताः वलयाकृतयो लोकालोकपर्वतपरिवाराः पंचाशद्योजनकोटिपरिसंख्याताः तदेतत्सर्वं सुप्रतिष्ठितसंस्थानसं
उमध्ये व्यूढं अंडं च प्रधानस्याद्वेत्रवयवो यथा कांडेद्ध योतइति तत्र पाताले जलधौ पर्वतेष्वेतेषु देवनिकायाः असुरगंधर्वकिंनरकिंपुरुषयक्षराक्षस
भूतप्रेतपिशाचअपस्मारकाः घोरा ब्रह्मराक्षसकूष्मांडविनायकाः प्रतिवसंति सर्वेषु द्वीपेषु पुण्यात्मानो देवमनुष्याः सुमेरुस्त्रिदशानामुद्यानभू
मिः तत्र मिश्रवनं नंदनं चैत्ररथं सुमानसमित्युद्यानानि सुधर्मा देवसभा सुदर्शनं पुरं वैजयंतः प्रासादः ॥२७॥ ॥ ॥ ॥

तदुक्तिसविचित्रशैलावतंसाः सद्वीपाः तदेतत्सर्वं सद्वीपविपिननगनीरधिमालवलये लोकालोकपरिवृत्तं विश्वंभवामंडलं ब्रह्मांडमध्ये व्यूढं संक्षिप्तं सुप्रतिष्ठितं संस्थानं द्वेख
सन्निवेशोऽपस्यात् तत्र योऽलं येऽपत्रप्रतिवसंति तत्रैतान्दर्शयति तत्र पाताल इति सुमेरोः संनिवेशमाह सुमेरुरिति ॥२७॥ ॥ ॥ ॥ ॥ ॥ ॥ ६९

तदेवं भूर्लोकं सप्रकारमुक्त्वा सप्रकारमेवांतरिक्षलोकमाह ग्रहेति विक्षेपो व्यापारः स्वर्लोकमादर्शयति माहेंद्रनिवासिन इति देवनिकाया देवजातयः यस्मादपि देवनिकायानां रूपोत्कर्ष
माह सर्वे संकल्पसिद्धा इति संकल्पमात्राद्देवैषां विषया उपनमंति वृंदारकाः पूज्याः कामभोगिनो मैथुनप्रियाः औपपादिक देहाः पित्रोः संयोगमंतरेण कस्माद्देवदिव्यशरीरमेषां धर्मविशेषात्
संस्कृतेभ्योऽण्वादिभ्यो भूतेभ्यो भवतीति महर्लोकमाह महतीति महाभूतवशिनः यद्यदेतेभ्यो रोचते तत्तदेव महाभूतानि प्रपद्यंते तदिच्छातश्च महाभूतानि तेन तेन स्थानेनावतिष्ठंते ध्या
नाहारा ध्यानमात्रतृप्ताः पुष्टा भवंति जनलोकमाह प्रथम इत्युक्तक्रमेण भूतेंद्रियवशिन इति भूतानि पृथिव्यादीनि इंद्रियाणि श्रोत्रादीनि यथा नियोक्तुमिच्छंति तथैव नियुंजते उ

ग्रहनक्षत्रतारकास्तु ध्रुवे निबद्धाः वायुविक्षेपनियमेनोपलक्षितप्रचाराः सुमेरोरुपर्युपरि संनिविष्टा दिवि विपरिवर्त्तंते माहेंद्रनिवासिनः षड्देवनिकायाः त्रिदशा अग्नि
ष्वात्ता याम्याः तुषिता अपरिनिर्मितवशवर्त्तिनः परिनिर्मितवशवर्त्तिनश्चेति ते सर्वे संकल्पसिद्धाः अणिमाद्यैश्वर्योपपन्नाः कल्पायुषो वृंदारकाः कामभोगिनः
औपपादिकदेहाः उत्तमानुकूलाभिरप्सरोभिः कृतपरिवाराः महति लोके प्राजापत्ये पंचविधो देवनिकायः कुमुदा ऋभवः प्रतर्दनाः अंजनाभाः प्रचिताभाः इत्येते महाभू
तवशिनो ध्यानाहाराः कल्पसहस्रायुषः प्रथमे ब्रह्मणो जनलोके चतुर्विधो देवनिकायः आभास्वरा महाभास्वराः सत्यमहाभास्वरा इति ते भूतेंद्रियप्रकृतिवशिनः द्विगु
णद्विगुणोत्तरायुषः सर्वे ध्यानाहाराः कल्पसहस्रायुषः ऊर्ध्वरेतसः ऊर्ध्वमप्रतिहतज्ञानाः अधरभूमिषु अनावृतज्ञानविषयाः तृतीये ब्रह्मणः सत्य
लोके चत्वारो देवनिकायाः अकृतभवनन्यासाः स्वप्रतिष्ठाः उपर्युपरिस्थिताः प्रधानवशिनः यावत्सर्गायुषः ॥ २५ ॥

क्रमापेक्षया द्वितीयं ब्रह्मणस्तपो लोकमाह द्वितीय इति भूतेंद्रियप्रकृतिवशिन इति प्रकृतिः पंचतन्मात्राणि तद्वशिनस्तदिच्छातो हि तन्मात्राण्येव कार्यारंभेण परिणाममंतरद्यागमिनः
द्विगुणेति आभास्वरेभ्यो द्विगुणायुषो महाभास्वरास्तेभ्योऽपि द्विगुणायुषः सत्यमहाभास्वरा इत्यर्थः ऊर्ध्वं सत्यलोके अप्रतिहतज्ञानाः अर्वाचीनेषु प्रस्थानेषु लोकेषु सूक्ष्मव्यवहितादि सर्वं
ज्ञानंतीत्यर्थः तृतीयं ब्रह्मणः सत्यलोकमाह तृतीय इति अकृतो भवनस्य गृहस्य न्यासो यैस्ते तथोक्ताः आधाराभावादेव स्वप्रतिष्ठाः स्वेषु शरीरेषु प्रतिष्ठा येषां ते तथोक्ताः प्रधान
वशिनस्तदिच्छातः सत्त्वरजस्तमांसि प्रवर्त्तंते यावत्सर्गायुषः तथा च श्रूयते ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदमिति ॥ २५ ॥

पा॰टी॰ तदेवं चतुर्णां देवनिकायानां साधारणधर्मानुक्त्वा नामविशेषग्रहणेन धर्मविशेषमाह तत्रेति अच्युता नाम देवाः स्थूलविषयध्यानसुखास्तेन तृप्यंति शुद्धनिवासा नाम देवाः सूक्ष्मविषय
ध्यानसुखाः तेन तृप्यंति सत्याभा नाम देवा इंद्रियविषयध्यानसुखास्तेन तृप्यंति संज्ञासंज्ञिनो नाम देवा अस्मितामात्रध्यानसुखास्तेन तृप्यंति त एते सर्वे संप्रज्ञातसमाधिमुपासते
१० असंप्रज्ञातसमाधिनिष्ठा विदेहप्रकृतिलयाः कस्मान्न लोकमध्ये न्यस्यंत इत्यत आह विदेहप्रकृतिलयास्तु बुद्धिवृत्तिमंतो हि दर्शितविषया लोकयात्रां वहंतो लोके प्रवर्त्तंते न चैवं विदेह

तत्राच्युताः सवितर्कध्यानसुखाः शुद्धनिवासाः सविचारध्यानसुखाः सत्याभा आनंदमात्रध्यानसुखाः संज्ञासंज्ञिनश्चास्मितामात्रध्यानसुखास्त्रैलोक्यमध्ये वर्त्तंते
त एते सप्त लोकाः सर्वे ब्रह्मलोकाः विदेहप्रकृतिलयास्तु मोक्षपदे वर्त्तंत इति न लोकमध्ये न्यस्ता इत्येतद्योगिनां साक्षात्करणीयं सूर्यद्वारे संयमं कृत्वा ततोऽन्यत्रापि एवं
तावद्यावदिदं सर्वं दृष्टमिति चंद्रे ताराव्यूहज्ञानं चंद्रे संयमं कृत्वा ताराव्यूहं विजानीयात् ॥२८॥ ध्रुवे तद्गतिज्ञानं ततो ध्रुवे संयमं कृत्वा ताराणां गतिं विजानीयात् ऊर्ध्वविमानेषु कृत
संयमस्तानि विजानीयात् नाभिचक्रे कायव्यूहज्ञानं नाभिचक्रे संयमं कृत्वा कायव्यूहं विजानीयात् वातपित्तश्लेष्माणस्त्रयो दोषाः धातवः सप्त रसाः त्वक्लोहि
तमांसस्नाय्वस्थिमज्जामेदःशुक्राणि पूर्वं पूर्वमेषां बाह्यमित्येष विन्यासः ॥३०॥ कंठकूपे क्षुत्पिपासानिवृत्तिः जिह्वाया अधस्तात्तंतुः तंतोरधस्तात्कंठः
ततोऽधस्तात्कूपः तत्र संयमात्क्षुत्पिपासे न बाधेते ॥३१॥ कूर्मनाड्यां स्थैर्यं कूपादधः उरसि कूर्माकारा नाडी तस्यां कृतसंयमः स्थिरपदं लभते यथा सर्पो गोधा वेति ॥३२॥२६॥

प्रकृतिलयाः सत्यपि साधिकारत्वे इत्यर्थः तदेतदा सप्तलोकमात्रं चेद्योगिनां साक्षात्करणीयं सूर्यद्वारेण सुषुम्णायां नाड्यां ० न चैतावतिव साक्षात्कारो भवतीत्यत आह एवं
तावदन्यत्रापि सुषुम्णाया अन्यत्रापि योगाभ्यासे प्रदिष्टेषु यावदिदं सर्वं जगद्दृष्टमिति बुद्धिसत्त्वं हि स्वभावत एव विश्वप्रकाशनसमर्थं तमोमलावृतं यत्रैव रजसो
याद्यते तत्रैव प्रकाशयति सूर्यद्वारसंयमोद्घाटितं तु भुवनं प्रकाशयति न चैवमन्यत्रापि प्रसंगस्तत्संयमस्य तावन्मात्रोद्घाटनसामर्थ्यादिति सर्वमवदातं तत्र तत्र जिज्ञासायां योगिन हेरंबू
स्तत्र संयमः एवं क्षुत्पिपासानिवृत्तिहेतुः संयमः स्थैर्यहेतुस्तु प्रसूत्रपदेरूपदिष्टो भाष्येण च निगदव्याख्यातेन व्याख्यातेन व्याख्यातद्गतिव्याख्यातं ॥२६॥ ॥ ॥ १०

स्तनं मूर्धप्रदेशेनसुषुम्नानाडीलक्ष्यतेतत्र संयमइति प्रार्वं प्रतिमाऊहस्तज्ज्ञवंप्रातिभं·प्रसंख्यानहेतुसंयमवतोहितम्प्रकर्षेप्रसंख्यानोद्‌यपूर्वलिंगंपदूहजंज्ञानं तेन सर्वं विजानाति यो
गी तज्ञप्रसंख्यानसन्निधापनेनसंसारात्तारयतीतितारकं हृविन् हृत्पद्मसंख्या चष्टे यदिदमस्मिन्ब्रह्मपुरेदहत्वादात्माब्रह्मतस्य पुरनिलयस्तद्धितत्र विज्ञा

मूर्द्धज्योतिषि सिद्धदर्शनं।शिरःकपाले अंतः छिद्रंप्रभास्वरत्वात्ज्योतिस्तत्र संयमात् सिद्धानां द्यावापृथिव्योरंतरालवर्त्तिनां द
र्शनं॥३३॥ प्रातिभाद्वा सर्वं प्रातिभंनामतारकंतद्विवेकजज्ञानस्यपूर्वरूपंयथोदये प्रभा भास्करस्यैतेनवा सर्वमेवजानातियोगीप्रातिभ
स्यातानस्योसतावितिं॥३४॥हृदये चित्तसंवित् यदिदमस्मिन्ब्रह्मपुरेदहरं पुंडरीके वेश्मतत्र विज्ञानं तस्मिन् संयमात् चित्तसंवित्॥३५॥ ॥

नातिस्वमितिदहरं गं ज्ञं तत्स्वपुंडरीकमधोमुखं वेश्मन सः चित्तसंवेदनत्वहेतुमाह अत्र विज्ञानं तत्रसंयमात् चित्तं विजानातिस्ववृत्तिविशिष्टं ॥२७॥

पा॰टी॰ सत्वं यत्प्रकाशरूपं स्यात् निःस्वच्छस्य नितांतमभिभूतरजस्तमस्तया विवेकख्यातिरूपेण परिणतस्य बुद्धिसत्वस्य प्रतिबिंबितचैतन्यासंकरस्तत्र के वक्तव्या रजस्तमसोर्जडस्वभावयोरित्याशय
वान्सूत्रकारः सत्वपुरुषयोरित्युवाच इममेवाभिप्रायं गृहीत्वा भाष्यकारोप्याह बुद्धिसत्वं प्रख्याशीलमात्रमपि तु विवेकख्यातिरूपेण परिणतमनो नितांतलघुरूपप्रकाशतया स्वंतसारूप्यं
७१ चैतन्येनेसत आह समानेति सत्वेनोपनिबंधनमविनाभावः संबंधः समाने सत्वोपनिबंधने पयोरजस्तमसोक्तितयोः के वशीकारोऽभिभावः असंकरमाह तस्माद्वेति चकारोप्यर्थः ज्ञेनकेव
लं रजस्तमोभ्यामित्यर्थः परिणामिन इति वैधर्म्यपरिणामिनः पुरुषादुक्तं प्रत्यया विशेषः शांतघोरमूढरूपाया बुद्धेश्चैतन्यबिंबोद्ग्राहिणश्चैतन्यस्य शांताद्याकाराध्यारोपः स्वच्छमसद्रूपस्व
च्छसाक्षिरूपप्रतिबिंबितस्य तत्कल्पितं कल्पनारोपः भोगहेतुमाह दर्शितविषयत्वादिति असंकीर्णयोः ख्यातं ननु बुद्धिसत्वमस्तु पुरुषाभिन्नं भोगस्तु पुंसः कुतोभिधत इत्यत आह स भो
गप्रत्ययो भोगरूपः प्रत्ययः सत्वस्य अतः परार्थत्वाद्दृश्यो भोग्यः सत्वं हि परार्थं संहतत्वात्तद्धर्मश्च भोग इति सो विपरार्थः यस्मै च परस्मा असौ तस्य भोक्तुर्भोग्यः अथवानुकू

सत्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात्स्वार्थसंयमात्पुरुषज्ञानं बुधिसत्वं प्रख्याशीलं समानसत्वोपनिबंधने रजस्तमसी वशीकृत्य सत्व
त पुरुषान्यताप्रत्ययेन परिणतं तस्माच्च सत्वात्परिणामिनोत्यंतविधर्मा शुद्धोन्यश्चितिमात्ररूपः पुरुषः तयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो भोगः पुरुष
स्य दर्शितविषयत्वात् स भोगप्रत्ययः सत्वस्य परार्थत्वाद्दृश्यः यस्तु तस्माद्विशिष्टश्चितिमात्ररूपोन्यः पौरुषेयः प्रत्ययस्तत्र संयमात्पुरुषविषया प्रज्ञा जाय
ते न च पुरुषप्रत्ययेन बुद्धिसत्वात्मना पुरुषो दृश्यते पुरुष एव तं प्रत्ययं स्वात्मावलंबनं पश्यति तथा ह्युक्तं विज्ञातारमरे केन विजानीयादिति। ३६॥ "३५"

लवेदनीयस्तु सुखदुःखानुभवो भोगः न चायमात्मानमेवानुकूलयति प्रतिकूलयति वात्मनि वृत्तिविरोधादतोनुकूलनीयप्रतिकूलनीयार्थो भोगः स भोक्ता आत्मा तस्य दृ
श्यो भोग्य इति यस्तु तस्मात्परार्थाद्विशिष्ट इति परार्थादिति पंचम्यन्तपदोध्याहारेण व्याख्या तस्या हेतुः पुरुषविषया चेत्यत आहन्न भोः पुरुषः प्रज्ञायाः प्रत्ययेति प्रज्ञांतरमे
मेव तन्न तत्रेसनवस्थापात इत्यत आह न च पुरुषप्रत्ययेनेति अयमभिसंधिः चित्सा जडः प्रकाश्य तेन जडेन चितिः पुरुषप्रत्ययस्य विद्यमान कथं विद्यमानं प्रकाश्यते चिदात्मत
पराधीनप्रकाशो न जडं प्रकाशयतीत्युक्तं बुद्धिसत्वात्मनेति अचिद्रूपत्वाद्दात्म्येन जडत्वमाह बुद्धिसत्वात्तत्पुरुषप्रतिबिंबावलंबना पुरुषावलंबनं न तु पुरुषप्रकाशना पुरुषालं
बनं बुद्धिसत्वमेव तु तेन प्रत्ययेन संक्रांतपुरुषप्रतिबिंबं पुरुषच्छायापन्नं चैतन्यमालंबनमिति पुरुषार्थः अत्रैव श्रुतिमुदाहरति तथा ह्युक्तमीश्वरेण विज्ञातारमि हेरंब
ति न केन च नेत्यर्थः स च स्वार्थसंयमो न यावत्प्रधानं स्वकार्यं पुरुषत्तानमपि निर्वर्तयति तावत्तस्य पुरस्ताद्याविर्भूतीराधत्ते ताः सर्वा दर्शयति "त्तत्ते" ३५" ७१

तदनेन योगजधर्मानुगृहीतानां मनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानां यथासंख्यं प्रातिभज्ञानदिव्यशब्दाद्यपरोक्षहेतुभाव उक्तः श्रोत्रादीनां पंचानां दिव्यशब्दाद्युपलम्भकानां तांत्रिकी
संज्ञाः श्रावणाद्याः सुगमं भाष्यं कदाचिदात्मविषयसंयमप्रवृत्तस्तत्प्रभावादन्यार्थतः सिद्धीरधिगम्य कृतार्थमन्यः संयमाद्विरमेदत आह ते यः मुच्छितकौतूहिता सिद्धिरभिमन्यते तेन
दुर्गतदरिद्रविणकणिकामपि द्रविणसंभारं योगिनानुसमाहितचित्तेनोपनतेभ्योपि तेभ्यो विरंतव्यं अभिसंहितनाष्ट्रत्रयासंतिकोपशमरूपपरमपुरुषार्थः सर्व एवायं कल्पितान्यनीकास्तु

ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते प्रातिभात् सूक्ष्मव्यवहितविप्रकृष्टातीतानागतज्ञानं श्रावणाद्दिव्यशब्दश्रवणं वेदनाद्दिव्यस्पर्शाधिगमः आदर्शाद्दिव्य
रूपसंवित् आस्वादाद्दिव्यरससंवित् वार्त्तातो दिव्यगंधविज्ञानं इत्येतानि संजायन्ते ॥३६॥ ते समाधावुपसर्गा व्युत्थाने सिद्धयः ते प्रातिभादयः समाहितचि
त्तस्योत्पद्यमाना उपसर्गाः तद्दर्शनप्रत्यनीकत्वात् व्युत्थितचित्तस्योत्पद्यमानाः सिद्धयः ॥३७॥ बंधकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरी
रावेशः लोलीभूतस्य मनसोऽप्रतिष्ठस्य शरीरे कर्माशयवशाद्बंधः प्रतिष्ठेत्यर्थः तस्य कर्मणो बंधकारणस्य शैथिल्यं समाधिबलाद्भवति प्रचारसंवेदनं च चि
त्तस्य समाधिजमेव कर्मबंधक्षयात् स्वचित्तप्रचारसंवेदनाच्च योगी चित्तं स्वशरीरान्निष्कृष्य शरीरान्तरेषु निक्षिपति निक्षिप्तं चित्तं चेन्द्रियाण्यनुपतन्ति यथा मधुक
रराजानं मक्षिका उत्पतन्तमनूत्पतन्ति निविशमानमनुनिविशन्ते तथेन्द्रियाणि परशरीरावेशे चित्तमनुविधीयन्त इति ॥३८ २९॥ ॥ ॥

सिद्धिरुत्पद्यन्त इति सूत्रभाष्ययोरर्थः तदेवं ज्ञानरूपमैश्वर्यमुक्त्वा तद्दर्शनान्तं संयमफलमुक्त्वा क्रियारूपमैश्वर्यं यमफलमाह बंधेति समाधिबलादिति बंधकारणं सं
यमबलात् समाधिग्रहणं प्रचरत्यनेनास्मिन्निति प्रचारः चित्तस्य गमनामार्गो नाड्यः तस्मिन् प्रचारे संयमात्तद्वेदनं तस्माच्च बंधकारणशैथिल्यात्तेन प्रति
बध्यते अप्रतिबद्धमप्युमार्गेणागच्छत् स्वशरीरात् सूक्ष्मं निःक्रामति नवपरत् शरीरमाविशति तस्मात् तत्प्रचारे प्रविष्टानत्यः इंद्रियाण्यपि चित्तानुसारीणि परशरीरे यथाधिष्ठानं निविशन्त इति ॥३८॥

पा॰टी॰ उभ्रसमस्तेंद्रियवृत्तिर्जीवनं प्राणादिलक्षणा प्राणाद्योर्लक्षणं यथाः सतयोत्का द्वयी द्रियाणां वृत्तिर्बाह्याभ्यांतरी च बाह्या रूपाद्यालोचनलक्षणा अभ्यंतरी तु जीवनं स हि प्रयत्नभेदः श
१२ रीरोपगृहीतमारुतक्रियाभेदहेतुः सर्वकरणसाधारणः यथा उक्तं सामान्यकरणवृत्तिः प्राणाद्या वायवः पंचेति तैरस्य लक्षणीयत्वात् तस्य प्रयत्नस्य क्रियाकार्यं
१३ पंचवृत्ती प्राण आनासिकाया हृदयावरवस्थितः अशितपीताहारपरिणतिभेदं रसं तत्र स्थानेसममनुरूपं नयत्समानः आहृदयान्नाभेरस्य स्थानं मूत्रपुरीषगर्भादीनामप

उदानजयाज्जलपंककंटकादिष्वसंग उत्क्रांतिश्च समस्तेंद्रियवृत्तिः प्राणादिलक्षणा जीवनं तस्य क्रिया पंचतयी प्राणो मुखना सि
कागतिरा हृदयवृत्तिः समं नयनात्समान आनाभिवृत्तिः अपनयनादपानः आपादतलवृत्तिः उन्नयनादुदान आशि
रोवृत्तिः॥ व्यापी व्यान इति एषां प्रधानः प्राणः। उदानजयाज्जलपंककंटकादिष्वसंगः उत्क्रांतिश्च प्रायणकाले भवति
तां वशित्वेन प्रतिपद्यते॥३९॥ समानजयाज्ज्वलनं॥ जितसमानस्तेज उपध्मानं कृत्वा ज्वलति॥४०॥ ॥सू०॥ ॥ ॥

नयनहेतुरपानः आनाभेराचपादतलादस्य वृत्तिः उन्नयनादूर्ध्वं नयनादासाहीनामुदानः आनासिकाग्राच्छिरसो वृत्तिरस्य व्यापी व्यानः एषामुक्तानां प्रधानं प्राण उद् हेरंब
क्रमस्कृतेः प्राणमुत्क्रामंतमनु सर्वे उत्क्रामंतीति तदेवं प्राणादीनां क्रियास्थानभेदेन भेदं प्रतिपाद्य सूत्रार्थमवतारयति उदानजयादिति उदानेकृतेकृतसंयमस्तज्जलादिर्न प्रतिहन्यते उ
त्क्रांतिश्च अर्चिरादिमार्गेण भवति प्रायणकाले तस्मात्तामुत्क्रांतिं वशित्वेन प्रतिपद्यते प्राणादिसंयमात्तद्विजयेभूतजयप्रतः क्रियास्थानं विजयादिभेदान्यतिवस्त्रमो समनंतेज ९२
९३
ति: शारीरस्योपध्मानमुक्तं ज्वलनं॥३०॥

स्वार्थसंयमादन्यापरिशिष्टं श्रावणाद्युक्तं संप्रति श्रावणाद्यर्थो देवसंपन्ना श्रावणादि भवती साह श्रोत्रं संयम विषयं श्रोत्राकाशयोः संबंधमाधाराधेयभावमाह सर्वश्रोत्राणामाहंकारिकाणामप्याका
शं कर्णशष्कुलीविवरं प्रतिष्ठा तदायतनं श्रोत्रं तदुपकारापकाराभ्यां श्रोत्रस्योपकारापकारदर्शनात् शब्दानां च श्रोत्रादिसहकारिणा वाधिर्यादिशब्दापहरणे कर्णशष्कुलीसु
षिरूपं न भास्वा श्रयन भोगनाशाधारत्वाच्छब्दमपेक्षते गंधादिगुणसहकारिभिर्घ्राणादिभिर्वा घ्राणादिवत् गंधाद्यालोचने कार्ये दृष्टं अहंकारिकमपि घ्राणरसनत्वक्
क्षुः श्रोत्रं मूर्त्ताधिष्ठानमेव भूतोपकारापकाराभ्यां घ्राणादीनामुपकारापकारदर्शनात् किंतु तद्वत् श्रोत्रमहंकारिकमयः प्रतिमिमनयस्कांतमणिकल्पेन वक्त्रे समुत्पन्नेन वक्त्रे छेन शब्देनाक्ष
ष्टं स्ववृत्ति परंपरया क्रमागतशब्दमालोचयति तथा च दिग्देशवर्त्तिशब्दप्रतीतिः प्रायाभ्यासात्स्वनासति बाधके ऽप्रमाणीकृता भविष्यतीति तथा च यथा खस्य वाकं तुल्यदेशश्रवणानामेव श्रु
ति त्वं सर्वेषां भवतीति तुल्यदेशा ति श्रवणादीनि श्रोत्रादीनि येषां चैत्रादीनां ते तथोक्ताः सर्वेषां श्रवणान्याकाशवर्त्तीनी सर्वः तच्च श्रोत्राधिष्ठानमाकाशं शब्दगुणात
न्मात्राद्युत्पन्नं शब्दगुणकं येन शब्देन सहकारिणा यार्थवादीनां शब्दान् गृह्णाति तस्मात्सर्वेषामेकजातीया श्रुतिः शब्दस्य तदनेन श्रोत्राधिष्ठानत्वमाकाशस्य

श्रोत्राकाशयोः संबंधसंयमाद्दिव्यं श्रोत्रं सर्वश्रोत्राणामाकाशं प्रतिष्ठा शब्दानां च यथोक्तं तुल्यदेशश्रवणानामेकश्रुतित्वं सर्वेषां भवतीति। तच्चैतदाकाशस्य लिंगं अनावर
णं चोक्तं तथा ऽमूर्त्तस्याप्यन्यत्रा ऽनावरणदर्शनाद्विभुत्वमपि प्रख्यातमाकाशस्य शब्दग्रहणनिमित्तं श्रोत्रं बधिराबधिरयोरेकः शब्दं गृह्णात्यपरो न गृह्णातीति तस्मा
त् श्रोत्रमेव शब्दविषयं श्रोत्राकाशयोः संबंधे कृत संयमस्य योगिनो दिव्यं श्रोत्रं प्रवर्त्तते ॥४२॥ ३१॥

णत्वं च दर्शितमिति तच्चैकदेशश्रुतित्वमाकाशस्य लिंगं सा ह्येकजातीया शब्दस्य जि काश्रुतिर्यदाश्रया तदेवाकाशशब्दवाच्यं न हि दृश्यं श्रुतिमंतरेण शब्दव्यक्तिः
न चेदृशी श्रुतिः पृथिव्यादिगुणत्वस्य स्वात्मनि व्यंग्यव्यंजकत्वानुपपत्तेरिति अनावरणं चाकाशलिंगं यथावकाशं न भविष्यत् अन्योन्यं संपीडितानि मूर्त्तानि न सूचिभिरप्यभे
द्यं न तत्प्रसर्वे स्वसर्वेमावृत्तं स्यात् न च मूर्त्तद्रव्याभावमात्रादेव चानावरणमस्य आप्तवचस्य भावाश्रिततेन तदभावे ऽभावान्न न च विनिपातिस्तदाश्रया भवितुमर्हति अपरिणामितया वच्छेदके ता
मात्रा त्र न च दिक्कालादय पृथिव्यादिद्रव्यमपि रिक्ताः संति तन्मात्रस्य वतादृशाः परिणामिभेदे न भस एवेति सर्वमवदातं अनावरणे चाकाशलिंगे सिद्धे यत्र यत्रानावरणं त
त्र तत्र सर्वत्राकाशमिति सर्वगतत्वमपि सिद्धमित्याह तथा ऽमूर्त्तस्येति श्रोत्रस्य तु विप्रमाणमाह शब्दग्रहणेति क्रिया हि कारणसाध्या दृष्टा यथा छिदा द्विधीस्या
दिसाध्या तदिह शब्दग्रहणक्रियया चिकरणसाध्यया भवितव्यं यच्च करणं तच्छ्रोत्रमिति अथास्यावच्छेदस्य एव कस्मात्कारणं न भवतीत्यत आह बधिराबधिरयोरिति॥
अन्यपर्यायिकाभ्यामवधारणं उपलक्षणं चैतत् तथा त्वचो वायुः तेजसी रसनोदकयोर्नासिका पृथिव्योः संबंधसंयमाद्दिव्यलगाघ्रहनीयं ॥३१॥ श्रीरामायनमः॥

पा॰दी॰ कानां कायाकाशसंबंधसंयमाद्वा लघुनि वा तूलादौ कृतसंयमात्समापत्तिं चेतसस्तत्स्थतदंजनतां लब्ध्वेति सिद्धिक्रममाह जलदति अपरमपि परशरीरावेशहेतुं संयमं क्लेशकर्मविपाकक्ष
७८ यहेतुमाह वयः विदेहामाहरशरीरादिति अकल्पितायां महाविदेहायां यउपायस्तत्प्रदर्शनाय कल्पितां विदेहाख्यां पदीति वृत्तिमात्रं कल्पनाज्ञानमात्रं तेन महाविदेहामाहुर्यात्विति उपायो

कायाकाशयोः संबंधसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनं यत्र कायस्तत्राकाशं तस्यावकाशदानात् कायस्य तेन संबंधः प्राप्तिः तत्र कृतसंयमो जि
तातत्संबंधं लघुषु वा तूलादिषु आपरमाणुषु समापत्तिं लब्ध्वा जितसंबंधो लघुर्लघुत्वाच्च जलेपादाभ्यां विहरति ततस्तूर्णनाभितंतुमात्रेवि
हृत्वा रश्मिषु विहरति ततो यथेष्टमाकाशगतिरस्य भवतीति ॥ ४४ ॥ बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः शरीराद्बहिर्म
नसो वृत्तिलाभो विदेहा नाम धारणा सा यदि शरीरप्रतिष्ठस्य मनसो बहिर्वृत्तिमात्रेण भवति सा कल्पितेत्युच्यते या तु शरीरनिरपेक्षा बहिर्भूतस्ये
व मनसो बहिर्वृत्तिः सा खल्वकल्पिता तत्र कल्पितया साधयन्त्यकल्पितां महाविदेहामिति यया परशरीराण्याविशन्ति योगिनः ततश्च
धारणातः प्रकाशात्मनो बुद्धिसत्त्वस्य यदावरणं क्लेशकर्मविपाकत्रयं रजस्तमोमूलं तस्य च क्षयो भवति ॥ ४५ ॥ ३२ ॥ ॥

येनो कल्पिताकल्पितयोराह तत्रेति किं परशरीरावेशमात्रमितो नेत्याह तत्रश्चेति ततो धारणातो महाविदेहाया मनः प्रवृत्ते सिद्धिः क्लेशः कर्मचनाभ्यां विपाकत्रयं जालालघु भोगः
नेदेतद्रजस्तमोमूलं विगलितरजस्तमसः सत्त्वमात्राद्विवेकख्यातिमात्रसमुत्पादनं तदेतद्विपाकत्रयं रजस्तमोमूलतया तदावरकं सत्त्वबुद्धिसत्त्वमावृणोति तत्क्षयाच्च निरावरणं योगिचित्तं यथेष्टं विहरति विजानाति चेति ॥ ४२ ॥ हेरंव ७८

स्थूलपः स्थूलेच स्वरूपं च सूक्ष्मं चान्वयश्चार्थवत्त्वं चेति स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वानि तेषु संयमात्तज्जयः स्थूलमाह तत्रेति पार्थिवाः पाथसीया स्तैजसा वायवीया आकाशीयाः शब्दस्पर्श
रूपरसगंधा यथासंभवं विशेषाः सषड्जगांधारादयः शीतोष्णादयो नीलपीतादयः कषायमधुरादयः सुरभ्यादयः एते हि नामरूपप्रयोजनैः परस्परतो भिद्यंत इति विशेषाः एतेषां पंचपृथि
व्यां गंधवर्जाश्चत्वारोऽप्सु गंधरसवर्जास्त्रयस्तेजसि गंधरसरूपवर्जौ द्वौ नभस्वति शब्द एव काशे त एते इत्थं विशेषाः सह आकारादिभिर्धर्मैः स्थूलशब्देन परिभाषिताः शास्त्रे तत्र पार्थिवास्ताव
द्धर्माः आकारो गौरवं रौक्ष्यं वरणं स्थैर्यमित्ति च वृत्तिभेदः क्षमा कार्श्यं काठिन्यं सर्वभोग्यता अपां धर्माः स्नेहः सौक्ष्म्यं प्रभा शौक्ल्यं मार्दवं गौरवं च शैत्यं रक्षा पवित्रत्वं संधानं चौदकाः गुणाः तैज
सा धर्माः ऊर्ध्वभाक्पाचकं दग्धृ पावकं लघु भास्वरं प्रध्वंस्योजस्वि वै ते ताभ्यां भिन्नलक्षणाः वायवीया धर्मास्तिर्यग्यानं पवित्रत्वमाक्षेपो नोदनं बलं चलमच्छायता रौक्ष्यं वायोर्धर्माः पृथ
धाः आकाशीया धर्माः सर्वतोगतिरव्यूहो विष्टंभश्चेति च त्रयः आकाशधर्मा व्याख्याताः पूर्वधर्मविलक्षणा इति त एते आकारप्रभृतयो धर्माः सहेति आकाशस्य सामान्यविशेषयोगेऽत्वादिः द्वितीयं

स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः तत्र पार्थिवाद्याः शब्दादयो विशेषाः सहाकारादिभिर्धर्मैः स्थूलशब्देन परिभाषिताः एतद्भूता
नां प्रथमं रूपं द्वितीयं रूपं स्वसामान्यं मूर्तिर्भूमिः स्नेहो जलं वह्निरुष्णता वायुः प्रणामी सर्वतोगतिराकाश इत्येतत्स्वरूपशब्दे
नोच्यते अस्य सामान्यस्य शब्दादयो विशेषः तथा चोक्तं एकजातिसमन्वितानामेषां धर्ममात्रव्यावृत्तिरिति ॥ ४४ ॥ ॥ ॥

स्वरूपमाह द्वितीयं रूपं स्वसामान्यं मूर्तिः सांसिद्धिकं काठिन्यं स्नेहो जलं मज्जापुष्टिबलाधानहेतुः वह्निरुष्णता औदर्ये सौर्ये भौमे च सर्वत्रैव तेजसि समवेतोष्णतेति सर्वे
चेताध्वंसि लोरभोद विवक्षयाभिधानं वायुः प्रणामी वहनशीलः तदाह चलेनेन तृणादीनां शरीरस्यापि तेनेन च सर्वगं वायुसामान्यं नामि त्वमनुमीयते सर्वतोगतिकाशः स
र्वत्र शब्दोपलब्धिदर्शनात् श्रोत्राश्रयाकाशगुणेन हि शब्देन पार्थिवादिशब्दोपलब्धिरुपपादितमधस्तात् एतत् स्वरूपशब्देनोक्तं अस्यैव मूर्त्यादिसामान्यस्य शब्दादयः षड्जादयः
उष्णतादयः शुक्लादयः कषायादयः सुरभ्यादयो मूर्त्यादीनां सामान्यानां भेदाः सामान्यान्यपि मूर्त्यादीनि जंबीरजंबीरपनसमलकफलादिनि रसादिभेदा परस्परं व्यावर्त्त
ते तेनैतेषामेते रसादयो विशेषाः तथा चोक्तं एकजातिसमन्वितानां प्रत्येकं पृथिव्यादीनामेकैकया जात्या मूर्त्तिस्नेहादिना समन्वितानामेषां षड्जादिधर्ममात्रव्यावृत्तिरिति ॥ ४४ ॥

तदेवं सामान्यं मूर्त्याद्युक्तं विशेषाश्च शब्दादय उक्ताः॥ ये त्वाहुः॥ सामान्यविशेषाश्रयो द्रव्यमिति तान्प्रत्याह सामान्यविशेषसमुदायोऽत्र दर्शने द्रव्यं ये पुनराश्रयो द्रव्यमास्थिषत तैरपि तत्समुदा
पा०३।० योऽनुभूयमानो नापह्नोतव्यः न चैतद्व्यतिरेकेणान्यो ऽधारो द्रव्यमिति भवति तस्मात्तदेवास्तु द्रव्यं न तु तदाश्रयान्तरं समुदायाच्चैतदाधारं प्रत्यक्षमुपलभामहे यावयवान्योन्या वसमुदायाविव वनदाधार
७५ वंशपत्रपरिधिशिखादिसमूहो द्रव्यमित्युक्तं तत्र समूहमात्रं द्रव्यमिति भ्रमापनुत्तये समूहविशेषो द्रव्यमिति निर्द्धारयितुं समूहप्रकारानाह द्विष्ठो हीति यस्मादेवं तस्मान्न समूहमात्रं द्रव्य
मिति सर्वः समूहः प्रकारान्तरं तिष्ठतीति द्विष्ठः एकं प्रकारमाह प्रत्यस्तमितेति प्रत्यस्तमितो भेदो येषामवयवानां ते तथोक्ताः एतदुक्तं भवति शरीरवृक्षयूथवनशब्देभ्यः समूहः प्रतीय

सामान्यविशेषसमुदायोऽत्र द्रव्यं द्विष्ठो हि समूहः प्रत्यस्तमितभेदावयवानुगतः शरीरं वृक्षो यूथं वनमिति शब्देनोपात्तभेदावयवानुगतः समूहः।
उभये देवमनुष्याः समूहस्य देवा एको भागः॥ मनुष्या द्वितीयो भागः ताभ्यामेवाभिधीयते समूहः॥ ३॥ ।। ।। ।। ।।

मानोऽप्रतीतावयवभेदस्तद्वाचकशब्दाप्रयोगात्समूह एकोऽवगम्यत इति युतायुतसिद्धावयवत्वेन चेतनाचेतनत्वेन च बोद्धव्यः एवं च युतायुतसिद्धावयवत्वं चाग्रे वक्ष्यते द्वितीयं प्रकार
माह शब्देनोपात्तभेदावयवानुगतः समूहः उभये देवमनुष्या इति हि शब्देनोभयशब्दवाच्यस्य समूहस्य भागौ निर्दिष्टावुपात्तौ ननु उभयशब्दान्नावयवभेदो न प्रतीयते तत्कथ हेरंब
मुपात्तभेदावयवानुगम इत्यत आह ताभ्यां भागाभ्यामेव समूहोऽभिधीयते उभयशब्देन भागद्वयवाचिशब्दसहितेन समूहो वाच्यः वाक्यस्य वा समर्थवाचकत्वादिति भावः॥ ७५

पुनर्द्वैविध्यमाह सचेति भेदेनचाभेदेनच विवक्षितः भेदविवक्षितमाह आम्राणांवनं ब्राह्मणानां समूह इति भेद एव षष्ठी श्रुतेः यथा गर्गाणां गोत्रमिति अभेदविवक्षितमाह आम्रवनंब्राह्मण
संघ इति आम्राश्चतेवनं चेति समूहस्य भेदेनोरभेदं विवक्षिता सामानाधिकरण्यमित्यर्थः विधांतरमाह सपुनर्द्विविधः युतसिद्धावयवः समूहः युतसिद्धाः पृथक्सिद्धाः सांतराला अवय
वायस्यसतथोक्तः पर्णवनमिति सोंतरालाहितदवयवा वृक्षाश्चगावश्च अयुतसिद्धावयवश्चसमूहोवृक्षोगौः परमाणुरिति निरंतराहितद्व्यवयवाः सामान्यविशेषावासात्मद्रव्योवेति नद्देते
हुसमूहेषुद्रव्यभूतंसमूहं निर्दिशयति अयुतसिद्धेति तदेवंप्रासंगिकंद्रव्यंयुत्साधप्रकृतमुपसंहरति एतत्स्वरूपमित्युक्तमिति ततीयंरूपंविवक्षुःपठति अथेति उत्तरमाह

सचभेदाभेदविवक्षितः आम्राणांवनंब्राह्मणानांसंघः आम्रवनंब्राह्मणसंघइति सपुनर्द्विविधोयुतसिद्धावयवोऽयुतसिद्धावयवः समूहोवनंसंघइ
ति अयुतसिद्धावयवः संघातःशरीरंवृक्षः परमाणुरिति अयुतसिद्धावयवभेदानुगतः समूहोद्रव्यमितिपतंजलिः एतत्स्वरूपमित्युक्तं अथकिमेषांसू
क्ष्मरूपंतन्मात्रंभूतकारणंतस्यैकोवयवः परमाणुः सामान्यविशेषात्मायुतसिद्धावयवभेदानुगतः समुदायइत्येवंसर्वतन्मात्राणिएतत्ततीयं अथभूतानांच
तुर्थंरूपंख्यातिक्रियास्थितिशीलागुणाः कार्यस्वभावानुपातिनोऽन्वयशब्देनोक्ताः अथैषांपंचमंरूपमर्थवत्वं भोगापवर्गार्थतागुणेष्वेवान्वयिनी गुणास्तन्मा
त्रभूतभौतिकेष्विति सर्वमर्थवत् तेष्विदानींभूतेषुपंचसुपंचरूपेषुसंयमात्तस्यतस्यरूपस्यस्वरूपदर्शनंजयश्चप्रादुर्भवति तत्रपंचभूतस्वरूपाणि
जित्वाभूतजयीभवति तज्जयाद्वत्सानुसारिण्यइवगावोऽस्यसंकल्पानुविधायिन्योभूतप्रकृतयोभवंति ॥४६॥ ॥३५॥ ॥ ॥ ॥

तन्मात्रमिति तस्यैकोवयवः परिणामभेदः परमाणुः सामान्यमूर्तिः शब्दादयोविशेषास्तदात्माः आयुतसिद्धानिरंतरायवयवाः सामान्यविशेषास्तद्भेदेष्वनुगतः समुदायः प
याचपरमाणुः सूक्ष्मएवंसर्वतन्मात्राणिसूक्ष्मंरूपमिति उपसंहरति एतदिति अथभूतानांचतुर्थंरूपंख्यातिक्रियास्थितिशीलागुणाः कार्यस्वभावमनुपतंतिअनुप
तिनुमनुगंतृशीलंयेषांतेतथोक्ताः अतएवान्वयशब्देनोक्ताः अथैषांपंचमंरूपमर्थवत्वंविवृणोति भोगेति नन्वेमपिसंतुगुणा अर्थवंतस्तत्का
र्याणांवस्तथमितिसतआहगुणाइति भौतिकागोघटादयः तदेवंसंयमविषयमुक्त्वा संयमेनतत्फलंचाह तेष्विति भूतप्रकृतयोभूतस्वभावाः ॥३५॥ ॥

संकल्पानुविधाने भूतानां किं योगिनः सिध्यतीत्यत आह तस्य स्थूलसंयमजयाच्चैतस्याः सिद्धयो भवंती सा इतत्राणिमा महानपि भवत्यणुः ४ लघिमा महानपि लघुर्भवेदिषीकातूलवत् आकाशे विहर
यो०टी० ति महिमा अल्पोपि तावान् नागनगनगरपरिमाणो भवति प्राप्तिः सर्वे भावाः सन्निहिता भवंति योगिनः तद्यथा भूमिष्ठ एवांगुल्यग्रेण स्पृशति चंद्रमसं स्वरूपसंयमविजयात् सिद्धिमाह प्राकाम्यमिच्छान
भिघातो नास्य रूपं भूतस्वरूपैर्मूर्त्यादिभिर्निरुध्यते भूमावुन्मज्जति निमज्जति च यथोदके विषयसूक्ष्मसंयमजयात् सिद्धिमाह वशित्वं भूतानि भौतिकानि गोघटादीनि तेषु तेषु वशी स्वतंत्रोऽभ
७६ वति तेषामवश्यः तत्कारणतन्मात्रपृथिव्यादिपरमाणुवशीकारात्तत्कार्यवशीकारः ४ तेन यथा नियथा स्थापयति तानि तथावतिष्ठंते इत्यर्थः ४ अन्वयविषयसंयमजयात् सिद्धिमाह
ईशितत्वं तेषां भूतभौतिकानां जिनमूलप्रकृतिः सन्नयः प्रभव उत्पादो यश्च व्ययो विनाशो यश्च व्यूहो यथावस्थानं तेषामीष्टे अर्थवत्त्वसंयमात्सिद्धिमाह ४ यत्रकामावसा

ततोणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च तत्राणिमा भवत्यणुः ४ लघिमा लघुर्भवति महिमा महान् भवति प्राप्तिरंगुल्यग्रेणापि स्पृशति चंद्रमसं प्राकाम्यमिच्छानभिघातः ४
भूमावुन्मज्जति निमज्जति यथोदके वशित्वं भूतभौतिकेषु वशी भवति अवश्यश्चान्येषां ईशितृत्वं तेषां प्रभावाप्ययव्यूहानामीष्टे यत्रकामावसायित्वं सत्यसंकल्पता
यथा संकल्पस्तथा भूतप्रकृतीनामवस्थानं न च शक्तोपि पदार्थविपर्यासं करोति कस्मात् अन्यस्य यत्रकामावसायिनः पूर्वसिद्धस्य तथाभूतेषु संक
ल्पादिति एतान्यष्टावैश्वर्याणि कायसंपद्वक्ष्यमाणा तद्धर्मानभिघातश्च पृथ्वी मूर्त्या न निरुणद्धि योगिनः शरीरादिक्रियां शिलामप्यनुविशतीति नापः स्निग्धाः
क्लेदयंति नाग्निरुष्णो दहति न वायुः प्रणामी वहति अनावरणात्मकेप्याकाशे भवत्यावृतकायः सिद्धानामप्यदृश्यो भवति॥ ४५॥ ३६॥ ॥ ॥

यित्वं सत्यसंकल्पता विक्षितगुणार्थवत्त्वोदियोगाभ्यपद्यर्थतया संकल्पयति न तस्मै प्रयोजनाय कल्पते विषमप्यमृतकार्ये संकल्प्य भोजयन् जीवयतीति स्यादेतत् यथाशक्ति कार्यवि
पर्यासं करो सेवं पदार्थविपर्यासमपि कस्मान्न करोति तथा च चंद्रमसमादित्यं कुर्यात् कुहूं च सिनीवालीमित्यत आह न च शक्तोपीति न खल्वेते यत्रकामावसायिनस्तत्रभव
तः परमेश्वरस्याज्ञामतिक्रमितुमुत्सहंते शक्तयस्तु पदार्थानां जातिदेशकालावस्थाभेदेनानियतस्वभावाद् इति युज्यते तासु तत्सिद्धानुविधानमिति एतान्यष्टावैश्वर्याणि तद्धर्मा
नभिघात इति अणिमादिप्रादुर्भावेत्यनेनैव तद्धर्मानभिघातसिद्धौ पुनरूपादानं कायसिद्धिवत् एतत्सूत्रोपबद्धसकलविषयसंयमफलवत्त्वज्ञापनाय सुगममन्यत्॥ ३६॥ देवं
७६

कायसंपदमाह॥ रूपसंपत् वज्रस्येव संहननमवयवव्यूहो दृढो निबिडो यस्य स तथा सिद्धिभूतस्य योगिन इंद्रियजयोपायमाह॥ ग्रहणं च स्वरूपं चास्मिता चान्वयश्चार्थवत्त्वं च तेषु संयमस्तस्मा
दित्यर्थः ग्रहीति ग्रहणं तच्च ग्राह्याधीननिरूपणमिति ग्राह्यं दर्शयति सामान्यविशेषात्मेति ग्राह्यमुक्त्वा ग्रहणमाह तत्रेति वृत्तिरालोचनं विषयाकाराधिरोपणमिति यावत् न्यैयायिकाः
सामान्यमात्रगोचरेंद्रियवृत्तिरिति तान्निरस्याह न चेति गम्यत इति ग्रहणं सामान्यमात्रगोचरं यह गृह्णं बाह्येंद्रियं तत्र हि मनो बाह्ये प्रवर्त्तते अन्यथांधबधिराद्यभावप्रसंगात् तद्दृश्यदिन विशे
षविषयमिंद्रियं तेनासावनालोचितो विशेष इति कथं मनसानुव्यवसीयेत तस्मात् सामान्यविषयमिंद्रियालोचनमिति तदेतद्ग्रहणमिंद्रियाणां प्रथमं रूपं द्वितीयं रूपमाह स्वरूपं पुनरिति॥

रूपलावण्यबलवज्रसंहननत्वानि कायसंपत् दर्शनीयाः कांतिमान् अतिशयबलः वज्रसंहननश्चेति॥४६॥ ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिंद्रियजयः सामान्य
विशेषात्मा शब्दादिर्ग्राह्यः तेष्विंद्रियाणां वृत्तिर्ग्रहणं न च तत्सामान्यमात्रग्रहणाकारं कथमनालोचितः स विषयविशेष इंद्रियेण मनसानुव्यवसीयेतेति। स्वरूपं पुनः प्रका
शात्मनो बुद्धिसत्त्वस्य सामान्यविशेषयोरयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिंद्रियं तेषां तृतीयं रूपं अस्मितालक्षणो हंकारस्तस्य सामान्यस्येंद्रियाणि
विशेषाः चतुर्थं रूपं व्यवसायात्मकाः प्रकाशक्रियास्थितिशीला गुणा येषामिंद्रियाणि साहंकाराणि परिणामः पंचमं रूपं गुणेषु यदनुगतं पुरुषार्थ
वत्त्वमिति पंचस्वेतेष्विंद्रियरूपेषु यथाक्रमं संयमः तत्र तत्र जयं कृत्वा पंचरूपजयादिंद्रियजयः प्रादुर्भवति योगिनः॥४७॥ ३१॥ ॥ ॥

अहंकारो हि सत्त्वभागेनानीयेनेंद्रियाण्युपजीजनत् अतोपत्तत्रकरणत्वं सामान्यं यच्च नियतरूपादिविषयत्वं विशेषस्तद्रूपमपि प्रकाशात्मकमित्यर्थः तेषां तृतीयस्यमिति
अहंकारो हींद्रियाणां कारणमिति नियतेंद्रियाणि तत्र तेन भवितव्यमिति सर्वेंद्रियसाधारणात् सामान्यमिंद्रियाणामित्यर्थः चतुर्थं रूपमिति गुणानां हि द्विरूपं व्यवसेयात्मकत्वं व्यवसायात्मक
त्वं च तत्र व्यवसेयात्मकतां ग्राह्यतामास्थाय पंचतन्मात्राणि भूतभौतिकानि निर्मिमीते ४ व्यवसायात्मकत्वं तु ग्रहणरूपमास्थाय साहंकाराणींद्रियाणीत्यर्थः शेषं सुगमं॥३१॥

पा॰टी॰ पंचरूपेंद्रियजयात्सिद्धीराह ततश्च विदेहानामिंद्रियाणां करणभावो विकरणभावः देशः काश्मीरादिः कालोऽतीतादिः विषयः सूक्ष्मादिः सान्वयेंद्रियविजयात्सर्वप्रकृतिविकारवशित्वंप्रधान
७७ जयः ता एता मधुप्रतीका इत्युच्यंते योगशास्त्रनिष्णातैः स्यादेतत् इंद्रियविजयादिंद्रियाणि सविषयाणि वशानि भवंतु प्रधानादीनां तत्कारणानां किमायातमित्यत आह एताश्चेति करण
नामिंद्रियाणां पंचरूपाणि ग्रहणादीनि तेषां जयात् एतदुक्तं भवति नेंद्रियमात्रजयस्यैताः सिद्धयो पि तु पंचरूपस्य तदंतर्गतंच प्रधानादीति तएते ज्ञानक्रियारूपैश्वर्य

ततोमनोजवित्वं विकरणभावः प्रधानजयश्च ॥ कायस्यानुत्तमोगतिलाभो मनोजवित्वं विदेहानामिंद्रियाणामभिप्रेतकालदेशविषयापेक्षो वृत्तिलाभो विकरणभा
वः सर्वप्रकृतिविकारवशित्वंप्रधानजय इत्येतास्तिस्रः सिद्धयो मधुमती मधुप्रतीका उच्यंते एताश्च करणपंचकस्वरूपजयादधिगम्यंते ॥५०॥ सत्त्वपुरु
षान्यताख्यातिमात्रस्यसर्वभावाधिष्ठातृत्वंसर्वज्ञातृत्वंच ॥ निर्धूतरजस्तमोमलस्य बुद्धिसत्त्वस्य परे वैशारद्ये परस्यां वशीकारसंज्ञायां वर्तमानस्य सत्त्वपुरुषान्यताख्यातिमात्ररू
पप्रतिष्ठस्य सर्वभावाधिष्ठातृत्वं सर्वात्मानो गुणा व्यवसायव्यवसेयात्मकाः स्वामिनं क्षेत्रज्ञं प्रत्यशेषदृश्यात्मत्वेनोपस्थिता इत्यर्थः सर्वज्ञातृत्वं सर्वेषां गुणानां शां
तोदिताव्यपदेश्यधर्मत्वेन व्यवस्थितानां यथाक्रमोपारूढं विवेकज्ञातृत्वमित्यर्थः इत्येषा विशोका नाम सिद्धिः यां प्राप्य योगी सर्वज्ञः क्षीणक्लेशबंधनो वशी विहरति ॥५१॥ ॥

हिन वः संयमाः साक्षात्सारं पर्येण च स्वसिद्ध्युपसंहारमुपपादितमप्रश्नाहारेणार्थाः तस्याः सत्त्वपुरुषान्यताख्यातेरवांतरविभूतीर्दर्शयति सत्त्व ॥ निर्धूतरजस्तमोमलतया वैशारद्यं त
तः परा वशीकारसंज्ञा रजस्तमोभ्यामनुपप्लुतं हि चित्तस्य सत्त्वमवश्यमासीत् तदुपशमे तद्दृश्यं योगिनो वशिनः तस्मिन्नशेषयोगमनः सत्त्वपुरुषान्यताख्यातिमात्ररू
पप्रतिष्ठस्य सर्वभावाधिष्ठातृत्वं एतदेव विवृणोति सर्वात्मान इति व्यवसायव्यवसेयात्मानो जडप्रकाशरूपा इत्यर्थः तदनेन क्रियैश्वर्यमुक्तं ज्ञानैश्वर्यमाह सर्वज्ञा हेरंब
तृत्वमिति अस्या अपि सिद्धिविधायाः सिद्धिविधायाः सिद्धेर्वैराग्यापयोगिजनप्रसिद्धां संज्ञामाह एषा विशोकेति क्लेशाश्च बंधनानि च कर्माणि तानि क्षीणानि यस्य स तथा ॥२८॥ ॥ ७७

संयमांतराणां पुरुषार्थाभासफलत्वात् विवेकख्यातिसंयमार्थवत्तां दर्शयितुं विवेकख्यातेः परवैराग्योपजननद्वारेण कैवल्यं फलमाह तत्त्वं यदास्य योगिनः क्लेशक
र्मक्षये एवं ज्ञानं भवति किंभूतमित्याह सत्वस्यायं विवेकप्रत्ययो धर्म्मः शेषं तत्र तत्र व्याख्यातत्वात्सुगमं संप्रति कैवल्यसाधने प्रवृत्तस्य योगिनः प्रत्यूहसंभवे तन्निराकर
णमुपदिशति स्थांगात् तानि स्थानानि येषां संति ते स्थानिनो महेंद्रादयस्तैरुपमंत्रणं तस्मिन् संगस्मयप्रत्ययोरकरणमुपदिशति पुनरनिष्टप्रसंगात् तत्र यं देवाः स्थानैरुपमंत्रयंते तं यो

तद्वैराग्यादपि दोषबीजक्षये कैवल्यं यदास्यैवं भवंति क्लेशकर्मक्षये सत्त्वस्यायं विवेकप्रत्ययः सत्त्वं च हेयपक्षे न्यस्तं पुरुषश्चापरि
णामी शुद्धोऽन्यः सत्त्वादित्येवमस्य ततो विरज्यमानस्य यानि क्लेशबीजानि दग्धशालिबीजकल्पान्यप्रसवसमर्थानि तानि सह मनसा प्रत्यस्तं
गच्छंति तेषु प्रलीनेषु पुरुषः पुनरिदं तापत्रयं न भुंक्ते तदेतेषां गुणानां मनसि कर्मक्लेशविपाकस्वरूपेणाभिव्यक्तानां चरितार्थानां प्रतिप्रसवे पुरुषस्यात्यंतिको गु
णवियोगः कैवल्यं तदा स्वरूपप्रतिष्ठा चितिशक्तिरेव पुरुष इति ॥५०॥ स्थान्युपमंत्रणे संगस्मयाकरणं पुनरनिष्टप्रसंगात्॥ चत्वारः खल्वमी योगिनः प्रथ
मकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रांतभावनीयश्चेति तत्राभ्यासी प्रवृत्तमात्रज्योतिः प्रथमः ऋतंभरप्रज्ञो द्वितीयः ॥३०॥ ॥

गिनमेकं निर्द्धारयितुं यावंतो योगिनः संभवंति तावंत एवाह चत्वार इति तत्र प्रथमकल्पिकस्य स्वरूपमाह तत्राभ्यासी प्रवृत्तमात्रं न पुनर्वशीकृतं
ज्योतिर्ज्ञानं परचित्तादिविषयं यस्य स तथा द्वितीयमाह ऋतंभरप्रज्ञ इति यत्रेदमुक्तं ऋतंभरा तत्र प्रज्ञेति सप्तिभूतेंद्रियाणि जिगीषुः ॥३१॥ ॥ ॥ ॥

पा॰टी॰ त्रापमाह भूतेंद्रियजयी तितेन स्थूलादिसंयमेन ग्रहणादिसंयमेन च भूतेंद्रियाणि जितानि तमेवाह सर्वेषु भावितेषु निष्पादितेषु भूतेंद्रियजय्यान् परचित्तादिज्ञानादिषु कृतरक्षाबंधौ पतस्ते भ्यो
नच्यवते भवनीयेषु निष्पादनीयेषु विशोकादिषु परवैराग्यपर्यंतेषु कर्तव्यसाधनवान् उत्कर्षप्रयत्नस्य साधनविषयस्यैव साध्यनिष्पादकत्वात् चतुर्थमाह चतुर्थ इति तस्य हि
९८ भगवतो जीवन्मुक्तस्य चरमदेहस्य चित्तप्रतिसर्ग एकोर्थः तदेतेषु योगिरूप निमंत्रणविषयं योगिनमवधारयति तत्र मधुमतीमिति प्रथमकल्पिकेनावमहेंद्रादीनां तत्राप्ति

भूतेंद्रियजयी तृतीयः सर्वेषु भावितेषु भावनीयेषु कृतरक्षाबंधः कृतकर्तव्यसाधनादिमांश्चतुर्थो यस्त्वतिक्रांतभावनीयः तस्य चित्तप्रतिसर्ग एकोर्थः सप्तविधास्य प्रांतभूमि
प्रज्ञाः तत्र मधुमतीं भूमिं साक्षात्कुर्वतो ब्राह्मणस्य स्थानिनो देवाः सत्वशुद्धिमनुपश्यंतः स्थानैरुपनिमंत्रयंते भो इहास्यतां इह रम्यतां कमनीयोयं भोगः कमनीये
यं कन्या रसायनमिदं जरामृत्युं बाधते वैहायसमिदं यानं अमी कल्पद्रुमाः पुण्या मंदाकिनी सिद्धा महर्षयः उत्तमानुकूला अप्सरसः दिव्ये श्रोत्र
चक्षुषी वज्रोपमः कायः स्वगुणैः सर्वमिदमुपार्जितमायुष्मता प्रतिपद्यतां इदमक्षयमजरममरस्थानं देवानां प्रियमिति एवमभिधीयमानः संगदोषान् भावयेत्
घोरेषु संसारांगारेषु संसारांगारेषु पच्यमानेन मया जननमरणांधकारे विपरिवर्तमानेन कथंचिदासादितः क्लेशतिमिरविनाशी योगप्रदीपः तस्य चैते तृष्णायोनयो विषयवायवः प्रतिपक्षाः
सखल्वहं लब्धालोकः कथमनया विषयमृगतृष्णया वंचितस्तस्यैव पुनः प्रदीप्तस्य संसाराग्नेरात्मानमिंधनीकुर्यामिति स्वस्तिवः स्वप्नोपमेभ्यः कृपणजनप्रार्थनीयेभ्यो विषयेभ्य इत्येवं नि
श्चितमतिः समाधिं भावयेत् संगमकृत्वा स्मयमपि न कुर्यात् एवमहं देवानामपि प्रार्थनीय इति स्मयादयं सुस्थितंमन्यतया मृत्युना केशेषु गृहीतमिवात्मानं न भावयति तथा चास्य छिद्रां
तरप्रेक्षी नित्यं यत्नोपचर्यः प्रमादो लब्धविवरः क्लेशानुत्तंभयिष्यति ततः पुनरनिष्टप्रसंगः एवमस्य संगस्मयावकुर्वतो भावितोर्थो दृढीभविष्यति भावनीयश्चार्थोभिमुखीभविष्यतीति ॥५०॥ ॥ ॥

शंकैव नास्ति तृतीयोपि नोपनिमंत्रणीयः भूतेंद्रियवशित्वेनैव तत्प्राप्तेः चतुर्थेपि परवैराग्यसंपत्तेरासंगशंका दूरोत्सारितैवेति पारिशेष्याद्द्वितीय एव ऋतंभरप्रज्ञस्तदुपनिमं
त्रणविषय इति वैहायसं आकाशगामि अक्षयम् अविनाशि अजरं सदाभिनवं स्मयकरणे दोषमाह स्मयादयमिति स्मयात् सुस्थितंमन्यो नात्मानं भावयिष्यति नतेस्थान्युपनिमंत्रणे संगस्मयाकरणं पुनरनिष्टप्रसंगात् ॥५१॥ हेरंब ९८

उक्ताः किंचिद्वित्संयमात्सर्वज्ञतासाधननिःशेषज्ञता अपितु प्रकारमात्रविवक्षया यथा सर्वैर्व्यंजनैर्भुक्तमिति अत्र हि यावंतो व्यंजनप्रकारास्तैर्भुक्तमिति गम्यते ननु निःशेषैरिति अस्ति च निः
शेषवचनः सर्वशब्दः यथोपनीतं मन्नं सर्वमशितं प्राशकेनेति तत्र हि निःशेषमिति गम्यते तदिह निःशेषज्ञतालक्षणस्य विवेकजज्ञानस्य साधनं संयममाह क्षणं क्षणंपदार्थं निदर्श
नं पूर्वकमाह यथेति लोष्टस्य हि प्रविभज्यमानस्य परस्मिन्नवयवेऽल्पतरतमे यत्र व्यवतिष्ठते सोऽपकर्षपर्यन्तः परमाणुर्यथा तथाऽपकर्षपर्यंतः कालः क्षणः पूर्वापरमा
विकल्पकालकलेतियावत् तमेव क्षणं प्रकारांतरेण दर्शयति यावतेति परमाणुमात्रं देशमतिक्रामेदित्यर्थः क्रमपदार्थमाह तत्प्रवाहेति तत्सदेन क्षणः परम्परयोत्पत्तेर्नचेदृशः क
मो वास्तवः किंतु काल्पनिकस्तस्य समाहाररूपस्य युगपदनुपपत्तेस्तेषु वास्तवत्वेन विचारसहत्वादित्याह क्षणतत्क्रमयोरिति अयुगपद्भाविक्षणधर्मत्वात्क्रमस्य क्षणसमाहारस्यावास्तवत्वं वृक्ष

क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानं यथापकर्षपर्यंतं द्रव्यं परमाणुरेवं परमापकर्षपर्यंतः कालः क्षणः यावता वा समयेन चलितः परमाणुः
पूर्वदेशं जह्यादुत्तरदेशमुपसंपद्येत स कालः क्षणः तत्प्रवाहाविच्छेदस्तु क्रमः क्षणतत्क्रमयोर्नास्ति वस्तुसमाहार इति बुद्धिसमाहारो मुहूर्ताहोरात्रादयः स खल्वयं का
लो वस्तुशून्योऽपि बुद्धिनिर्माणः शब्दज्ञानानुपाती लौकिकानां व्युत्थितदर्शनानां वस्तुस्वरूप इवावभासते क्षणस्तु वस्तुपतितः क्रमावलंबी क्रमश्च क्षणानंतर्यात्मा तं कालविदः का
ल इत्याचक्षते योगिनः न च द्वौ क्षणौ सह भवतः क्रमश्च न द्वयोः सहभुवोरसंभवात् पूर्वस्मादुत्तरस्य भाविनो यदानंतर्यं क्षणस्य स क्रमः तस्माद्वर्तमान एवैकः क्षणः
न पूर्वोत्तरक्षणाः न पूर्वोत्तरक्षणाः संतीति तस्मान्नास्ति तत्समाहारः ये तु भूतभाविनः क्षणास्ते परिणामान्विता व्याख्येयाः तेनैकेन क्षणेन कृत्स्नो
लोकः परिणाममनुभवति तत्क्षणोपारूढाः खल्वमी सर्वे धर्मास्तयोः क्षणतत्क्रमयोः संयमात्तयोः साक्षात्करणं ततश्च विवेकजं ज्ञानं प्रादुर्भवति॥५२

णतत्क्रमयोरप्यवास्तवत्वं समाहारस्ये नैसर्गिकवैतंडिकबुद्ध्यतिशयरहिता लौकिकाः प्रतिक्षण एव व्युत्थितदर्शना भ्रांतायेकालमीदृशं वास्तवमभिमन्यंत इति तत्किं क्षणोऽप्यवा
स्तवो नेत्याह क्षणस्तु वस्तुपतितो वास्तव इत्यर्थः क्रमस्यालंबनं अवलंबः सोऽस्यास्तीति क्रमेणालंब्यते वैकल्पिके इत्यर्थः क्रमस्य क्षणावलंबनत्वे हेतुमाह क्रमश्चेति क्रमस्या
वास्तवत्वे हेतुमाह न चेति नो हि तत्त्वेऽपि वस्तु वै ज्ञातसाहभावमुपेयात् तं प्रत्याह क्रमश्च न द्वयोरिति कस्मात्संभव इत्यत आह पूर्वस्मादिति तत्किमिदानीं शशविषाणायमाना
एव पूर्वोत्तरक्षणाः नेत्याह ये त्विति अन्विताः सामान्येन समन्वागता इत्यर्थः उपसंहरति तेनेति वर्तमानस्यैवार्थक्रियासु खो चितासु सामर्थ्यादिति॥५२॥ ॥

पा॰टी॰ यद्यप्येतद्विवेकजज्ञानेन निःशेषभावविषयमित्यग्रे वक्ष्यते तथाप्यतिसूक्ष्मतां प्रथमं तस्य विषयविशेष उपक्षिप्यते जातिः लौकिकानां जातिभेदोऽन्यतायाः
ज्ञापकहेतुः तुल्या जातिः गोत्वं तुल्यश्च देशः पूर्वत्वादिः कालाक्षी स्वस्तिमतीत्यन्यो लक्षणभेदः परमिति द्वयोरामलकयोस्तुल्या आमलकत्वं जातिः वर्तुलादि लक्षणं तुल्यं
७९ देशभेदश्च परमिति यदा तु योगिज्ञानं जिज्ञासुना केनचित्पूर्वामलकमन्यव्यग्रस्य योगिनो ज्ञातुरुत्तरदेशेऽुपवर्त्यते उत्तरदेशमामलकं ततोऽपसार्य पिधाय वा तदा तु

तस्य विषयविशेष उपक्षिप्यते ॥५२॥ जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः तुल्ययोर्देशलक्षणसारूप्ये जातिभेदोऽन्यताया हेतुः
गौरियं वडवेयमिति तुल्यदेशजातीयत्वे लक्षणमन्यत्वकरं कालाक्षी गौः स्वस्तिमती गौरिति द्वयोरामलकयोर्जातिलक्षणसारूप्याद्देशभेदोऽन्यत्वकर इदं पू
र्वमिदमुत्तरमिति यदा तु पूर्वमामलकमन्यव्यग्रस्य ज्ञातुरुत्तरदेश उपावर्त्यते तदा तुल्यदेशत्वे पूर्वमेतदुत्तरमेतदिति प्रविभागानुपपत्तिः असंदिग्धे
न च तत्त्वज्ञानेन भवितव्यमित्यत इदमुक्तं ततः प्रतिपत्तिर्विवेकजज्ञानादिति कथं पूर्वामलकसहक्षणो देश उत्तरामलकसहक्षणाद्देशाद्भिन्नः ॥५३॥

ल्यदेशे पूर्वमेतदुत्तरमेतदिति प्रविभागानुपपत्तिः प्राज्ञस्य लौकिकस्य निप्रमाणनिपुणस्यासंदिग्धेन च ज्ञानेन भवितव्यं विवेकजज्ञानवतो योगिनः संदिग्धत्वानुप
पपत्तेः अत उक्तं सूत्रकृता ततः प्रतिपत्तिः तत्प्रत्ययः इति व्याचष्टे विवेकजज्ञानादिति क्षणतत्क्रमसंयमाज्ज्ञानं ज्ञानं कथमामलकतुल्यजातिलक्षणदेशाद्दामलकां हेरंब
तराद्विवेचयतीति पृच्छति कथमिति उत्तरमाह पूर्वामलकसहक्षणो देशः पूर्वामलके नैकक्षणो देशः तेन सह निरंतरपरिणामव्रतियावत् ॥५३॥ ॥ ७९

नुत्तरामलकसहक्षणदेशादुत्तरमलकनिरंतरपरिणामाद्भिन्नः भवतु देशयोर्भेदः किमायातमामलकभेदस्येत्यत आह नेवामलके स्वदेशक्षणानुभवभिन्ने स्वदेशसहितोपक्षणस्तस्या
मलकस्य कालकृता स्वदेशेन सहोत्तराधर्म्मरूपपरिणामलक्षिता सा स्वदेशक्षणस्तस्यानुभवः प्राप्तिर्वा ज्ञानं वा तेन भिन्ने आमलके पयोरामलकयोः पूर्वेत्तराभ्यां देशाभ्यामोत्तराधर्म्मपरिणा
मक्षण आसीत्तयोर्देशांतरोत्तराधर्म्मपरिणामक्षणविशिष्टत्वमनुभवन्योगी तेभिन्ने एव प्रत्येतीति संप्रति तद्देशपरिणामेपि पूर्वभिन्नदेशपरिणामाद्विशिष्टस्य चैतद्देशपरिणामक्षणस्य संय
मतः साक्षात्करणात् तद्विशिष्टमुक्तमन्यदेशक्षणानुभवस्तु तयोरन्यत्वे हेतुरिति अनेनैव निदर्शनेन लौकिकपरीक्षकसंवादादिना परमाणोरपि देशस्य भेदो योगी प्रत्यक्षबुद्धिगम्यः
श्रद्धेयस्त्वसाहपणेनेति अपरे तु वर्णनन्तु दाहरंति यद् इति वैशेषिका हि नित्यद्रव्यवर्तयोंत्याविशेषाइत्याहुः तथाहि योगिनो मुक्तात्मतुल्यजातिदेशकालान् व्यवधिरहितान्परस्य

तेचामलके स्वदेशलक्षणानुभवभिन्ने अन्यदेशलक्षणानुभवस्तु तयोरन्यत्वे हेतुरिति एतेन दृष्टांतेन दृशंतेन दृष्टांतेन परमाणोस्तुल्यजातिलक्षण
देशस्य पूर्वपरमाणुदेशसहक्षणसाक्षात् उत्तरस्य परमाणोस्तद्देशानुपपत्तौ उत्तरस्य तद्देशानुभवो भिन्नः सहक्षणभेदात्तयोगिनोन्यत्वप्रत्ययो
भवतीति॥ अपरे तु वर्णयंति येंत्याविशेषास्तेऽन्यताप्रत्ययं कुर्वंतीति तत्रापि देशलक्षणभेदो मूर्त्तिव्यवधिजातिभेदश्चान्यत्वहेतुः क्षणभेदस्तु यो
गिबुद्धिगम्य एवेति अत उक्तं मूर्त्तिव्यवधिजातिभेदाभावान्नास्ति मूलपृथक्त्वमिति वार्षगण्यः॥ ५३॥ ॥ ॥ ॥

त्नो भेदे न प्रत्येकं तत्तेन च प्रतिपद्यंते तस्मादस्ति कश्चिदंत्यो विशेष इति तथाच सएव नित्यानां परमाणूनां नित्यानां दीनांद्रव्याणां भेदक इति तदेतद्दूषयति तत्रापीति जातिदे
शलक्षणान्युदाहृतानि मूर्त्तिः संस्थानं तत्तद्यथैकं पिंडावयवसंस्थानोपपन्नमपसार्थ्यंत स्मि नेवदेशेन्यत्रसर्पदृष्टः कुत्सितावपवसन्निवेशाउपावर्तते तदेतत्स्यसंस्थानभे
देनप्रत्ययः शरीरं वा मूर्त्तिस्तत्संबंधेनात्मनां संसारिणां मुक्तात्मनां वा क्षतचरेण यादृशात्तादृशो न भेद इति सर्वत्र भेदप्रत्ययस्यान्यथा सिद्धेर्नांत्यविशेषकल्पना व्यवधिर्भेदका
रणं यथा कुशपुष्करद्वीपयोर्देशस्वरूपयोरिति यतो जातिदेशादिभेदो लोकबुद्धिगम्यः अत उक्तं क्षणभेदस्तु योगिबुद्धिगम्य एवेति एवकारः क्षणभेदमवधारयति नियोगि
बुद्धिगम्यत्वं तेन मूर्त्तचरेणादेहसंबंधेन मुक्तात्मनामपि भेदो योगिबुद्धिगम्य उन्नेय इति यस्य न मूर्त्याभेदहेतवो न संति तस्य प्रधानभेदो नास्तीत्याचार्यो मैनेष्य
स्मादूचे उक्तार्थप्रतिनिष्टमप्यनष्टं तदन्यसाधारणत्वादिति तदेतदाह मूर्त्तिव्यवधीति उक्तभेदहेतूपलक्षणमेतत् जगन्मूलस्य प्रधानस्य पृथक्त्वं भेदो नास्तीत्यर्थः॥ ५३॥

पां॰टी॰ तदेवं विषयैकदेशं विवेकजज्ञानस्य दर्शयित्वा विवेकजज्ञानं लक्षयति तारकं विवेकजं ज्ञानमिति लक्ष्यनिर्देशः । शेषं लक्षणं संसारसागरात्तारयतीति तारकं सर्वस्मात्याति माद्विशेषयति सर्वथाविष
यमिति पर्याया अवांतरविशेषाः अतएव विवेकजंज्ञानं परिपूर्णं नास्य किंचिदविषयं विकरा चिद्गोचरइत्यर्थः आस्तां तावत् ज्ञानांतरं संप्रज्ञातो पि तावदस्यांशः तस्मादतः परं किंपरिपू
८० र्णमित्याह अस्यैवांशो योगप्रदीपः संप्रज्ञातः किमुपक्रमः किमवसानश्चासावित्याह मधुमतीमिति ऋतंभरप्रज्ञैव मधुमोदककारणत्वात् यथोक्तं प्रज्ञाप्रासादमारुह्येति तदन्तीम
धुमतीतामुपादाय यावदस्य परिसमाप्तिः सप्तधा प्रान्तभूमिप्रज्ञा अतएव विवेकजंज्ञानं तारकं भवति तद्दर्शयति गम्यदीयस्यतारकत्वादिति तदेवं परंपरया कैवल्यस्य हेतुरुसविभूतीनां
पमानुकीसत्त्वपुरुषान्यताख्यातां तासां कैवल्यसाधनमित्यत्र सूत्रमवतारयति प्राप्तेति विवेकजंज्ञानं भवतु मा वा भूत्सत्त्वपुरुषान्यताख्यातिस्तु कैवल्यप्रयोजिकेत्यर्थः सत्वमिति इतिसूत्र

तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजंज्ञानं तारकमिति स्वप्रतिभोत्थमनौपदेशिकमित्यर्थः सर्वविषयत्वान्नास्य किंचिदविषयीभूतमित्यर्थः सर्वथाविषयं अती
तानागतप्रत्युत्पन्नं सर्वमपर्यायैः सर्वथा जानातीत्यर्थः अक्रममित्येकक्षणोपारूढं सर्वं सर्वथा गृह्णातीत्यर्थः एतद्विवेकजंज्ञानं परिपूर्णमस्यैवांशो योगप्रदीपो मधुमतीं भूमि
मुपादाय यावदस्य परिसमाप्तिरिति प्राप्तविवेकजज्ञानस्याप्राप्तविवेकजज्ञानस्य वा ॥५५॥ सत्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति यदा निर्धूत
रजस्तमोमलं बुद्धिसत्वं पुरुषस्यान्यताप्रत्ययमात्राधिकारं दग्धक्लेशबीजं भवति तदा पुरुषस्य शुद्धिसारूप्यमिवापन्नं भवति तदा पुरुषस्योपचरितभोगाभावः शुद्धिः एत
स्यामवस्थायां कैवल्यं भवतीश्वरस्यानीश्वरस्य वा विवेकजज्ञानभागिन इतरस्य वा न हि दग्धक्लेशबीजस्य ज्ञाने पुनरपेक्षा काचिदस्ति सत्वशुद्धिद्वारेणैतत्समा
धिजमैश्वर्यं ज्ञानं चोपक्रांतं परमार्थतस्तु ज्ञानाददर्शनं निवर्तते तस्मिन्निवृत्ते न संत्युत्तरे क्लेशाः क्लेशाभावात्कर्मविपाकाभावः चरिताधिकाराश्चैतस्यामवस्थायां गुणा
न पुरुषस्य पुनर्दृश्यत्वेनोपतिष्ठंते तत्पुरुषस्य कैवल्यं तदा पुरुषः स्वरूपमात्रज्योतिरमलः केवली भवति ॥५६॥ ॥इति पातंजलभाष्ये सांख्यप्रवचने विभूतिपादस्तृतीयः॥ ॥३॥

समाप्तो ईश्वरस्य सर्वज्ञत्वैः संपन्नैर्ज्ञानक्रियाशक्तिमतोऽनीश्वरस्य वाऽनंतरोक्तेन संयमेन विवेकजज्ञानभागिन इतरस्य वानुत्पन्नतारकविभूतिषु काचिदपेक्षास्तीत्याह नहीति
नन्वपेक्षिता विभूतयः कैवल्ये व्यर्थस्तर्हि तासामुपदेश इत्यत आह सत्वशुद्धिद्वारेणेति इत्थंभूतलक्षणे तृतीया नात्यंतमहेतवः कैवल्ये विभूतयः किंतु न साक्षादित्यर्थः ज्ञानं विवेक
जमुपक्रांतं चशब्दात्पारंपर्येण कारणं तद्दर्शयति विवेकं न मुख्यापरमार्थतस्तु ख्यातिरेकमुख्यमित्यर्थः ज्ञानादिति प्रसंख्यानादित्यर्थः अत्रांतरंगाण्यंगानि परिणामाः प्रपंचिताः संयमा हेरंब
द्भूतिसंयोगस्तासु ज्ञानं विवेकजमिति पदार्थसंग्रहः श्लोकः ॥ ॥इति श्रीवाचस्पतिमिश्रविरचितायां पातंजलभाष्यव्याख्यायां तत्त्ववैशारद्यां विभूतिपादस्तृतीयः समाप्तः ॥ ॥३॥ ८०

तदेवं प्रथमद्वितीयतृतीयपादैः समाधितत्साधनतद्विभूतयाः प्राधान्येनमुसारिताः रतस्तु प्रासंगिकं मोपोद्घातिकं चोक्तं इदानीं तद्धेतुकं कैवल्यंमुत्पादनीयं न चैतत्कैवल्यभागीयं चि
त्तं परलोकं परलो किंनं वित्तानातिरिक्तं चित्तकरणकसुखाधात्मशब्दाद्युपभोक्तारमात्मानं च प्रसंख्यानपरमकाष्ठां च विनामुसाधंशकांव तुमिति तदितं सर्वमत्रपादे व्युत्पादनी
यं तदर्थप्रसंगागतमुपोद्घाता तादृत्तत्र प्रथमं सिद्धचित्तेषु कैवल्यभागीयं चित्तं निर्द्धारयितुकामः पंचतयों सिद्धिमाह जन्मौषधिमंत्रतपःसमाधिजाः सिद्धयः व्याचष्टे· देहांतरिति स्वर्गो
पभोगभागीयात्कर्मणो मनुष्यजातीयाच रितात्कुतश्चिन्निमित्ताल्लब्धपरिपाकात्कर्मविशेषनिकायजातमात्रस्यैव दिव्यदेहांतरितासिद्धिरणिमादिभवतीति ओषधिसिद्धिमा
हअसुरभवनेष्विति मनुष्यो हि कुतश्चिन्निमित्तादसुरभवनमुपसंप्राप्तः कमनीयाभिरसुरकन्याभिरुपनीतं रसायनमुपयुज्याजरामरणत्वमन्याश्च सिद्धिरासादयति इहै
ववा रसायनोपयोगेन यथा मांडव्यो मुनीरसोपयोगाद्विंध्यवासीति मंत्रसिद्धिमाह मंत्रैरिति तपःसिद्धिमाह तपसेति संकल्पसिद्धिमाह कामरूपीति यदेव कामयतेऽ

जन्मौषधिमंत्रतपःसमाधिजाः सिद्धयः देहांतरिता जन्मना सिद्धिरौषधिभिरसुरभवनेषु रसायनेनेत्येवमादिः मंत्रैराकाशगमनाणिमादिलब्धिः तपसा संकल्प
सिद्धिः कामरूपी यत्रतत्र कामगत इत्येवमादि समाधिजाः सिद्धयो व्याख्याताः तत्र कायेंद्रियाणामन्यजातिपरिणतानां जात्यंतरपरिणामः प्रकृत्यापूरात् पूर्वपरि
णामापाये उत्तरपरिणामोपजनः तेषामपूर्वावयवानुप्रवेशाद्भवति कायेंद्रियप्रकृतयश्च स्वं स्वं विकारमनुगृह्णंति आपूरेण धर्मादिनिमित्तमपेक्षमाणा इति॥२॥

णिमादितदेकपदे स्य भवतीति यत्र कामयते तत्रौ तुं वा मंतुं वा तत्र तदेव प्राप्नोति मनुतेवेति आदिशब्दादूर्णनाद्यः संगृहीता इति समाधिजाः सिद्धयो व्याख्याता अधस्तनेपादे॥
अथ चैतस्य सिद्धिविशेषधादिसाधनात्तु तेषामेव कायेंद्रियाणां जात्यंतरपरिणतिरिष्यते· सा पुनर्नतावदुपायमात्रात्· न हि तावन्मात्रस्योपादाने न्यूनाधिकदिव्यादिव्यभावेस्य
प्र भवति नोखलु विवरणं कारणं कार्यवैलक्षण्यमालंबमास्याकस्मिकत्वभूमिसाशं कापूरयितास्त्रं पठति तत्र कायेंद्रियाणामन्यजातीयपरिणतानां जात्यंतरपरिणामः प्रकृत्यापू
रात् मनुष्यजातिपरिणतानां कायेंद्रियाणां योदेवतिर्यग्जातिपरिणामः स खलु प्रकृत्यापूरात् कायस्य हि प्रकृतिः पृथिव्यादीनि भूतानींद्रियाणां च प्रकृतिरस्मिता· तस्य
यवानुप्रवेश आपूरः तस्माद्भवति नदिदमाह पूर्वपरिणामेति ननु यथापूरेणानुग्रहः कस्मात्पुनरसौ नसर्वदा नदसत आह अधर्मादीति नदनेनतस्यैवशरीरस्य वा
ल्य कौमारयौवनवार्द्धकादि निबन्धयोधधानायात्मयोधनत्तुभावस्ववद्धिकस्मिकापाः तरणराशि निवेशितायावा प्रोद्भवतद्बालासहस्रसमालिंगत गगनमंडलतेचवा

पा॰ टी॰ प्रकृत्यापूरादित्युक्तं तत्रेदं संदिह्यते किमापूरः प्रकृतीनां स्वाभाविको धर्मादिनिमित्तो वेति किं प्राप्तं सतीष्वपि प्रकृतिषु कदाचिदापूराद्धर्मादिनिमित्तप्रवणत्वात्तन्निमित्त एवे
ति प्राप्ते एवं प्राप्ते आह निमित्त क्षेत्रिकवत् सत्यं धर्मादयो निमित्तं न तु प्रयोजकाः तेषामपि प्रकृतिकार्यत्वात् न च कार्यं कारणं प्रयोजयति तस्य तदधीनोत्पत्तितया तत्कारण
८९ परतंत्रत्वात् स्वतंत्रस्य च प्रयोजकत्वात् न खलु कुलालमंतरेण मृद्दंडचक्रसलिलादय उत्सितेनोत्सहंते न चाघटेन प्रयुज्यंते किंतु खलु तत्र कुलालेन न चपु

निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् न हि धर्मादि निमित्तं तत्प्रयोजकं प्रकृतीनां भवति न कार्येण कारणं प्रवर्त्यत इति कथं तर्हि वरण
भेदस्तु ततः क्षेत्रिकवत् यथा क्षेत्रिकाः केदारादपां पूर्णात् केदारांतरं पिप्लावयिषुः समं निम्नं निम्नतरं वा नापः पाणिनापकर्षति आवरणं त्वासां भिनत्ति तस्मि
न्भिन्ने स्वयमेवापः केदारांतरमाप्लावयंति तथा धर्मः प्रकृतीनामावरणमधर्मं भिनत्ति तस्मिन्भिन्ने स्वयमेव प्रकृतयः स्वस्व विकारमाप्लावयंति यथा वा
स एव क्षेत्रिकस्तस्मिन्नेव केदारे न प्रभवति औदकान् भौमान् वा रसान् धान्यमूलान्यनुप्रवेशयितुं किं तर्हि मुद्गगवेधुकश्यामाकादींस्ततो
पकर्षति अपकृष्टेषु तेषु स्वयमेव रसा धान्यमूलान्यनुप्रविशंति तथा धर्मो निवृत्तिमात्रे कारणमधर्मस्य शुद्ध्यशुद्ध्योरत्यंतविरोधात् न
तु प्रकृतिप्रवृत्तौ धर्मो हेतुर्भवतीति अत्र नंदीश्वरादय उदाहार्याः विपर्ययेणाप्यधर्मो धर्मं बाधते ततश्चाशुद्धिपरिणाम इति तत्रापि नहुषाजगरादय उदाहार्याः॥२॥

रुषार्थोऽपि प्रवर्त्तकः किंतु तदुद्देशेनेश्वरः उद्देश्यतामात्रेण पुरुषार्थः प्रवर्त्तक इत्युच्यते उत्पित्सोऽस्य स पुरुषार्थस्याव्यक्तस्य सृष्टिनिकारणं तं युक्तं न चैतावता धर्मादीनामपि विनि हेरंब
मनाप्रतिबंधापनयमात्रेण क्षेत्रिकवदुपपत्तेः ईश्वरस्यापि धर्माधिष्ठानार्थं प्रतिबंधापनय एव व्यापारो वेदितव्यः तदेतन्निगदव्याख्यातेन भाष्येणोक्तं॥२॥ ॥
८९

प्रकृत्यापूरेणसिद्धिः समर्थासिद्धिविनिर्मितनानाकायवर्त्तिचित्तैकत्वनानात्वे विचारयति पद्मालिति तत्र नानामनस्त्वे कायानां प्रति चित्तमभिप्राय भेदादेकाभिप्रायानुरोधश्च परस्पर प्रति
संधानं च न स्यात्॥ पुरुषांतरवत् तस्मादेकमेव चित्तं प्रदीपवद्विसारितया बहूनपि निर्माणकायान्व्याप्नोतीति प्राप्त आह निर्माणचित्तान्यस्मितामात्रात् यथा वज्री वह्नि रतत्सर्वमेवैकैकासाधारणाभि
नाभितं दृष्टं तथा चैत्रमैत्रादिशरीरं तथा च निर्माणकायादिनि सिद्धं तेषाममपि प्राप्तिस्विकं मनत्रस्य भिप्रायेणाह अस्मितामात्रमिति यदुक्तमनेकचित्तत्वे एकाभिप्रायानुरोधश्च प्रतिसंधा
नं च न स्यात् भिति तत्रोत्तरं सूत्रं प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषां अस्य विषये षदोषाय द्विचित्तमेकं नानाकायवर्त्तिमनो नायकं न निरमास्य तन्निर्माणे ल्वदोषः न चैवं ग

यदा तु योगी बहून्कायान्निर्मिमीते तदा किमेकमनस्कास्ते भवंति अथानेकमनस्का इति॥ निर्माणचित्तान्यस्मितामात्रात् अस्मितामात्रं
चित्तकारणमुपादाय निर्माणचित्तानि करोति ततः सचित्तानि भवंतीति॥४॥ प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषां बहूनां चि
त्तानां कथमेकचित्ताभिप्रायपुरःसरा प्रवृत्तिरिति सर्वचित्तानां प्रयोजकं चित्तमेकं निर्मिमीते ततः प्रवृत्तिभेदः॥५६॥ ३ ॥

हीलाकृतं प्राप्तिरिक्वैर्मनोभिः कृतं वा नायकनिर्माणेन निजस्यैव मनसो नायकत्वादिति वाच्यं प्रमाणसिद्धस्य नियोगपर्यनुयोगानुपपत्तेरिति अत्र पुराणं भवति एकस्तु प्रभु
शक्त्या वै बहुधा भवतीश्वरः भूत्वा यस्मात्तु बहुधा भवत्येकः पुनस्तु सः तस्माच्च मनसो भेदा जायंते चैत एव हि एकधा स द्विधा चैव त्रिधा च बहुधा पुनः योगीश्वरः शरीराणि
करोति विकरोति च प्राप्नुयाद्विषयान्कैश्चित्कैश्चिदुग्रं तपश्चरेत् संहरेच्च पुनस्तानि सूर्यो रश्मिगणानिवेति तदनेनाभिप्रायेणाह बहूनां चित्तानामिति॥ ३ ॥

पां॰ टी॰ तदेवमुदितेषु पंचसु सिद्धचित्तेष्वपवर्गभागीयं चित्तं निर्द्धारयति तत्र ध्यानजमनाशयं ॥ आशेरत इत्याशयाः कर्मवासनाः क्लेशवासनाश्च तत एतेन विघंते यस्मिन् तदनाशयं चित्तमपवर्गभागीयं भव
तीत्यर्थः यतो रागादिनिबंधना प्रवृत्तिर्नास्ति अतो नास्ति पुण्यपापाभिसंबंधः कस्मात् पुनः रागादिजनिता प्रवृत्तिर्नास्तीत्यत आह क्षीणक्लेशत्वादिति ध्यानजस्यानाशयस्य मनोन्तरेभ्यो
८२ विशेषं दर्शयितुमितरेषां मनसां माहात्म्यमाह इतरेषां तु इति तत्रैव हेतुपरं सूत्रमवतारयति यत इति कर्माशुक्लाकृष्णमितरेषां पदं स्थानं चतुर्भिः समवेतानि चतुष्पदः यथा बहिःसाधन
साध्यं तत्र सर्वत्रास्तिकस्य चित्ती उतानहिंस्रीत्यादि साधने कर्मणि परपीडानास्ति अवघातादि समये पिपीलिकादिवधसंभवात् अंततो बीजाद्विधेन सत्वादिभेदोत्पत्ति प्रतिबंधात् अ
नुग्रहश्च दक्षिणादिना ब्राह्मणादेरिति शुक्लं तपःस्वाध्यायध्यानवतां संन्यासिनां शुक्लमेव पुष्पमुत्पादयति सा हीति अशुक्लाकृष्णं संन्यासिनां संन्यासिनो दर्शयति क्षीणेति कर्मासंभवात् संन्यासि

तत्र ध्यानजमनाशयं पंचविधं निर्माणचित्तं जन्मौषधिमंत्रतपःसमाधिजाः सिद्धय इति तत्र यदेव ध्यानजं चित्तं तदेवानाशयं तस्यैव नास्ति आशयो रागादिप्रवृत्तिः
नातः पुण्यपापाभिसंबंधः क्षीणक्लेशत्वाद्योगिन इति इतरेषां तु विद्यते कर्माशयो यतः ॥ ६ ॥ कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषां चतुष्पात् खल्वियं कर्मजातिः
कृष्णा शुक्लकृष्णा शुक्ला अशुक्लाकृष्णा चेति तत्र कृष्णा दुरात्मनां शुक्लकृष्णा बहिःसाधनसाध्या तत्र परपीडानुग्रहद्वारेण कर्माशयप्रचयः शुक्ला
तपःस्वाध्यायध्यानवतां सा हि केवले मनसि आयत्तत्वाद् बहिःसाधनाधीना न परान् पीडयित्वा भवति अशुक्लाकृष्णा संन्यासिनां क्षीणक्लेशानां चरमदेहा
नामिति ॥ तत्राशुक्लं योगिन एव संन्यासात् अकृष्णं चानुपादानात् इतरेषां तु भूतानां पूर्वमेव त्रिविधमिति ॥ ७ ॥ ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानां ॥
तत इति त्रिविधात् कर्मणस्तद्विपाकानुगुणानामेवेति यज्जातीयस्य कर्मणो यो विपाकस्तस्यानुगुणा या वासनाः कर्मविपाकमनुशेरते तासामेवाभिव्यक्तिः न हि दैवं कर्म विप
च्यमानं नारकतिर्यङ्मनुष्यवासनाभिव्यक्तिनिमित्तं संभवति किंतु दैवानुगुणा एवास्य वासना व्यज्यंते नारकतिर्यङ्मनुष्येष्वप्येवं समानश्चर्चः ॥ ८ ॥ ८ ॥
नोदिनक्रोविदुः हि साधनसाध्ये कर्मणि प्रवृत्तत्वादितरेषामस्ति कृष्णः कर्माशयः योगानुष्ठानसाध्यस्य कर्माशफलस्येश्वरसमर्पणेनाशुक्लः कर्माशयः निरस्तफलो हि शुक्लोऽ
यं तिस्याफलमेव नास्तिकुतस्तस्य निरस्तफलत्वसर्थः तदेवं चतुष्टयी कर्मजातिमुक्त्वा फलमाकर्षे सवधारयति तत्राशुक्लमिति कर्माशयं त्रिविधं व्याख्यायास्य गतिमाह ततस्तद्विपाका
नुगुणानामेवाभिव्यक्तिः सर्ववासनानां यज्जातीयस्य पुण्यजातीयस्यापुण्यजातीयस्य वा कर्मणो यो विपाको दिव्यो वा नारको वा जात्यायुर्भोगस्तस्य विपाकस्यानुगुणाः ताएवाह यावास
नाः कर्मविपाकमनुशेरते अनुकुर्वंति दिव्यभोगजनिता हि दिव्यकर्मविपाकानुगुणा वासनाः न दिव्यमनुष्यभोगवासनाभिव्यक्तौ दिव्यकर्मफलोपभोगसंभवः तस्मात् स्वविपाका

उत्तेजितवासनाकर्मभिर्विसिद्धिरिति भाष्यार्थः ॥ ७ ॥

हेरंबू
८२

स्यादेतत् मनुष्यस्य प्रायणानांतरमधिगतमार्जारभावस्यानंतरतयामनुष्यवासनायाएवाभिव्यक्त्याभवितव्यं नखल्वस्तिसंभवोयदनंतरदिवसानुभूतं नस्मर्यतेव्यवहितदिवसा
सानुभूतं चस्मर्यतेइत्यत आह जातिदेशकालव्यवहितानुभवतत्तुवृषदंशवासनायाज्ञातासादृश्यवधिसत्थापितस्याः फलत आनंतर्यं वृषदंशविपाकेनकर्मणातस्याएवस्व
विपाकानुगुणाया अभिव्यक्तौ तत्स्मरणसमुत्साहादित्याह वृषदंशविपाकोदयइति उद्देसस्यादित्युदयः कर्माशयः पुनश्चास्यव्यंजकांजनएवउदियात् अभिव्यंज्येतवि
पाकारंभाभिमुखः क्रियेतेत्यर्थः अभिसंस्कारक्रियाउपादायगृहीत्वाव्यज्येतयदिव्यज्येतस्वविपाकानुगुणाएववासनागृहीत्वाव्यज्येतेत्यर्थः आनंतर्यमेवफलतः

जातिदेशकालव्यवहितानामप्यानंतर्यं स्मृतिसंस्कारयोरेकरूपत्वात्। वृषदंशविपाकोदयःस्वव्यंजकांजनाभिव्यक्तः सयदिजातिशतेनवादूर
देशतयावाकल्पशतेनवाव्यवहितःपुनस्वव्यंजकांजनएवउदियात्द्रागित्येवंपूर्वानुभूतवृषदंशविपाकाभिसंस्कृतावासनाउपादायव्यज्ये
त कस्मात् यतोव्यवहितानामप्यासांसदृशंकर्माभिव्यंजकं निमित्तीभूतमित्यानंतर्यमेव कुतश्च स्मृतिसंस्कारयोरेकरूपत्वात् यथा
नुभवास्तथासंस्कारास्तेचवासनारूपाः यथाचवासनास्तथाचवासनास्तथास्मृतिरिति जातिदेशकालव्यवहितेभ्यःसंस्कारेभ्यः स्मृतिः स्मृतेश्च पुनःसं
स्कारादित्येवमेते स्मृतिसंस्काराः कर्माशयवृत्तिलाभवशाद्व्यज्यंते अतश्चव्यवहितानामपिनिमित्तनैमित्तिकभावानुच्छेदादानंतर्यमेव सिद्धमिति ॥९॥ ५॥

कारणद्वारकमुपपाद्य कार्यद्वारकमुपपादयति कुतश्चेत्यतोति एकरूपतया सादृश्यं तदेवाह यथेति नन्वनुभवसरूपाश्चेत्संस्कारास्तथास
त्यनुभवाविशारदवदसेते पिविशारदाः कथं चिरभाविनेऽनुभवायकल्पेरन्नित्यत आह तेचकर्मवासनारूपाः यथाऽपूर्वंसंस्कापिसात्त्विककर्मनिमित्तम
पि एवंक्षणिकानुभवनिमित्तोपिसंस्कारःस्थायी किं विद्देशाधिष्टानांचसारूप्यं अन्यथा अभेदेतत्वेनसादृश्यानुपपत्तेरित्यर्थः सुगममन्यत् ॥५॥ ॥

पा·टी०

८३

स्यादेतत्तूत्पन्नस्य पूर्वपूर्वतरजन्मभिः सेह्नावासना· यदि पूर्वपूर्वतरसद्भावे प्रमाणं स्यात् तदेवं तु नास्ति नच जातमात्रस्य जंतोर्हर्षशोकदर्शनमात्रं प्रमाणं भवितुमर्हतीति पद्मादिसंको
चविकासवत् स्वाभाविकत्वेनतदुपपत्तेरित्यत आह तासामनादित्वं चाशिषो नित्यत्वात् तासां वासनानामनादित्वं च न केवलमानंतर्यमिति चार्थः आशिषो नित्यत्वात् आ
त्माशिषो वासनानामनादित्वे नित्यत्वात् अभिचारादिति ननु स्वाभाविकत्वेनाप्युपपत्तेरसिद्धमाशिषो नित्यत्वमित्यत आह येयमिति नास्तिकः पृच्छति कस्मात् उत्तरं जातमात्रस्य
जंतोरिति अत एवैतस्मिन् जन्मन्यननुभूतमरणधर्मकस्य मरणमेव धर्मः सोननुभूतो येन सतथोक्तस्य मातुरंकात् स्खलतः कंपमानस्य मांगल्यचक्रादिलांछितं तदुरःसूत्रमतिगाढं पाणिभ्य
हमालंबमानस्य बालकस्य कंपभेदानुमितात् द्वेषानुषक्ताद्दुःखेयास्मृतिस्तन्निमित्तो मरणत्रासः कथं भवेदिति ननूक्तं स्वभावादिति अत आह न च स्वाभाविकं वस्तु निमित्तमुपादत्तेगर्क्को
तिस्वोसतो एनदुक्तं भवति बालकास्येदृशोरुकंपमानः कंपो भयनिबंधनः ईदृशकंपत्वादस्मरादिकंपवत् बालकभयं दुःखद्वेषस्मृतिनिमित्तं भयत्वादस्मदादिभयव

तासामनादित्वं चाशिषो नित्यत्वात् तासां वासनानामाशिषो नित्यत्वादनादित्वं येयमाशीर्महामेव भूयासमिति सर्वस्य दृश्यते सा न स्वा
भाविकी कस्मात् जातमात्रस्याननुभूतमरणधर्मकस्य द्वेषदुःखानुस्मृतिनिमित्तो मरणत्रासः कथं भवेत् न च स्वाभाविकं वस्तु निमित्त
मुपादत्ते तस्मादनादिवासनानुविद्धमिदं चित्तं निमित्तवशात्काश्चिदेव वासनाः प्रतिलभ्य पुरुषस्य भोगायोपावर्त्तत इति ॥१०॥

त्· आगामिस्वापायोत्प्रेक्षालक्षणं च भयं न दुःखस्मृतिमात्राद्भवति अपि तु पतनोबिभेतीति तस्य प्रत्यवायहेतुभावमनुमाय संत्रस्यति प्रत्यवायं भयं च विदध्यादिति शंकते न स्मापन्ना
नीयास्त्वनुभूतचरात् द्वेषानुषक्तदुःखमुपयादित्वं तस्य स्मरणात् तज्जातीयस्यानुभूयमानस्य तत्र दुःखहेतुत्वमनुमाय ततो बिभेति न च बालकेनास्मिन् जन्मनि स्खलनस्यान्यत्र दुःखहे
तुत्वमवगतं न च तादृशं दुःखमुपलब्धं तस्मात्प्राग्भवीयोनुभवः परिशिष्यते तच्चैतदेवं प्रयोगमारोहति जातमात्रस्य बालमात्रस्यास्मृतिः पूर्वानुभवनिबंधना स्मृतित्वादस्मदादि
स्मृतिवदिति नच पद्मसंकोचविकासावपि स्वाभाविकौ न हि स्वाभाविककारणांतरमपेक्षते· वह्नेरौष्ण्यं प्रत्यपि कारणांतरापेक्षाप्रसंगात् तस्मिन्नागंतुकमर्ककरसंपर्कमात्रमपेक्ष
वकमालिनां विकासकारणं संकोचकारणं च संस्कारः स्थितस्थापक इत्येवं क्रियानुमित हर्षादयोपि प्रागभिभवे हेतवो वेदितव्याः तद्दृष्टांतावष्टंभेन तमुपसंहरति तस्मादिति निमित्त

हेरंब

८३

प्रसंगतश्चित्तपरिणामप्रतिपत्तिं निराचिकीर्षुर्विप्रतिपत्तिमाह घटप्रसादेति देहमद्देशवर्तिकार्यदर्शनाद्देहाद्बहिः सद्भावे चित्तस्य न प्रमाणमस्ति नन्वेतदनुपरिमाणं दीर्घशष्कुली
भक्षणादावपर्यायेणज्ञानपंचकानुत्पादप्रसंगात् न चाननुभूयमानक्रमकल्पनायां प्रमाणमस्ति नचैकमणु मनो नानादेशैरिन्द्रियैः पर्यायेण संबद्धुमर्हतीति तत्सदिशेव्यापक
परिमाणं चित्तं घटप्रासादवर्त्तिप्रदीपवत् संकोचविकास्यैयुक्तिका हस्तिदेहयोरस्योस्यस्येते शरीरपरिमाणमेवाकारः परिमाणं यस्येति परे प्रतिपन्नाः नन्वेवं कथमस्य क्षेत्र

घटप्रासादप्रदीपकल्पं संकोचविकाशि चित्तं शरीरपरिमाणाकारमात्रमिति
अपरे प्रतिपन्नाः तथा चांतराभावः संसारश्च युक्त इति ॥७॥ ॥ ॥

बीजसंयोगः न खल्वेतदनाश्रयं मृतशरीरान्मातृदेहवर्त्तिनीं लोहितरेतसी प्राप्नोति परतंत्रत्वात् नहि चक्षुरादिषु गच्छत्सु छाया गच्छति न चागच्छति येन द्रा
श्रयं चित्तं गच्छति तथा च न संसारः स्यादित्यत आह तथा चांतराभावः संसारश्च उक्त इति तथा च शरीरपरिमाणत्वे देहांतरप्राप्तये पूर्वदेहत्याग इव देहांतरप्राप्तिश्चांतराऽस्याः
वाहिकशरीरसंयोगाद्भवतस्तेन खल्वयं देहांतरे संचरेत् तथा च पुराणं अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति सोयमांतराभावः अतएव संसारश्च युक्त इति ॥९॥

तदेतद्दूषयमाणः स्वमतमाह। वृत्तिरेवास्य विभुनश्चित्तस्य संकोचविकाशिनीत्याचार्यः स्वयंभूः प्रतिपेदे इदमत्राकूतं यद्यनाश्रयं चित्तं न देहांतरसंचारि कथमेतदातिवाहिकमाश्रयते। न
पा०टी० त्रापि देहांतरकल्पनायामनवस्थानं चास्य देहान्निःकर्षः अतिवाहिकस्य देहान्निःकर्षः अतिवाहिकस्य संभवति निकृष्टस्य चैतस्य तत्संबंधात्। अस्तु तर्हि सूक्ष्मशरीरमेवासर्गादाच महाप्रल
८७ यलिपतं चित्तानामधिष्टानं षाट्कौशिकशरीरमध्यवर्त्तिन हि चित्तमातस्य लोकादभ्यावीवेस्तत्र तत्र शरीरे संचरतीति। निःकर्षश्चास्योपपन्नः। षाट्कौशिकान्कायात्। तत्र हि तदंत
राभावस्तन्निपतत्वात् न चास्यापि सद्भावे प्रमाणमस्ति न खल्वेतदध्यक्षगोचरः न च संसारो ऽस्यानुमानं आचार्यमते नाप्युपपत्तेः आगमस्तु पुरुषस्य निष्कर्षकामाहन्न चि
त्तं वा सूक्ष्मशरीरं वा पुरुषः किंतु चितिशक्तिरप्रतिसंक्रमा न चास्या निःकर्षः संभवतीत्यौपचारिको व्याख्येयः तथा च चित्तेः चित्तस्य च तत्र तत्र वृत्तभाव एव निष्कर्षार्थः त्यक्षे स्मृतीतिहासपुराणे

वृत्तिरेवास्य विभुनः संकोचविकाशिनीत्याचार्यः तच्च धर्मादिनिमित्तापेक्षं निमित्तं च द्विविधं बाह्यमाध्यात्मिकं च शरीरादिसाधनापेक्षं बाह्यं स्तुतिदानाभिवादनादि
चित्तमात्राधीनं श्रद्धाद्याध्यात्मिकं तथा चोक्तं ये चैते मैत्र्यादयो ध्यायिनां विहारास्ते बाह्यसाधननिरनुग्रहात्मानः प्रकृष्टं धर्ममभिनिर्वर्त्तयंति तयो
र्मानसं बलीयः कथं ज्ञानवैराग्ये केनातिशय्येते दंडकारण्यं च चित्तबलव्यतिरेकेण कः शारीरेण कर्मणा शून्यं कर्त्तुमुत्सहेत समुद्रमगस्त्यवद्वा पिबेत्॥८॥

पुमरणानंतरं प्रेतशरीरप्राप्तिस्तद्विमोचकश्च सपिंडीकरणादिविधिरित्युक्तं तदनुजानीमः आतिवाहिकत्वं तस्य न मृष्यामहे न चात्रास्तिकश्चिदागमः लब्धशरीर एव च यमपुरुषैरपि पाश
बद्धानीयते न चातिवाहिकशरीरः तस्मादहंकारिकत्वाद्वैतस्य अहंकारस्य च गगनमंडलवत्त्रैलोक्यव्यापित्वाद्विभुत्वं मनसः एवं चेदस्य वृत्तिरपि विभ्वीति सर्वत्र तनायत्तिदिसनउक्तं
वृत्तिरेवास्येति स्यादेतत् चित्तमात्राधीनाया वृत्तेः संकोचविकाशौ कुतः कादाचित्क इत्यत आह तच्च चित्तं धर्माद्यपेक्षं वृत्तौ निमित्तं विभजते निमित्तं चेति। आध्या
त्मिकेनेंद्रियधनाद्यपेक्षते श्रद्धादीस्तत्रापि वीर्यस्मृत्यादयो गृह्यंते आंतरत्वे संमतिमाचार्याणामाह तथा चोक्तं विहारो व्यापारः प्रकृष्टं शुक्लं तयोर्बाह्याभ्यंतरयोर्मध्ये तानं वैरा हरेः
ग्यजन्मिनो धर्मः केन बाह्यसाधनधर्मेणातिशय्यते अभिभूयते। ज्ञानवैराग्यजात्वेव धर्मो तमाभिभवतः बीजभावादपनयतदित्यर्थः अत्रैव सुप्रसिद्धमुदाहरणमाह दंडकारण्येति॥८॥ ८७

अथैताश्चित्तवृत्तयो वासनाश्चानादयश्चेत्कथमासामुच्छेदः नखलु चितिशक्तिरनादिरुच्छिद्यतेऽतस्तत्र आह हेतुफलभावः अनादेरपि समुच्छेदो दृष्टः तद्यथा अनागत
स्येति सव्यभिचारत्वादसाधनं चितिशक्तिस्तु विनाशकारणाभावान्न विनश्यति नित्यत्वनादित्वात् उक्तं च वासनानामनादीनामपि समुच्छेदे कारणं सूत्रेणेति अनुग्रहोपधा

। हेतुफलाश्रयालंबनैः संगृहीतत्वादेषामभावे तदभावः हेतुः धर्मात्सुखं अधर्माद्दुःखं सुखाद्रागो दुःखाद्द्वेषः ततश्च प्रयत्नः ते
न मनसा वाचा कायेन वा परिस्पंदमानः परमनुगृह्णाति उपहंति वा ततः पुनर्धर्माधर्मौ सुखदुःखे रागद्वेषाविति प्रवृत्तमिदं ष
डरं संसारचक्रमस्य च प्रतिक्षणमावर्त्तमानस्य अविद्या नेत्री मूलं सर्वक्लेशानामित्येष हेतुः फलं तु यमाश्रित्य यस्य प्रत्युत्पन्नता
धर्मादेः न ह्यपूर्वोपजननं मनस्तु साधिकारमाश्रयो वासनानां न ह्यवसिताधिकारे मनसि निराश्रया वासनाः एषामभावेन तत्सं
श्रयाणामपि वासनानामभावः नास्त्यसतः संभवो न वा सतो विनाश इति द्रव्यत्वेन संभवंत्यः कथं निवर्तिष्यंते वासना इति ॥११॥

भावपि धर्मादि निमित्तमुपलक्षणं तेन सुरापानादयोपि संगृहीता भवंति मैत्रीनायकाः अत्रैव हेतुः फलमिति प्रत्युत्पन्नता वर्त्तमानतानुधर्मस्वरूपो व्यापारः अत्रैव हे
तुर्न हीति यदभिमुखीभूतं वस्तु कामिनीसंपर्कादि व्यापकाभावे व्याप्यस्याभाव इति सूत्रार्थः उत्तरसूत्रमवतारयितुं शंकते नास्तीति असत इति तु संपातापातं निरर्थ ॥११॥

पा॰टी॰ अतीताधर्माणां नासतामुत्पादो न सतां विनाशः किंतु सतामेव धर्मिणाम ध्वभेदपरिणाम एवोदयव्यया विति सूत्रार्थः अनुभूताप्राप्तायेन व्यक्ति तथा संप्रतिव्यक्तिर्नास्तीति
यावत् तच्च त्रैकाल्येपि धर्मस्य सन्निसाहृ यदि चेति नह्यसज्ज्ञानविषयः संभवतीति निरूपाख्यत्वात् विषयावभासं हि विज्ञानं नासति विषये भवति त्रैकाल्यविषयं च विज्ञानं योगिनाम
८५ स्मरादीनां च विज्ञानमसति विषये नोत्पन्नं स्यात् उत्पद्यते च तस्मादतीतानागते सामान्यरूपेणास्मनुगते स्त इति एवमनुभवतो ज्ञानं विषयसत्वे हेतुरुक्तं उद्देश्यत्वादप्यनागतस्य विषय
तेनास्तत्वमेवेत्याह किंच भोगभागीयस्येति कुशलो निपुणः अनुष्ठेयेपि यच्च निमित्तं तत्सर्वं नैमित्तिके स सैव विशेषमाधत्ते यथा कौंडल्य वेदाध्यायादयः न खल्वेते कौंडला

अतीतानागतं स्वरूपतोस्त्यध्वभेदाद्धर्माणां भविष्यद्व्यक्तिकमनागतं अनुभूतव्यक्तिकमतीतं स्वव्यापारोपारूढं वर्त्तमानं त्रयं चैतद्वस्तु ज्ञानस्य ज्ञेयं यदि चैतत्स्वरू
पतो नाभविष्यन्नेदं निर्विषयं ज्ञानमुदपत्स्यत तस्मादतीतानागतं स्वरूपतोस्तीति किंच भोगभागीयस्य वा अपवर्गभागीयस्य वा कर्मणः फलमुत्पित्सु यदि
रूपाख्यमिति तदुद्देशेन तेन निमित्तेन कुशलानुष्ठानं न युज्येत सतश्च फलस्य निमित्तं वर्त्तमानीकरणे समर्थं नापूर्वोपजनने सिद्धं निमित्तं नैमित्तिकस्य वि
शेषानुग्रहं कुरुते नापूर्वमुत्पादयतीति धर्मी चानेकधर्मस्वभावस्तस्य चाध्वभेदेन धर्माः प्रत्यवस्थिताः न च यथा वर्त्तमानं व्यक्तिविशेषापन्नं द्रव्यतोस्त्येवमती
तमनागतं च कथं तर्हि स्वेनैव व्यंग्येन स्वरूपेणानागतमस्ति स्वेन चानुभूतव्यक्तिकेन स्वरूपेणातीतमिति वर्त्तमानस्यैवाध्वनः स्वरूपव्यक्तिरिति न सा भ
वति अतीतानागतयोरध्वनोरेकस्य चाध्वनः समये द्वावध्वानौ धर्मिसमन्वागतौ भवत एवेति नाभूत्वा भावस्त्रयाणामध्वनामिति ॥१२॥ १०॥ ॥

चारयोऽसंतमुत्पादयंति सत एव तु तस्याभिव्यक्तिविकारौ कुर्वंति एवं कुलालादयोपि सत एव घटस्य वर्त्तमानभावहेतुवद्वसाह सतश्चेति यदि तु वर्त्तमानत्वाभावादतीतानागतयोरसत्वं
हंत भोः वर्त्तमानस्याप्यभावः अतीतानागतत्वाभावात् स्वार्थविशिष्टतया तु सत्वं त्रयाणामप्यविशिष्टमित्यभिप्रायेणाह धर्मी चेति प्रत्येकमवस्थानेप्यस्थितिरिति द्रष्टव्यं तद्दर्शितं
इति तस्मे धर्मिणि सार्वविभक्तिकस्तसिः यथा तीतानागतावतीतानागतत्वेनास्तः तर्हि वर्त्तमानसमयेतत्वाभावान्नस्यातामित्यत आह एकस्येति प्रकृतमुपसंहरति नाभूत्वा भावइति ॥१०॥ हेरंब
८५

स्यादेतत् अयंनानाप्रकारोधर्मिधर्मावस्थापरिणामरूपो विश्वभेदप्रपंचोनप्रधानादेकस्मादुद्भवितुमर्हति नच विलक्षणात्कारणात्कार्यभेदसंभवइत्यत आह तेनःते त्र्यध्वानो धर्मव्यक्ताश्च
सूक्ष्माश्चगुणात्मनोनतेगुणातिरिक्ताएषामस्तिकारणंवैचित्र्यंतु तदाहितानादिक्लेशवासनानुगताद्वैचित्र्यात् यथोक्तंवायुपुराणे वैश्वरूप्यात्प्रधानस्यपरिणामोपमद्भुतइति। व्यक्ता
नांपृथिव्यादीनामेकादशेंद्रियाणांचवर्त्तमानानामतीतानागतत्वंषडविशेषायथायोगं भवंति संप्रति विश्वस्य नित्यानि सरूपे विभजन्ति सरूपमाह सर्वमिदमिति दृश्यमानंसन्निवेशः
संस्थानभेदस्यान्यपरिणामइत्यर्थः अत्रैवषाष्टितंत्रशास्त्रस्यानुशिष्टिः मायेवनतुमाया सुतुच्छकं विनाशियथा हिमायाक्षणायैवान्यथाभवति एवंविकारा अप्याविर्भावतिरोभावध
र्माणःप्रतिक्षणमन्यथाप्रकृतिर्नित्यतयामायाविधर्मेणपरमार्थेति भवतुत्रैगुण्ये ऽपिपरिणामवैचित्र्यंएकस्तुपरिणामः पृथिवीतिवातोयमितिवा कुतः आत्मनएकत्वविरोधादित्याशं

ते व्यक्तसूक्ष्मा गुणात्मानः तेखल्वमी त्र्यध्वानो धर्मा वर्त्तमाना व्यक्तात्मानोतीतानागताः सूक्ष्मात्मानः षडविशेषरूपाः सर्वमिदं गुणानांसंनिवेश
विशेषमात्रं परमार्थतो गुणात्मानः तथाच शास्त्रानुशासनं गुणानांपरमंरूपं नदृष्टिपथमृच्छति यत्तुदृष्टिपथंप्राप्तं तन्मायेवसुतुच्छकमिति यदातु
सर्वे गुणाः कथमेकः शब्द एकमिंद्रियमिति ॥१३॥ परिणामैकत्वाद्वस्तुतत्त्वं प्रख्याक्रियास्थितिशीलानां गुणानां ग्रहणात्मकानां करणभावेनैकः प
णामः श्रोत्रमिंद्रियं ग्राह्यात्मकानां शब्दभावेनैकः परिणामः शब्दो विषय इति शब्दादीनां मूर्त्तिसमानजातीयानामेकः परिणामः पृथिवीपरमाणुस्तन्मा
त्रावयवस्तेषां चैकः परिणामः पृथिवी गौर्वृक्षः पर्वत इति एवमादि भूतांतरेष्वपि स्नेहौष्ण्यप्रणामित्वावकाशदानान्युपादाय सामान्यमेकविकारारंभः समाधेयः ॥१४॥

अथसूत्रमवतारयति यदातु सर्वे गुणा इति परिणामत्वं बहूनामप्येकःपरिणामोदृष्टः तद्यथा गवाश्वमहिषमातंगानां रुमानिक्षिप्तानामेको लवणसजातीयलक्षणःपरिणामः व
र्त्तितैलानांचप्रदीप इति एवंबहुत्वेपिगुणानांपरिणामैकत्वं तत्रश्रोत्रमात्रभूतभौतिकानांप्रत्येकंतत्त्वमेकत्वे ग्रहणात्मकानांसत्त्वप्रधानतयाप्रकाशात्मनामहंकारकार्या
णांकरणभावेनैकःपरिणामःश्रोत्रमिंद्रियं तेषामेवगुणानां तमःप्रधानतयाजडत्वेनग्राह्यात्मकानांशब्दतन्मात्रभावेनैकःपरिणामःशब्दोविषयःशब्द इति शब्द
तन्मात्रं विषय इति जडत्वमाह नतु तन्मात्रस्य नश्रोत्रविषयत्वसंभव इति शेषंसुगमं ॥१४॥ ॥ ॥ ॥ ॥

पां॰टी॰ अथ विज्ञानवादिनं वैनाशिकमुत्थापयति नास्त्यर्थो विज्ञानविसहचर इति यदि हि भूतभौतिकानि विज्ञानमात्राद्भिन्नानि भवेयुः ततस्तदुत्पत्तिकारणमीश्वरं प्रधानं कल्पयेत न तु तानि विज्ञानातिरिक्तानि सन्ति परमार्थतः तत्कथं प्रधानकल्पनेन कथं च ग्रहणानामिन्द्रियाणामहंकारात्कल्पनेति तथा हि जडस्यार्थस्य स्वयमप्रकाशत्वान्नास्त्यर्थो विज्ञानविसहचर इति
८६ साहचर्यं संबंधः सहभावो विसहचरस्याभावार्थः विज्ञानासंबंधो नास्तीदं कस्यचिद्व्यवहारयोग्य इत्यर्थः अस्ति तु ज्ञानमर्थविसहचरं तस्य स्वयंप्रकाशत्वेन स्वगोचरव्यवहारोपकर्तृत्वे जडमर्थं प्रत्यपेक्षाभावात् तदनेन बोधस्य सहोपलंभनियमो सूचितो विज्ञानवादिना तो चैवं प्रयोगमारोहतः यद्वेद्यते येन वेदनेन तत्ततो न भिद्यते यथा।

नास्त्यर्थो विज्ञानविसहचरोऽस्ति तु ज्ञानमर्थविसहचरं स्वप्नादौ कल्पितमित्यनया दिशा ये वस्तु
स्वरूपमपह्नुवते ज्ञानपरिकल्पनामात्रं वस्तु स्वप्नविषयोपमं न परमार्थतोऽस्तीति य आहुः ॥१२॥

ज्ञानस्यात्मा वेद्यंते च भूतभौतिकानीति विरुद्धव्याप्तोपलब्धिः नियेध्याभेदविरुद्धेनाभेदेन व्याप्तं वेद्यत्वं दृश्यमानं स्वमानं स्वव्यापकमभेदमुपस्थापयत्तद्विरुद्धं भेदं
प्रतिक्षिपतीति तथापि वेद्यत्वेन नियतसहोपलंभं तत्ततो न भिद्यते यद्वै कस्माच्चं द्वाद्विनीयप्रयोगः नियतसहोपलंभश्चार्थज्ञानयोरिति व्यापकविरुद्धोपलब्धिः निषेध्यभेदव्या
पकानियमविरुद्धो नियमो नियमं निवर्तयंस्तद्व्याप्यं भेदं प्रतिक्षिपतीति स्यादेतत् अर्थश्चेन्न भिन्नो ज्ञानात्कथं भिन्नवदवभासत इत्यत आह कल्पितमिति॥ हेरंबः
यथाहुर्वैनाशिकाः सहोपलंभनियमादभेदो नीलतद्धियोः भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वय इति कल्पितत्वं विशदयति ज्ञानपरिकल्पनेति॥१२॥ ८६

निराकरोति तेदनि ते कथं अदृश्यवचनाः स्युरिति संबंधः प्रतिज्ञानमुपस्थितं प्रत्युपस्थितं कल्पनयेति यथायथावभासते इदं काराकारस्ते न तथा तथा प्रत्युपस्थितं ननु कल्पनोपस्थितं विता
न विषयतां पन्नं स्वमाहात्म्येनेति कारणत्वं विज्ञानं प्रसर्पत्स्वरूपं दर्शयतीति यस्मात् दर्शनस्वकीयपायाभ्यासशक्त्या विज्ञानमजनि तस्मादर्थस्य ग्राहकं तदेवं भूतं वस्तु कथमप्रमाणा
त्मकेन विकल्पविज्ञानबलेन विकल्पस्याप्रामाण्यं लौकिकत्वात् तद्बलस्यापि तदात्मनो ऽप्रमाणत्वं मकृत्वं तेन वस्तुस्वरूपमनुसृत्य उपप्लुते कृत्वा उद्भावन्न ते विकल्पविसाद तत्रा
विसरवार्थः तेदेवापलपंतः अदृश्यवचनाः स्युरिति दूरमत्राकृतं सहोपलंभनियमश्च वेद्यत्वं हेतुः संदिग्धव्यतिरेकतया नैकांतिको तथाहि ज्ञानाकारस्य भूतभौतिकादेर्यदि तत्र ग्राह्यत्वं स्थूल
त्वं च भासते न तज्ज्ञाने संभवतः तथाहि नानादेशव्यापिता स्थौल्यं विच्छिन्नदेशता च बाह्यत्वं न चैकविज्ञानस्य नानादेशव्यापिता विच्छिन्नदेशता वोपपद्यते तद्देशता तद्देशता न देशत्व
क्षणविरुद्धधर्मसंसर्गस्यैकत्राभावात् संभवे वा त्रैलोक्यस्यैकत्वप्रसंगात् अत एवास्तु विज्ञानभेद इति चेत् हंत भो परमसूक्ष्मगोचराणां परस्परवार्त्तानभिज्ञानां स्वगोचरमात्रजानतांकाणां

तेन येनेत्थमुपस्थितमिदं स्वमाहात्म्येन वस्तु कथमप्रमाणात्मकेन विकल्पज्ञानेन व
स्तुस्वरूपमनुसृत्य तदेवापलपंतः अदृश्यवचनाः स्युः ॥१३॥ ॥ ॥

कुतस्त्योयं स्थूलावभासः न च विकल्पगोचरो ऽभिलापः संसर्गाभावात् विशदप्रतिभासत्वाच्च न च स्थूलमालोचितं पश्चादुपधिकस्य विशदता भवेत् तन्नत्वाद्भाविनः न चाविकल्पव
द्विकल्पो ऽपि स्वाकारमात्रगोचरः तस्य चास्थूलता अस्थूलगोचरो भवितुमर्हति तस्माद्बाह्य एव च प्रत्यये स्थूलस्य बाह्यस्य चासंभवाद् अलीकमेतद् आस्थानं न चालीकं विज्ञानाद् भिन्नं विज्ञानस्य
तद्धि तुच्छत्वप्रसंगात् तथा च वेद्यत्वस्याभेदव्याप्यत्वाभावात् कुतो भेदप्रतिपक्षत्वं सहोपलंभनियमश्च सदसतोः स्वविज्ञानस्थौल्ययोः सतोरपि स्वभावाद् कुतश्चित्प्रतिबंधाद् उपपत्स्यते तेन
स्मादनैकांतिकत्वादिदं नै हेतुः आस्य विकल्पमात्रमेव बाह्याभावे प्रस्तुवाने न च प्रत्यक्षमाहात्म्यं विकल्पमात्रेणापोद्यते तस्मात् सा धृतेः कथमप्रमाणात्मकेन विकल्पज्ञानबलेनेति एतेन प्र
त्ययत्वमपि स्वप्नादिप्रत्ययदृष्टांतेन निरालंबनत्वसाधनमपास्तं प्रमेयविकल्पस्थैर्यं च यथाविभवस्थापनेन प्रत्युक्तः विस्तरस्तु न्यायकणिकायामनुसरणीय इह तु दिङ्मात्रं कृतं विस्तरेणेति ॥१३॥

पा.टी. तदेवमुक्तस्त्रैभाव्यकृत्ता विज्ञानातिरिक्तस्थापने युक्तिमुक्त्वा सौत्रीं युक्तिमवतारयति कुतश्चैतदिति वस्तुपंथाः पन्थानानात्वेयस्यैकत्वं नतत्ततो संतं भिद्यते यथाचैत्रस्यज्ञानमेकं भिन्ने
भ्यो देवदत्तविष्णुमित्रमैत्रप्रत्ययेभ्यो भिद्यते ज्ञाननानात्वेपि चार्थो न भिद्यतेइति भवति विज्ञानेभ्योन्यः अभेदश्चार्थस्यज्ञानभेदेपि प्रमाणदृष्टो परस्परप्रतिसंधानसीयते
८१ अस्ति हि रक्तद्विष्टमूढमध्यस्थानामेकस्यां योषिति प्रतीयमानायां प्रतिसंधानं यया त्वया दृश्यते सैव मयाप्यापीति तस्माद्वस्तुसाम्ये चित्तभेदात्तज्ज्ञानभेदात्तयोरर्थज्ञानयोर्विभ

कुतश्चैतन्न्याय्यं ॥१४॥ वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पंथाः बहुचित्तावलंबनीभूतमेकं वस्तु साधारणं तत्खलु नैकचित्तपरिकल्पितं
नाप्यनेकचित्तपरिकल्पितं किंतु स्वप्रतिष्ठं कथं वस्तुसाम्ये चित्तभेदात् धर्मापेक्षं चित्तस्य वस्तुसाम्येपि सुखज्ञानं भवति अधर्मापेक्षं त
त एव दुःखज्ञानं अविद्यापेक्षं तत एव मूढज्ञानं सम्यग्दर्शनापेक्षं तत एव माध्यस्थ्यज्ञानमिति कस्य तच्चित्तेन परिकल्पितं न चान्य
चित्तपरिकल्पितेनार्थेनान्यस्य चित्तोपरागो युक्तः तस्माद्वस्तुज्ञानयोर्ग्राह्यग्रहणभेदभिन्नयोर्विभक्तः पंथा नानयोः संकरगंधोप्यस्तीति ॥१५॥

क्तः पंथाः स्वरूपभेदोपाप्या सुखज्ञानं कांतायां कांतस्य सपत्नीनां दुःखज्ञानं चैत्रस्य तु तमविंदते मूढविज्ञानं विषादः स्यादेतत् यएकस्य चित्तेन परिकल्पितः क्वापि हेरंब
नीलक्षणोर्थस्तेनैवान्येषामपि चित्तमुपरज्यतइतिसाधारणमुपपद्यतइत्यत आह नचान्येति तथा सत्येकस्मिन्नीलज्ञानवृत्तिसर्वएव नीलज्ञानवंतः स्युरिति ॥१६॥ ॥ ८१

नन्वर्थवादिनामप्येकोर्थः कथं सुखादिभेदभिन्नविज्ञाने हेतुर्न ह्यविलक्षणात्कारणात्कार्यभेदो युक्त इत्यत आह सांख्यपक्ष इति एकस्यैव बाह्यस्य वस्तुनस्त्रैगुण्यपरिणामस्य त्रैरूप्यमुप
पन्नं एवमपि सर्वेषामविशेषेण सुखदुःखमोहात्मकं विज्ञानं स्यादित्यत आह धर्मादिनिमित्तापेक्षं रजः सहितं सत्वं धर्मापेक्षं सुखज्ञानं जनयति सत्वमेव तु विगलितरजस्कं विद्यापेक्षं मा
ध्यस्थ्यज्ञानमिति तेच धर्मादयो न सर्वत्र पुरुषे संति किंतु कस्मिंश्चित्कंचित्कदाचित्प्रत्युपपन्ना व्यवस्थिता इति अत्र केचिद्राकृपावादुका ज्ञानसहभूरेवार्थो भोग्यत्वात्सुखादिवदिति एतदुक्तं भवति।।

सांख्यपक्षे वस्तु पुनस्त्रिगुणं चलं च गुणवृत्तमिति धर्मादिनिमित्तापेक्षं चित्तैरभिसंबध्यते निमित्तानुरूपस्य च प्रत्ययस्य उत्पद्यमानस्य तेन तेना
त्मना हेतुर्भवति केचिदाहुः ज्ञानसहभूरेवार्थो भोग्यत्वात् सुखादिवदिति त एतया द्वारा साधारणत्वं बाधमानाः पूर्वोत्तरक्षणेषु वस्तुरूपमेवापह्नुवते।।१५।।

भवतः पीतानाद्यति सिद्धं तथाप्यसौ जडत्वान्न ज्ञानमंतरेण शक्यः प्रतिपत्तुं ज्ञानेन तु भासनीयः तथा च ज्ञानसमय एवास्ति नान्यदा प्रमाणाभावादिति तदेतदुक्तं सत्तं तावत्तद्रूपयति भावकाकारः
न एतया द्वारेति वस्तुस्वलक्षणं सर्वचित्तसाधारणमनेकक्षणपरंपरोपसमानं परिणामात्मकमनुभूयते लौकिकपरीक्षकैस्तच्चैकचित्तेनेन सह भवेत् नूनमेवंविधमेवं च यदिदमंशत्योपदिकोपमनु

ऽयेनसोपि नापह्नूयेतेत्यर्थः।।१५।।

पा·टी·

८८

मावाभूदित्यंशस्यापह्नवोज्ञानसहभूरेवास्त्वर्थः॥ तत्राप्याह नचैकं किं स्यात् यद्धि घटयादि चित्तंत घटाघटइयमप्यनयानघटे वर्त्तते यद्वा विवेकविषयमासीत्तदेव च निरोधंसमापद्यते
तदा घटज्ञानस्य वा विवेकज्ञानस्य वा अभावाद्विवेको वा घटो वाज्ञानमेरमात्रजीवनस्तन्नाशान्नष्ट एवस्यादित्याह एक चित्ते ति किंन तु स्यान्नस्यादित्यर्थः संबध्यमानंच चित्ते
नतद्वस्तु विवेको वा घटो वा कुत उत्पद्येत नियमकारणान्वयव्यतिरेकानुविधायि भावा नि हि कार्याणि न स्वकारणम् निवर्त्यकारणमतिवर्त्य कारणांतरान्नुवितुमिशते मा भूत्कारणे
तेषांकारणाचित्कत्वव्याघातः नचतत्तज्ञानैकारणमात्मा मि तिपुक्तं आशामोदकस्यमोदकस्येवोपयुज्यमानस्परसवीर्यविपाकादिसामर्थ्यप्रसंगमत् तस्मात्सा धूक्तं संबध्यमानं वा पुनश्चित्तेनेति
अपिचयामीर्ण्यगभागःससर्वोमध्यपरभागव्याप्तःज्ञानाधीनसद्भावेलस्यानुभूयमानत्वान्मध्यपरभागौनस्तइतिज्ञापकाभावाद्वीग्भागेप्पिनस्यादित्यर्थोभावान्नकुतोज्ञानसहभूरर्थ
इत्याह येचास्येति अनुपस्थिताअज्ञाताः उपसंहरतितस्मादिति सुगमं स्यादेतत् अर्थश्चेत्स्वतंत्रःसचजडस्वभावइत्यिकदाचित्प्रकाशेतप्रकाशनेवाजडत्वमप्यस्यापगतमितिभावोप्य

नचैकचित्ततंत्रंवस्तुतदप्रमाणकंतदाकिंस्यात् एकचित्ततंत्रं चेद्वस्तुस्यात्तच्चित्ते व्यग्रे निरुद्धेवास्वरूपमेवतेनापरामृष्टमन्यस्याविषयीभूतमप्रमाणकमगृहीतस्वभावकं
केनचित्तदानीं किंतत्स्यात् संबध्यमानंवापुनश्चित्तेनकुतउत्पद्येत येचास्यानुपस्थिताभोगास्तेचास्यनस्युः एवंनास्तिपृष्ठमित्युदरमपि नगृह्येत तस्मात्स्वतंत्रोर्थःसर्वपु
रुषसाधारणः स्वतंत्राणिचचित्तानिप्रतिपुरुषंप्रवर्त्तंते तयोःसंबंधादुपलब्धिःपुरुषस्यभोगइति॥१६॥ तदुपरागापेक्षित्वाच्चित्तस्यवस्तुज्ञाताज्ञातं अयस्कांतमणिकल्पा
विषयाअयःसधर्मकंचित्तंअभिसंबंध्योपरंजयंतेनचविषयेणोपरक्तंचित्तंविषयोज्ञातः ततोन्यःपुनरज्ञातःवस्तुनोज्ञाताज्ञातस्वरूपत्वात्परिणामिचित्तं॥१७॥

यागच्छेत् नतावत्स्वभावमपहायभावोभवितुमर्हति नचेंद्रियाधाधेयोजडस्वभावस्यार्थस्यधर्मःप्रकाशतइतिसांप्रतं अर्थधर्मत्वेनीलत्वादिवत्सर्वपुरुषसाधारणइत्येकः
शास्त्रार्थंतदनिसर्वएवविद्वांसःप्रसज्येरन् नजात्मःकश्चिदस्तिनचाततानाकारयोर्धर्मःप्रस्तुतस्तोपुलकः तस्मात्स्वतंत्रोर्थउपलंभविषयइतिमनोरथमात्रमेतदित्यतआह तदुपरागेति जडस्वभावो
ऽप्यर्थइंद्रियप्रणालिकयाचित्तमुपरंजयति तदेवंभूतंचित्तदर्पणमुपसंक्रांतप्रतिबिंबाचितिशक्तिः चित्तमर्थोपरक्तंचेतयमानार्थमनुभवतिनतुसर्वं किंचियाक्षादि
इंद्रियाधतेका नाप्यसंबद्धाचित्तेनातस्यातिव्याप्तिसंक्रांतेरुक्तत्वादितियद्यपिसर्वगतत्वाच्चित्तस्येंद्रियस्यचाहंकारिकस्यविषयेणास्तिसंबंधःतथापियत्रशरीरेवृत्तिमच्चित्तं
तेनसहसंबंधोविषयाणामितिसायस्कांतमणिकल्पाइत्युक्तं अयःसधर्मकंचित्तमितींद्रियप्रणालिकयाभिसंबंध्योपरंजयंति अतएवचित्तंपरिणामीसाहवस्तुनः

हेरंब

८८

तदेवं चित्तव्यतिरेकिणमर्थमवस्थाप्य तेभ्यः परिणामिधर्मकेभ्यो व्यतिरिक्तमात्मानमादर्शयितुं तद्वैधर्म्यमपरिणामित्वमस्य वक्तुं सूत्रयितास्त्रं पठति यस्यतु तदेवं चित्तं विषयस्तस्य सदा
ज्ञातात् क्षिप्तमूढविक्षिप्तैकाग्रतावस्थितं चित्तमानिरोधात्सर्वदा पुरुषेणानुभूयतेव तन्निमित्तं तत्कस्य हेतोर्यत्पुरुषोऽपरिणामी परिणामित्वे चित्तवत्पुरुषोऽपि ज्ञाताज्ञातविषयो भ
वेत् ज्ञातविषय एव त्वयं तस्मादपरिणामी ततश्चापरिणामित्वे निश्चयतइति तदेतदाह यदि चित्तवदिति सदाज्ञातत्वं तु मनसः सदा तत्कस्यतस्य यः प्रभुः स्वामी भोक्ते तिमा

यस्यतु तदेव चित्तं विषयस्तस्य सदाज्ञाता चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामात् यदि चित्तवत्प्रभुरपि पुरुषः परिणा
मेत ततस्तद्विषयाश्चित्तवृत्तयः शब्दादिविषयवत् ज्ञाताज्ञाताः स्युः सदाज्ञातत्वं तु मनसस्तत्प्रभोः पुरुषस्यापरिणामित्व
मनुमापयंति स्यादाशंका चित्तमेव स्वाभासं विषयाभासं च भविष्यतीत्यग्निवत् ॥१८॥ ॥ ॥

वत् तस्य प्रभोः पुरुषस्यापरिणामित्वमनुमापयंति तथाचापरिणामिनस्तस्य परिणामिनश्चित्तात्पुरुषस्य भेद इति भावः अत्र वैनाशिकमुत्थापयति स्यादाशंकेति अयमर्थः इदमिति॥७१॥
स्यादेतदेवं यदि चित्तमात्मनो विषयः स्यादपितु स्वयंप्रकाशमेतत् विषयाभासं पूर्वं चित्तं प्रतीत्य समुत्पन्नं तत्कृतः पुरुषस्य सदाज्ञातविषयत्वं कुतस्तरां वापरिणामित्वपरिणामित्वं प्रति

पा०टी० मतत्वात् पवेदेतन्देवं यदि स्वसंवेदनं चित्तस्यात्मत्वेन दृष्टं तद्धि परिणामित्वया नीलादिवदनुभवव्याप्यं यच्चानुभवव्याप्यं न तत् स्वाभासं भवितुमर्हति स्वात्मनि वृत्तिविरोधात् न हि तदे
८९ व क्रिया च कर्म च कारकं च न हि पाकः पच्यते छिदा वा छिद्यते। पुरुषस्त्वपरिणामी नानुभवकर्मेति नास्मिन् स्वयंप्रकाशता युज्यते अपराधीनप्रकाशनाद्यस्य स्वयंप्रकाशता नानुभवकर्म
ता तस्माद्दृश्यत्वाद्दर्शनकर्मचित्तं न स्वाभासं आत्मप्रकाशप्रतिबिंबितस्यैव चित्तस्य तद्वृत्तिविषयाः प्रकाशं तद् इति भावः ननु दृश्यो शनाद्यस्य स्वयंप्रकाशता नानुभवकर्मता तस्माद्
ग्निः स्वयंप्रकाशश्च न हि यथा घटादयोऽग्निना व्यज्यन्ते एवमग्निरग्न्यन्तरेणेत्यत आह न चाग्निरत्रेति कस्मात् न हीति मानामाग्निरन्यं तरात्प्रकाशिष्टवित्तानातुप्रकाशनद्

न तत् स्वाभासं दृश्यत्वात् यथोतराणां द्रियाणां शब्दादयश्च दृश्यत्वान्न स्वाभासा नितथा मनोपि प्रत्येतव्यं न चाग्निरत्र दृष्टांतः नह्य
ग्निरात्मस्वरूपमप्रकाशं प्रकाशयति प्रकाशश्चायं प्रकाश्यप्रकाशकसंयोगे दृष्टः न च स्वरूपमात्रेस्ति संयोगः किंच स्वाभासं चित्त मि
त्यग्राह्यमेव कस्यचिदिति शब्दार्थः तद्यथा स्वात्मप्रतिष्ठमाकाशमित्यप्रतिष्ठमित्येवेत्यर्थः स्वबुद्धिप्रचारप्रतिसंवेदनात्सत्त्वानां प्रवृत्ति
र्दृश्यते क्रुद्धोहं भीतोहमनुत्र मे रागो मे क्रोध इत्येतत् स्वबुद्धेरग्रहणे न युक्तमिति ॥२०॥१९॥ ॥ ॥ ॥

तिन स्वयंप्रकाशता इति न व्यभिचार इत्यर्थः प्रकाशश्चायमिति अयमिति पुरुषस्वभावात् प्रकाशाद्यवच्छिन्नात्क्रियारूपः प्रकाश इति यावत् एतदुक्तं भवति या या क्रिया सा सर्वा कर्त
करणकर्मसंबंधेन दृष्टा यथा पाको दृष्टश्चैत्राग्नितंडुलसंबंधेन तथा चाप्रकाशक्रियेति तया पि तथा भवितव्यं संबंधश्च भेदाश्रयो नाभेदे संभवतीत्यर्थः किं च स्वाभासं चित्तमित्य
ग्राह्यमेककस्यचिदिति शब्दार्थः स्यादेतत् मा भूद्ग्राह्यं चित्तं न हि ग्रहणस्याकारणस्याव्यापकस्य च निवृत्तौ चित्तनिवृत्तिरित्यत आह स्वबुद्धीति बुद्धिश्चित्तं प्रचारा व्यापाराः सत्त्वाः प्रा
णिनः चित्तस्य वृत्तिभेदाः क्रोधलोभादयः अयमेव चित्तेन स्वविषयेण च सह प्रत्यात्ममनुभूयमानाश्चित्तस्याग्राह्यतां विघटयंतीत्यर्थः स्वबुद्धिप्रचारप्रतिसंवेदनमेव विशदयति क्रुद्ध

हेरंब्र
८९

एकरणं स्वाभासं विषयाभासं चित्तमिति ब्रुवाणो भ्रांतताच येनैव व्यापारेणात्मानमवधारयति तेनैव विषयमपीति वक्तुमर्हति न ह्य विलक्षणो व्यापारः कार्ये भेदायपर्यासस्तस्माद्व्यापारभेदोंग
कर्त्तव्यः नचवैनाशिकानामुत्पत्तिभेदातिरिक्तोस्तिव्यापारः नचैकस्याएवोत्पत्तेर्विलक्षणापाः कार्यवैलक्षं संभवः तस्याकस्मिकत्वप्रसंगात्नचैकस्योत्पत्तिद्वयसंभवः तस्मादर्थस्य
चज्ञानरूपस्यचावधारणं नैकस्मिन्क्षणपदतिनदेतद्भाष्येणोच्यते न चैकस्मिन्क्षणइत्तियथाचोक्तं वैनाशिकैः भूतिर्येषां क्रियासैवकारकं सैवचोच्यतेइति तस्मादश्रपत्तमेतच्चि

एकसमयेचोभयानवधारणं नचैकस्मिन्क्षणेस्वपररूपावधारणंयुक्तं क्षणिकवादिनोयद्भवनंसैवक्रिया तदेवकारकमित्यभ्युपगमःस्यान्मतिः स्वरसनिरुद्धं
चित्तं चित्तांतरेणसमनंतरेणगृह्यतइति चित्तांतरदृश्येबुद्धिबुद्धेरतिप्रसंगःस्मृतिसंकरश्च अथचित्तंचेच्चित्तांतरेणगृह्येतबुद्धिबुद्धिःकेनगृह्येत
साप्यन्ययासाप्यन्ययेत्यतिप्रसंगः स्मृतिसंकरश्च यावंतोबुद्धिबुद्धीनामनुभवास्तावत्यःस्मृतयःप्राप्नुवंति तत्संकराच्चैकस्मृत्यनवधारणंस्यादित्येवंबु
द्धिप्रतिसंवेदिनंपुरुषमपलपद्भिर्वैनाशिकैःसर्वमेवाकुलीकृतं तेतुभोक्तृस्वरूपंयत्रक्वचनकल्पयंतोनन्यायेनसंगच्छंति केचित्सत्त्वमात्रमपिपरिकल्प्यास्तिससत्त्वो
यएतान्पंचस्कंधान्निक्षिप्यान्यांश्चप्रतिसंदधातीत्युक्त्वा तत्तएवपुनस्त्रस्यंति तथास्कंधानांमहन्निर्वेदायविरागायानुत्पादायप्रशांतयेगुरोरंति
केब्रह्मचर्यंचरिष्यामीत्युक्त्वासत्वस्यपुनःसत्वमेवापह्नुवते सांख्ययोगादयस्तुप्रवादाःस्वशब्देनपुरुषमेवस्वामिनंचित्तस्यभोक्तारमुपयंतीति ॥२१॥

तस्यस्वग्राहकंस्वाभासत्वमपनयद्दृष्टांतवद्द्रष्टुरपरिणामित्वंचतद्दर्शयतीतिसिद्धं पुनर्वैनाशिकमुच्छापयति स्यान्मतिः माभूद्दृश्यत्वेन स्वसंवेदनःएवमप्यात्मानसि
ध्यातिस्वसंतानवर्तिनाचरमचित्तक्षणेनस्वरसनिरुद्धस्वजनकचित्तक्षणग्रहणादित्यर्थः समं वत्ततज्ज्ञानत्वेनानंतरंबाध्यवाहितत्वेनसमनंतरंतेनचिश्चबुद्धिरितिचि
त्तमित्यर्थः नाग्रहीताचरमाबुद्धिःपूर्वबुद्धिग्रहणसमर्थानहिबुध्यासंबध्यापूर्वबुद्धिःभवितुमर्हति नचागृहीतदंडोदंडिनमवगंतुमर्हति तस्मादनवस्थेतिचित्तानवे
दनासंतानरूपसंस्काराःस्कंधाः सांख्ययोगादयःप्रवादाःसांख्याश्चयोगाश्चतएवादयोयेषांवैशेषिकादिप्रवादानांतेसंख्यायोगादयःप्रवादाःसुगममन्यत् ॥२१॥

पा॰टी॰ स्यादेतत् यदि चित्तं न स्वाभासं नापि चित्तांतरवेद्यं॰ आत्मन्यपि कथं भोक्ष्यते चित्तं न खल्वात्मनः स्वयंप्रकाशस्याप्यस्ति काचित्क्रिया नन्यथानामंतरेण कर्त्तान्न चासंबद्धचित्तेन कर्मणा तस्या
भोक्ता अतिप्रसंगादित्याशंकावान्पृच्छति कथमिति सूत्रेणोत्तरमाह चितं यत्तद्वो चतन्यत्तिसारूप्यमितरत्रेतिन दितः समुच्छितं चितेः स्वबुद्धिसंवेदनेबुद्धेश्च तदाकारा
९० पत्तौ चितिप्रतिबिंबाधारतया तद्रूपतापत्तौ सत्यां यथा हि चंद्रमसः क्रियामंतरेणापि संक्रांतचंद्रप्रतिबिंबममलं जलमचलं चलमिव चंद्रमसमवभासयति एवं चितिनापि चितिर्निर्व्यापारं

कृप ॥२१॥ चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनं अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रांते
व तद्वृत्तिमनुपततितस्याश्च प्राप्तचैतन्योपग्रहस्वरूपाया बुद्धिवृत्तेरनुकारमात्रतया बुद्धिवृत्त्यविशिष्टा हि ज्ञानवृत्तिरित्याख्यायते तथा चो
क्तं न पातालं न च विवरं गिरीणां नैवांधकारं कुक्षयो नोदधीनां गुहा यस्यां निहितं ब्रह्म शाश्वतं बुद्धिवृत्तिमविशिष्टां कवयो वेदयंत इति ॥२०॥ ॥

उपसंक्रांतचितिप्रतिबिंबं चित्तं स्वगतया क्रियाया क्रियावंतमिवासंगतामपि संगतां चितिशक्तिमवभासयद्भोग्यभावमासाद्य भोक्तृभावमापादयतीत्यस्याद्दतिसूत्रार्थः भा
ष्यमप्येतदर्थमस्पष्टं तत्र व्याख्यातमिति न व्याख्यातमत्र बुद्धिवृत्त्यविशिष्टत्वे ज्ञानवृत्तेरागममुदाहरति तथा चोक्तं न पातालमिति शाश्वतस्य शिवस्य ब्रह्मणो विशुद्धस्वभावस्य चितिछा ॥२०॥
यापन्नमनोवृत्तिमेव चितिछायापन्नत्वाच्चितेरप्यविशिष्टां गुहां वेदयंते तस्यामेव गुहायां तत्कुक्षं ब्रह्मसतदपनयेतु स्वयंप्रकाशमनावरणमनुपसर्गं प्रद्योततेवरमदेहस भगवत इति हेरंब
९०

तदेवं दृश्यत्वेन चित्तस्य परिणामिनस्तद्व्यतिरिक्तः पुमानपरिणामीति धर्मोपपादितः संप्रति लोकलप्रसक्षमप्यत्र प्रमाणयति अतश्चैतदिति अवश्यं चैतदित्यर्थः द्रष्टृत्वं यथा हि नीलाद्यनुरक्तं
चित्तं नीलाद्यर्थप्रत्यक्षे सौवावस्थापयति एवं द्रष्टृच्छायापत्यासादनुरक्तं चित्तं द्रष्टारमपि प्रत्यक्षेणावस्थापयति अस्ति हि व्याकारं ज्ञानं नीलमहं संवेद्मीति तस्मात् ज्ञेयवत् ज्ञाताऽपि
प्रत्यक्षसिद्धोऽपि न विविच्यावस्थापितो यथा जले चंद्रमसो विंबेन तत्प्रभावतात् दृश्यत्वं हं न चास्य जललगतत्वेन तत्प्रमाणमिति चंद्ररूपस्य प्रमाणं भवितुमर्हतीति तस्माच्चित्तप्रतिविंबितया चैत
न्यगोचरापि चित्तवृत्तिर्न चैतन्यगोचरेति तदिदं सर्वार्थत्वं चित्तस्येति तदेतद्धि हमनोऽहीति न केवलं तदाकारयत्ता मंतव्येनार्थेनोपरक्तं मनः अपि तु स्वयं चेति चकारो भिन्नक्रमः पुरुषे
तेनास्या नेतरं द्रष्टव्यः तच्छायापत्तिः पुरुषस्य वृत्तिः इयं च चैतन्यच्छायापत्तिश्चित्तस्य वैनाशिकैरभ्युपेतव्या कथमन्यथा चित्ते चैतन्यमारोपयन्तो बभ्रुरित्याह तदनेनेति वैनाशिका

अतश्चैतदभ्युपगम्यते ॥२०॥ द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थं मनो हि मंतव्येनार्थेनोपरक्तं तत् स्वयं च विषयत्वात् विषयिणा पुरुषेणात्मीयया वृत्त्याऽभिसंबद्धं तदेतच्चित्तमेव द्र
ष्टृदृश्योपरक्तं विषयविषयिनिर्भासं चेतनाचेतनस्वरूपापन्नं विषयात्मकमप्यविषयात्मकमिवाचेतनं चेतनमिव स्फटिकमणिकल्पं सर्वार्थमित्युच्यते तदनेन चित्तसा
रूप्येण भ्रांताः केचित्तदेव चेतनमित्याहुः अपरे चित्तमात्रमेवेदं सर्वं नास्ति खल्वयं गवादिर्घटादिश्च सकारणो लोक इति अनुकंपनीयास्ते कस्मात् अस्ति हि तेषां भ्रांतिबी
जं सर्वरूपाकारनिर्भासं चित्तमिति समाधिप्रज्ञायां प्रज्ञेयोऽर्थः प्रतिबिंबीभूतस्तस्यालंबनीभूतत्वादन्यः स चेदर्थश्चित्तमात्रं स्यात् कथं प्रज्ञयैव प्रज्ञारूपमवधार्येत तस्मात्
प्रतिबिंबीभूतोऽर्थः प्रज्ञायां येनावधार्यते स पुरुष इति एवं ग्रहीतृग्रहणग्राह्यस्वरूपचित्तभेदात् त्रयमप्येतज्जातितः प्रविभजंते ते सम्यग्दर्शिनस्तैरधिगतः पुरुष इति ॥२१॥

बाह्यार्थवादिन अपरे विज्ञानमात्रवादिनः ननु यदि चित्तमेव द्रष्ट्राकारं दृश्याकारं चानुभूयते हंत चित्तादभिन्नावेवास्तां द्रष्टृदृश्यौ यथाहुः अभिन्नोऽपि च बुद्ध्यात्मा विपर्यासि
तदर्शनैः ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यत इति तत्कथमेतेनुकंपनीया इत्यत आह समाधिप्रज्ञायामिति नैव तूक्तरूपपत्तिः भिन्नश्चित्तातिरिक्तं पुरुषमुपलभ्याप्य द्र
ग्योग्योऽपदेशीन समाधिप्रज्ञायामात्मगोचरायामवतार्य बोधयितव्याः तथा समाधिप्रज्ञायां प्रज्ञेयोऽर्थ आत्मा प्रतिबिंबीभूतोऽन्यः कस्मात् तस्यात्मन आलंबनीभूतत्वा
त् अथ चित्तादभिन्नमेव कस्मान्नालंबनं भवति निपरिपुक्तिबोधितोऽपि वैधर्म्यात्वेनासाद्धेतुः तत्र हेतुः स चेदात्मरूपोऽर्थश्चित्तमात्रं स्यात्तदानु तत्तो भतिरिक्तस्तत कथं
प्रज्ञारूपमवधार्येत स्वात्मनि विरोधात् उपसंहरति तस्मादिति समीचीनोपादेशेनानुकंपिता भवंति साह एवमेतदिति जातितः स्वभावतः इत्यर्थः ॥२०॥ ७॥

पा°टी° चित्तातिरिक्तात्मसद्भावे हेत्वंतरमवतारयति इतश्चेति तदसंख्येयात् यद्यप्यसंख्येयाः कर्मवासनाः क्लेशवासनाश्च चित्तमेवाधिशेरते न तु पुरुषं तथाच वासनाधीना विपाकाः चित्ताश्रयत-
या चित्तस्य भोक्तृतामावहंति भोक्तुरर्थे च भोग्यमिति तत्सर्वं चित्तार्थं प्राप्तं तथापि तच्चित्तमसंख्येयवासनाविचित्रमपि परार्थं कस्मात् संहत्यकारित्वादिति सूत्रार्थः व्याचष्टे तदेतदिति स्यादेतत्
९१ चित्तं संहत्यापि करिष्यति स्वार्थं च भविष्यति कः खलु विरोध इति यदि चेच्चित्तं स्वार्थं स्यात्तत्राह संहत्यकारिणेति सुखचित्तमिति भोगमुपलक्षयति तेन दुःखचित्तमपि द्रष्टव्यं तानभिसंध- [illegible] ॥२४॥

इतश्च ॥२३॥ तदसंख्येयवासनाभिश्चित्तमपि परार्थं संहत्यकारित्वात् तदेतच्चित्तमसंख्येयाभिर्वासनाभिरेव चित्रीकृतमपि परा-
र्थं परस्य भोगापवर्गार्थं न स्वार्थं संहत्यकारित्वात् गृहवत् संहत्यकारिणा चित्तेन न स्वार्थे न भवितव्यं न सुखं चित्तं सुखार्थं न ज्ञानं ज्ञानार्थं
उभयमप्येतत्परार्थं यश्च भोगेनापवर्गेण चार्थवान्पुरुषः स एव परो न परः सामान्यमात्रं यत्तु किंचित्परं सामान्यमात्रं स्वरूपेणोदाहरे-
द्वैनाशिकस्तत् सर्वं संहत्यकारित्वात्परार्थमेव स्यात् यस्त्वसौ परो विशेषः स न संहत्यकारी पुरुष इति ॥२४॥ २२॥ ॥ ॥

र्गं उक्तं एतदुक्तं भवति सुखदुःखे चित्ते प्रतिकूलानुकूलात्मके नात्मनि संभवतः स्वात्मनि वृत्तिविरोधात् न चान्योऽपि संहत्यकारी साक्षात्परंपरया वा सुखदुःखे विदधानस्ताभ्यामनु-
कूलनीयः प्रतिकूलनीयो वा तस्माद्यः साक्षात्परंपरया वा ताभ्यामनुकूलनीयः प्रतिकूलनीयो वा स च निसर्गात् पुरुषः एवमपवृज्यते येन ज्ञानेन तस्यापि तत्परतंत्रत्वात्स्वात्म-
नि च वृत्तिविरोधात् ज्ञानार्थत्वं न चान्यविषयाद्यस्मादपवर्गसंभवो विदेहप्रकृतिलयानामपवर्गप्रसंभवात्तस्मात्तज्ज्ञानमपि पुरुषार्थमेव न च तत्स्वार्थं नापि परमात्रार्थं संहतपरार्थं

हैरंब
९१

तदेकं कैवल्यमूलबीजं प्राप्तिमयमात्मदर्शनमुत्क्षान्तदुपदेशाधिकृतं पुरुषमनधिकृतपुरुषमनधिकृतपुरुषांतराद्व्यावृत्तमाह विशेषनिवृत्तिः यस्यात्मभावेभावे भावनास्ति
तस्याष्टांगयोगोपदेशाद्रतु इति श्रुतो पुंसां तस्यतत्परिपाका चित्तसत्वपुरुषयोर्विशेषदर्शनादात्मभावना निवर्त्तते यस्यात्मभावना नैवनास्ति नास्तिकस्य तस्योपदेशानधिकृतस्यापरिनि
ष्पन्नात्मतत्वस्य परलोकभावस्य नोपदेशेन विशेषदर्शनेनात्मभावभावनानिवृत्तिरिति सूत्रार्थः नन्वात्मभावनायाश्चित्तवर्त्तिन्याः कुतोवगमः इत्यत आह यथा प्रावृषीति प्राम्भवीर्यतत्त्वद
र्शनबीजमपवर्गभागीयं यत्कर्माष्टांगयोगानुष्ठानं तदेकदेशानुष्ठानेवा तदभिनिर्वर्त्तितमस्तीत्यनुमीयते तस्यचात्मभावभावनावश्यमेव स्वाभाविकी वस्त्वभ्यासं विनापि प्रवर्त्तते·

विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः यथा प्रावृषि तृणांकुरस्योद्भेदेन तद्बीजसत्तानुमीयते तथा मोक्षमार्गश्रवणे यस्य रोमहर्षाश्रुपातौ दृश्येते तत्राप्यस्ति वि
शेषदर्शनबीजमपवर्गभागीयकर्माभिनिर्वर्त्तितमित्यनुमीयते तस्यात्मभावनावनास्वाभाविकी प्रवर्त्तते यस्याभावादिदमुक्तं स्वभावमुक्त्वा दोषाद्येषां पूर्व
पक्षे रुचिर्भवति अरुचिश्च निर्णये भवति तत्रात्मभावभावना कोहमासं कथमहमासं किंस्विदिदं कथंस्विदिदं के भविष्यामः कथं भविष्याम इति सा तु विशे
षदर्शिनो निवर्त्तते कुतः चित्तस्यैवैष विचित्रः परिणामः पुरुषस्त्वसत्यामविद्यायां शुद्धः चित्तधर्मैरपरामृष्ट इति ततोस्यात्मभावनाकुशलस्य निवर्त्त
तद् इति ॥२५॥ तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तं तदानीं यदस्य चित्तं विषयप्राग्भारमज्ञाननिम्नमासीत् तदस्यान्यथा भवति कैवल्यप्राग्भारं विवेकज
ज्ञाननिम्नमिति ॥२६॥ तच्छिद्रेषु प्रत्ययांतराणि संस्कारेभ्यः प्रत्ययविवेकनिम्नस्य सत्त्वपुरुषान्यताख्यातिमात्रप्रवाहारोहिणश्चित्तस्य तच्छिद्रेषु प्रत्ययांतराणि
ऽस्मीति वा ममेति वा ज्ञानामीति वा न जानामीति वा कुतः क्षीयमाणबीजेभ्यः पूर्वसंस्कारेभ्य इति ॥२७॥ ॥२३॥ ॥ ॥ ॥

अनधिकारिणामागमिनां वचनेन दर्शयति यस्याभावादिदमिति नास्ति कर्मफलं परलोकिनोऽभावात् परलोकाभाव इति तत्र रुचिररुचिश्च निर्णये पंचविंशतितत्त्वविशेषे आत्मभावनाप्रा
प्राख्याता विशेषदर्शिनः परामर्शमाह चित्तस्यैव नित्यस्य विशेषदर्शनकुशलस्यात्मभावना विनिवर्त्तत इति अथ विशेषदर्शिनः कीदृशं चित्तमित्यत आह तदा चित्तं निगदव्याख्या
स्यादेतत् विशेषदर्शनं चेद्विवेकनिष्ठं तज्जातु चित्तं व्युच्छितं स्यात् तद्दृश्यते गच्छ भिक्षामटतो व्युच्छितमित्यत आह तच्छिद्रेष्विति प्रतीयते येन सप्रत्ययश्चित्तसत्वं तस्माद्विवेकस्थितेः
तेन निम्नस्य ज्ञानामीति साक्षात्मोक्षे विविच्य दर्शिते न जानामीति मे हस्तनिम्नलावहंकारममकारावहमस्मीति वा ममेति वा दर्शितो क्षीयमाणानि चेतानि बीजानि चेति समासः पूर्वसंस्का

स्यादेतत् सत्यपि विवेकविज्ञाने व्युत्थानसंस्कारा यदि प्रत्ययान्तराणि प्रसुवते कस्तर्हि हानहेतुरेतेषां यतः प्रत्ययान्तराणि न पुनः प्रसुवीरन्नित्यत आह हानमेषां अपरिपक्वविवेकज्ञानस्या
पा॰ टी॰ क्षीयमाणा व्युत्थानसंस्काराः प्रत्ययान्तरं प्रसुवते न तु परिपक्वविज्ञानस्य क्षीणाः प्रत्ययान्तराणि प्रसोतुमर्हन्ति यथा विवेकख्यातिः समुत्पन्ना अपि क्लेशान संस्कारान्तरं प्रसुवते तद्वत्
९२ सहेतोः जदेते क्लेशा विवेकज्ञानवह्निदग्धबीजभावा इति एवं व्युत्थानसंस्कारा अपीति अथ व्युत्थानसंस्कारा विवेकज्ञानसंस्कारैर्निरोध्यन्ताः विवेकसंस्काराश्च निरोधसंस्कारैर्निरो
संस्काराणां च बलवद्विषयत्वेन दर्शितं निरोधोपायः प्राक् शिक्षितं नीयद्दत्सत आह ज्ञानसंस्काराणामिति परवैराग्यसंस्कारादित्यर्थः तदेवं सूत्रकारो व्युत्थाननिरोधोपायं प्रसंख्यानमुक्त्वा प्रसं

ख्यानमेषां क्लेशवदुक्तं यथा क्लेशा दग्धबीजभावा न प्ररोहसमर्था भवन्ति तथा ज्ञानाग्निना दग्धबीजभावः सर्वसंस्कारो न प्रत्ययप्रसूर्भवन्ति ज्ञानसंस्कारास्तु चि
त्ताधिकारसमाप्तिमनुशेरत इति न चिन्त्यन्ते ॥२८॥ प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः यदायं ब्राह्मणः प्रसंख्यानेऽप्यकुसीदस्त
तोऽपि न किंचित्प्रार्थयते तत्रापि विरक्तस्य सर्वथा विवेकख्यातिरेव भवतीति संस्कारबीजक्षयात् नास्य प्रत्ययान्तराणि उत्पद्यन्ते तदास्य धर्ममेघो नाम
समाधिर्भवति ॥२९॥ ततः क्लेशकर्मनिवृत्तिः तल्लाभाद् विद्यादयः क्लेशाः समूलकाषं कषिता भवन्ति कुशलाकुशलाश्च कर्माशयाः समूलघातं हता भ
वन्ति क्लेशकर्मनिवृत्तौ जीवन्नेव विद्वान् विमुक्तो भवति कस्मात् यस्माद्विपर्ययो भवस्य कारणं न हि क्षीणक्लेशविपर्ययः कश्चित्केनचित्क्वचिज्जातो दृश्यत

स्थाननिरोधोपायमाह प्रसमाधिः तत प्रसंख्यानात् न किंचित् सर्वभावाधिष्ठातृत्वादि प्रार्थयते प्रत्युत तत्रापि विरक्तस्य सर्वथा विवेकख्यातिरेव भवति एतदेव वि
वेति यदा चेति यदा व्युत्थानप्रत्ययाभावे पुरुषस्य तादात्म्याभावात् सर्वथा विवेकख्यातिः पतत्यस्य न प्रत्ययान्तराणि भवन्ति तत सर्वथा विवेकख्यातिरिति तदा खलु धर्ममेघः समाधिर्भवति एत
दुक्तं भवति प्रसंख्याने विरक्तस्य निरोधमिच्छतः धर्ममेघं समाधिमुपासीत तदुपासनेन सर्वथा विवेकख्यातिर्भवति तथा च तन्निरोधं धारयतीति तस्य धर्ममेघजन्मा हन्त तः ततः स्मात् जु
नीवन्नेव मुक्तो भवति उत्तरं यस्मादिति कस्मात् पुनः क्षीणविपर्ययो मुक्तो न पुनर्जायते उत्तरं यस्मादिति क्लेशकर्मवासनेन्धः किल कर्माशयो जात्यादिनिदानं न वासनानिदानेन निदा
नीभवितुमर्हतीति यथाहात्र भगवान् क्षपादः वीतरागजन्मादर्शनादिति ॥२४॥ ॥ ॥ हेरंब
९२

अथैवंधर्ममेघे सति कीदृशं चित्तमित्यत आह तदा सर्वेत्यं आव्रियते चित्तसत्त्वमेभिरित्यावरणानि मलाः क्लेशकर्माणि सर्वे च ते आवरणमलाश्चेति सर्वावरणमलास्तेभ्योपेतस्य चित्तसत्त्वस्य
ज्ञानस्यतापतेनेनेति अनन्त्यामुक्तस्य आनन्त्याद्यपरिमेयत्वात् ज्ञेयमल्पं यथा दिशरद्दिवि घनपटलमुक्तस्य चंडांशोः विषः परितः प्रद्योतमानस्य प्रकाशानंत्यात्प्रकाश्या घटादयोऽल्पाः प्रकाशंतेऽ
यमपगतरजस्तमसश्चित्तसत्त्वस्य प्रकाशानंत्यादल्पं प्रकाश्यमिति तदेतदाह सर्वैरिति एतदेव व्यतिरेकमुखेन स्फोरयति आवरकेण तमसाभिभूतमिति क्रियाशीलेन रजसा प्रव
र्तितमत एवोद्घाटितप्रदेशाद्यन्नीतंतमस्त्यर्थः अतएव सर्वान् धर्मान्ज्ञेयान्मेहति वर्षति प्रकाशनेनेति धर्ममेघ इत्युच्यते तन्वयमस्तु धर्ममेघः समाधिः सत्त्वासनक्लेशकर्माश

तदा सर्वावरणमलापेतस्य ज्ञानस्यानंत्याज्ज्ञेयमल्पं । सर्वैः क्लेशकर्मावरणैर्विमुक्तस्य ज्ञानस्यानंत्यं भवति तमसाभिभूतमनंतं ज्ञानसत्त्वं क्वचिदेव रजसा प्रवर्तित
मुद्घाटितं ग्रहणसमर्थं भवति तत्र यदा सर्वैरावरणमलैरपगतं भवति तदा भवत्यस्यानंत्यं ज्ञानस्यानंत्याज्ज्ञेयमल्पं संपद्यते यथाकाशे खद्यो
तः यत्रेदमुक्तं अंधो मणिमविध्यत् तमनंगुलिरावयत् अग्रीवस्तं प्रत्यमुंचत् तमजिह्वोभ्यपूजयदिति ॥३१॥ ततः कृतार्थानां परिणामक्रमसमाप्ति
र्गुणानां तस्य धर्ममेघस्योदयात्कृतार्थानां गुणानां परिणामक्रमः परिसमाप्यते न हि कृतभोगापवर्गाः परिसमाप्तक्रमाः क्षणमप्यवस्थातुमुत्सहंते ॥२५॥

यप्रशमहेतुः अथ सत्यप्यस्मिन्नवस्थाने जायते पुनर्जंतुरित्यत आह यत्रेदमुक्तमिति कारणसमुच्छेदादपि चेत्कार्यं क्रियते हंत भोः मणिवेधादयोंधादिभ्यो भवेयुः
प्रसक्ष्याः तथाचानुपपन्नार्थतायामाभाणको लौकिक उपपन्नार्थः स्यात् अविध्यदंधो मणिमिति आवयन्नय ग्रथितवान् प्रत्यमुंचत् अनद्धवान् अभ्यपूजयत् स्तुतवानि
ति ननु धर्ममेघस्य पराकाष्ठा ज्ञानप्रसादमात्रं परं वैराग्यं समूलघातमपहंतु व्युत्थानसमाधिसंस्कारान् क्लेशकर्माशयान् गुणास्तु स्वत एव विकारकरणशीलाः कु
कस्मात्तादृशमपि पुरुषं प्रति देहेंद्रियादि नारभंत इत्यत आह ततो गुणानां शीलमिदं गुणानां यदमी यं प्रति कृतार्थास्तं प्रति न प्रवर्त्तंत इति भावः ॥२५॥ ॥ ॥

पा॰टी॰ अनंतरे परिणामक्रमं पृच्छति अथ कोयमिति क्षणक्रमः परिणामक्रमः क्षणप्रतियोगी क्षणप्रतिसंबंधी यस्य स तथोक्तः क्षणप्रचयाश्रय इत्यर्थः न जातु क्रमः क्रमवंतमंतरेणाशक्यो नि
रूपयितुं न चैकस्यैव क्षणस्यास्ति क्रमः तस्मात् क्षणप्रचय आश्रयः परिशिष्यते तदिदमाह क्षणानंतर्यात्मेति परिणामक्रमे प्रमाणमाह परिणामस्येति नवस्य हि वस्त्रस्य प्र
९३ मलसंरक्षितस्यापि चिरेण पुराणता दृश्यते सोयं परिणामस्यापरांतः पर्यवसानं तेन हि परिणामस्य क्रमस्ततः प्रागपि पुराणतायाः सूक्ष्मसूक्ष्मतरसूक्ष्मतमस्थूलस्थूलतरत
मतादीनां पौर्वापर्यमनुमीयते एतदेव व्यतिरेकमुखेन दर्शयति नहीति अननुभूतोऽप्राप्तः क्रमक्षणोपचया सा तथोक्ता नन्वेष क्रमः प्रधानस्य न संभवति तस्य न संभवति नस्य नि
सतादित्यत आह नित्येष्विति बहुवचनेन सर्वव्यापिनां क्रमस्य प्रतिजानीते तत्र नित्यानां प्रकाशभेदं दर्शयित्वा नित्यव्यापितां क्रमस्योपपादयति द्वयीति ननु कूटस्थस्व

अथ कोयं क्रमो नामेति ॥३३॥ क्षणप्रतियोगी परिणामापरांतनिर्ग्राह्यः क्रमः क्षणानंतर्यात्मा परिणामस्यापरांतेनावसानेन गृह्यते क्रमः न ह्यननुभूतक्रमक्षणा पुराणता व
स्त्रस्यांते भवति नित्येषु च क्रमो दृष्टः द्वयी चेयं नित्यता कूटस्थनित्यता परिणामिनित्यता च तत्र कूटस्थनित्यता पुरुषस्य परिणामिनित्यता गुणानां यस्मिन् परिणम्यमा
नेन तत्वं न विहन्यते तन्नित्यं उभयस्य च तत्वाविघातान्नित्यत्वं तत्र गुणधर्मेषु बुद्ध्यादिषु परिणामापरांतनिर्ग्राह्यः क्रमो लब्धपर्यवसानो नित्येषु धर्मिषु गुणेष्वलब्धपर्यवसानः
कूटस्थनित्येषु स्वरूपमात्रप्रतिष्ठेषु मुक्तपुरुषेषु स्वरूपास्तिता क्रमेणैवानुभूयत इति तत्राप्यलब्धपर्यवसानः शब्दपृष्ठेनास्तिक्रियामुपादाय कल्पित इति ॥२६॥

भावादप्रच्युतमस्तु नित्यं परिणाम्यपि सदैव स्वरूपादप्रच्यवमानं कथं नित्यमत आह यस्मिन्निति धर्मलक्षणावस्थानामुदयव्ययधर्मत्वं धर्मिणस्तत्त्वादविघात एवेति अथ किं परिणा
मापरांतनिर्ग्राह्यता सर्वत्र क्रमस्येत्यत आह तत्र गुणधर्मेषु बुद्ध्यादिष्विति यतो लब्धपर्यवसानः धर्माणां विनाशात् प्रधानस्य तु परिणामक्रमो न लब्धपर्यवसानः ननु प्रधा
नस्य धर्मरूपेण परिणामास्तु परिणामक्रमः पुरुषस्य त्वपरिणामिनः कुतः परिणामक्रम इत्यत आह कूटस्थेति तत्र बद्धानां चित्ताव्यतिरेकाभिमानात् तत्परिणामेन परि हेरंब
णामाध्यासः मुक्तानां चास्तिक्रियामुपादाय व्यस्तत्वेपि परिणामो मोहेन कल्पितः शब्दस्य पुरःसरतया तत्स्पृष्टो विकल्पोऽस्तिक्रियामुपादत्त इति ॥२६॥ ७॥ ॥ ॥ ९३

गुणेषु लब्धपर्यवसानः परिणामक्रम इत्युक्तं तद् असहमानः पृच्छति अथेति स्थित्येति महाप्रलयावस्थायां गत्येति सृष्टौ एतदुक्तं भवति यथाऽनंतस्यात्मपरिणामसमाप्तिः संसारस्य हंत मोक्षपं महाप्रलस
मये सर्वेषामात्मनां सहसा समुच्छिद्येत कथं चस्वस्था दौ सहसो ऽसद्येत संसारः तस्मादेकैकस्यात्मनो मुक्तिक्रमेत्लसर्वेषां विमोक्षादुच्छेदः सर्वेषां संसारस्याक्रमेणेति प्रधानपरिणामक्रमपरिस
माप्तिः प्यवं च प्रधानस्याप्यनित्यत्वप्रसंगः न चापूर्वसत्त्वप्रादुर्भाव इष्यते येनानंत्यं स्याद् तथा सत्यनादित्वव्याहतेः सकलशास्त्रार्थभंग इति भावः उत्तरमाह अवचनीयं अनुत्तरणीयमेतत् एकांत
त एवतत्स्यावचनीयतां दर्शयितुं मेकांतवचनीयं प्रश्नं दर्शयति अस्ति प्रश्न इति सर्वो जातो मरिष्यतीति प्रश्नोत्तरं ओं भो इति सत्यं भो इति सत्यं भो इत्यर्थः अविभज्यवचनीयमुक्त्वा प्रविभज्य
वचनीयं प्रश्नमाह अथ सर्व इति विभज्यवचनीयता महविभज्येति विभज्यवचनीयमेव प्रश्नांतरं विस्पष्टार्थमाह तथा मनुष्येति अयं त्ववचनीय एकांततः न हि सामान्येन कुशलाकुशलपुरुष

अथास्य संसारस्य स्थित्या गत्या च गुणेषु वर्त्तमानस्यास्ति क्रमसमाप्तिर्न वेति अवचनीयमेतत् कथं अस्ति प्रश्न एकांतवचनीयः सर्वो जातो मरिष्यतीति म
त्वा जनिष्यत इति ओं भो इति अथ सर्वो जातो मरिष्यतीति मृत्वा जनिष्यत इति विभज्यवचनीयमेतत् प्रत्युदितख्यातिः क्षीणतृष्णः कुशलो न जनि[illegible]
ते न जनिष्यते इतरस्तु जनिष्यते तथा मनुष्यजातिः श्रेयसी न वा श्रेयसीति एवं परिपृष्टे विभज्यवचनीयः प्रश्नः पशूनधिकृत्य श्रेयसी देवानृषींश्चाधि[illegible]
नेति अयं त्ववचनीयः प्रश्नः संसारोऽयमंतवानथानंत इति कुशलस्यास्ति संसारक्रमपरिसमाप्तिर्नेतरस्येति अन्यतरावधारणे दोषः तस्माद्व्याकरणीय एवायं प्रश्नः

संसारस्यांतवत्त्वमनंतवत्त्वं वा शक्यमेकांततो वक्तुं यथा प्राणिमात्रस्य श्रेयस्त्वमश्रेयस्त्वं वा नैकांततः शक्यमवधारयितुं ० यथा जातमात्रस्य मरणमेकांततो विभज्य पुनः शक्य
वधारणमित्याह कुशलस्येति अयमभिसंधिः क्रमेण मोक्षे सर्वेषां मोक्षात् संसारोच्छेद इत्यनुमानं न चागमसिद्धमोक्षाश्रयं तथा वाभ्युपगतमोक्षप्रतिपादकागमप्रमाणभावः कथं
तमेनागमं प्रधानविकारमित्यतापाणी कुर्यात् तस्मादागमबाधितविषयमेतदनुमानं न प्रमाणं श्रूयते हि श्रुतिस्मृतीतिहासपुराणेषु सर्गप्रतिसर्गपरंपरया अनादित्वमनंतत्वं चेति
अपि न सर्वेषामेवात्मनां संसारस्य न तावद्युगपदुच्छेदः संभवी न हि पंडितरूपाणामप्यनेकजन्मपरंपराभ्यासपरिश्रमसाध्या विवेकख्यातिप्रतिष्ठा किं पुनः प्राणिमात्रस्य [illegible] विर
जंगमादेरेकदा कस्माद्भवितुमर्हति न च कारणायौगपद्ये कार्ययौगपद्यं युज्यते क्रमेण तु विवेकख्यातावसंख्येयानां क्रमेण मुक्तौ न संसारोच्छेदः अनंतत्वाज्जंतूनां असंख्येयत्वाद् इति सि[illegible] विस्तरं ॥२४॥

पा॰टी॰ केवल्यरूपावधारणपरस्यसूत्रस्यावांतरसंगतिमाह गुणाधिकारेति पुरुषार्थशून्यानांगुणानांप्रतिप्रसवःकैवल्यं॰स्वरूपप्रतिष्ठावाचितिशक्तिरिति कृतकरणीयतयापुरुषार्थ
शून्यानांयःप्रतिप्रसवःस्वकारणेप्रधानेलय. तेषांकार्यकारणात्मनांगुणानांव्युत्थानसमाधिनिरोधसंस्कारामनसिलीयंतेमनोऽस्मितायां अस्मिता आलिंगे लिंगम
९४ लिंगइतियोयंगुणानांकार्यकारणात्मकानांप्रतिसर्गस्तत् कैवल्यंयंकंचित्पुरुषंप्रतिप्रधानस्यमोक्षः स्वरूपप्रतिष्ठापुरुषस्यवामोक्षइत्यसहस्वरूपनिअक्तिहिमह

गुणाधिकारक्रमपरिसमाप्तौकैवल्यमुक्तंतत्स्वरूपमवधार्यते ॥३३॥ पुरुषार्थशून्यानांप्रतिप्रसवःकैवल्यंस्वरूपप्रतिष्ठावाचितिशक्तिरिति कृत
भोगापवर्गाणांपुरुषार्थशून्यानांयःप्रतिप्रसवःकार्यकारणात्मनांगुणानांतत्कैवल्यंस्वरूपप्रतिष्ठापुनर्बुद्धिसत्वानभिसंबंधात्पुरुषस्य चि
तिशक्तिरेवकेवलातस्याःसदातथैवावस्थानंकैवल्यमिति ॥ ॥इतिपातंजलेयोगशास्त्रेसांख्यप्रवचनेकैवल्यपादश्चतुर्थःसंपूर्णः ॥ ॥२८॥

त्वये[illegible]पिस्वरूपप्रतिष्ठाचितिशक्तिर्नचासौमोक्षइत्यतआहपुनरिति सौत्रइतिशब्दःशास्त्रपरिसमाप्तौ,मुक्ताहचित्तंपरलोकमेयत्तसिद्धयोधर्ममेघःसमाधिर्द्वयीचमुक्तिः हेयं
प्रतिपादितास्मिन्पादेप्रसंगादपिचान्यदुक्तं निदानंतापानामुदितमथतापाश्चकथिताःसहांगैरष्टाभिर्विहितमिहयोगद्वयमपि कृतोमुक्तेरध्वागुणपुरुषभेदः स्फुटत
रो विविक्तंकैवल्यंपरिगलिततापाचितिरसौ ॥ ॥इतिश्रीवाचस्पतिविरचितायांपातंजलभाष्यव्याख्यायांकैवल्यपादः४ समाप्तः ॥ ॥२२॥ शुभमस्तु ॥ ॥ ९८